शतरुद्रियम्

(षड्विधपाठभेदसहितम्)
आचार्यगोविन्दकृतभाष्येण विभूषितम्

संशोध्य सम्पादयिता
डा.बन्नञ्जे गोविन्दाचार्यः

तत्वसंशोधनसंसत्
विद्यामान्यप्रकाशनम्
श्रीहृषीकेशतीर्थसंस्थानम्, रजतपीठपुरम् (उडुपि)

२०१३

ŚATA-RUDRIYAM: Six different readings of Śata-Rudriyam with the Bhāṣya of **Dr. Bannañje Govindācārya, [Padmashri awardee, Vidyāvācaspati, Vidyā-Ratnākara]**

Critically Edited by : **Dr. Bannañje Govindācārya**

Published by : **Tatva-Samśodhana-Samsat**
Śrī -Vidyāmānya -Prakāśana
Śrī Hṛṣikeśa-Tīrtha-Samsthānam,
(Śrī Palimāru Maṭha) Udupi,
Karnataka, (India) Tel. 0820-2523402

First Edition : 20.1.2013, (Copies : 500)

Second Edition : 21.5.2013, (Copies : 500)

Pages : 26+212

Price : ₹ 200

ISBN: : 978-93-81807-09-5

Cover page and Inner Arts : **Ujjwalaneelamani, Russia**

Cover design : **K.M. Sheshagiri**

Typeset : **Kaddi S. Badarinarayanachar**
Poornaprajna Vidyapeetha
E-Mail : bnkaddi@gmail.com

Printed at : **Rajaprakash Prints**
Chamarajpet, Bengaluru- 560 018

कृतज्ञतां प्रशास्महे

गणकयन्त्रद्वारा कृताक्षरविन्यासाय निस्पृहाय विदुषे श्रीमते कड्डीपदोपाह्वाय बदरीनारायणाचार्याय–

अक्षरशोधनकर्मणि सहकृतवते श्रीमते विजयसिंहाय कृष्णराजभट्टाय च ।

रक्षापत्रे मुद्रणायापूर्वतैलवर्णकप्रदानेन प्रदर्शितवेदवाङ्मयश्रद्धाय शुद्धात्मने ऋषिक(रशिया)देशसम्भवाय अनुसृतमाध्वपथाय सदाहृदिकृतहरिकथाय श्रीमते उज्ज्वलनीलमणिनाम्ने कलाधाम्ने ।

रक्षापत्रे चात्र मधुरं कृतकलाविन्यासाय युवकलाविदे श्रीमते के. एम्. शेषगिरये–

सुन्दरं मुद्रयित्वा कृतसहकाराय 'राजप्रकाश प्रिण्ट्स्' मुद्रणालयाधिकृताय श्रीमते प्रकाशाय च–

रजतपीठपुरम् **प्रकाशनसमितिः**
तत्वसंशोधनसंसत्

प्रथमं निवेदनीयम्

याजुषं शतरुद्रियं शुक्ले च कृष्णे च यजुषि पठ्यते किञ्चिदिव पाठभेदेन । षड्विधः शतरुद्रियपाठभेदः षट्सु संहितासु सम्प्रत्युपलभ्यते । ता इमाः संहिताः–तैत्तिरीयसंहिता, काण्वसंहिता, माध्यन्दिनसंहिता, मैत्रायणीयसंहिता, काठकसंहिता, कपिष्ठलकठसंहिता चेति । षड्विधमपि शतरुद्रियमिदमुपज्ञमिह प्रकटितम् । तत्र तावत् तैत्तिरीयं शतरुद्रियं तैत्तिरीयसंहितायां चतुर्थकाण्डे पञ्चमः प्रपाठक एकादशानुवाकात्मकः । रुद्रप्रपाठक इत्येव यमामनन्ति । अस्य प्रतने भाष्ये–एकं सायणीयमपरं भट्टभास्करीयम् । शुक्लयजुर्वेदीयं माध्यन्दिनं शतरुद्रियं महीधरो व्याचख्यौ । उवटोऽपि । काण्वसंहितां हलायुधोऽपि व्याचख्यौ । सायणोऽपि । न ते तत्ववादानुगुणाः । प्रज्ञावादमूला वेदवादा एव ते । वेदवाङ्मयस्याध्यात्मपरतामाचार्यमध्वः प्रथममुज्जुघोष । सर्वेषां वेदानां त्र्यर्थतामन्ततो विष्णुपरतां च ॥

तथाहि रुद्र इति चतुर्ष्वर्थेषु पठ्यते वेदेषु । रोदनादग्नी रुद्र इति स्थूलं वचनम् । ततः पापिनो रोदयतीति, रुजं द्रावयतीति मनोनेता भिषक्तमः शिवो रुद्रः । ततोऽपि सूक्ष्मदर्शने, तयैव निष्पत्त्या चित्तनियन्ता प्राणो रुद्रः । **'रुजां द्रवणतो रुद्रो वायुः'** इत्यृग्भाष्ये । ततोऽप्यन्तर्दर्शने, शिवप्राणयोरप्यन्तर्यामी, **'नामानि सर्वाणि यमाविशन्ति'** इति श्रुतिगदितः सर्वनामा नारायणो रुद्रः । **'रुजं द्रावयते यस्माद् रुद्रस्तस्माज्जनार्दनः'** इति पौराणं वचनम् । **'रुद्रो बहुशिरा बभ्रुः'**, **'सर्वः शर्वः शिवः स्थाणुः'** इत्यादि च विष्णुसहस्रनामसु । उक्तं च भगवता वासुदेवेन–**'वेदैश्च सर्वैरहमेव वेद्यः'** इति । मुख्यप्रतिपाद्य इत्यर्थः । अमुख्यतयाऽन्येऽपि ॥

ततश्च मनोमानी शिवः, जीवकलामानी वायुः, सर्वनियन्ता नारायणश्चैतत्-प्रपाठकप्रतिपाद्या इति शास्त्रसम्प्रदायविदां मतम् । प्राण इति भावित्वात् स्वयम्भूरपि । तेन विष्णुर्ब्रह्मा हरश्चेति त्रिमूर्तयोऽप्यत्र स्तूयन्त इति मान्यतमोऽयं मन्त्रग्रामः । स्मरन्ति च– **'त्रयोऽर्थाः सर्ववेदेषु'** इति ॥

तत्र भट्टभास्करादयः श्रौतसम्प्रदायानभिज्ञा इव शतरुद्रियं केवलं शिवपरतया व्याचक्षते नूनं दुराग्रहग्रस्ततया श्रुतिहृदयमवगन्तुमप्रभवः । शोच्या हि ते प्रज्ञावादमात्रबलाः । अर्थानां निर्वर्णने, निर्वचननिरूपणे, वैदिकव्याकरण-विश्लेषणे च तत्रतत्र स्खलन्तो दृश्यन्ते । तदुत्तरत्र किञ्चिदिव प्रदर्शितम् । तस्मान्न शक्यं तदनुसरणेन मन्त्रार्थो निश्चेतुम् ॥

यद्यपि अस्त्येका तैत्तिरीयशतरुद्रियस्य तत्ववादसम्प्रदायानुसारिणी टीका, नवरत्नपुरुषोत्तमाचार्येण विरचिता, यः परस्तात् उत्तरादिमठीयपीठमारुह्य सत्यधर्मतीर्थाख्यो यतिर्बभूव । तत्र सर्वे मन्त्रा रामपरतया व्याख्याताः । उपसञ्हार च– **'रामो मुख्यार्थोऽमुख्यस्तु स्थाणुरित्यशेषमतिमङ्गलम्'** इति । अनुमन्यामहे तदपि । अथापि न तत्रार्थत्रयपरता विवृता । न प्राणपरता । नतरां शिवपरता । विष्णोरपि रामाख्यावतारपरतयैव परं निरूपिता । पदपाठभेदश्च नात्यन्तमादृतः ॥

ततश्च विष्णुपरम्, प्राणपरम्, तत्रापि प्राणस्यावतारत्रयपरम्, शिवपरं चार्थमवगमयत् पदपाठानुगुणं च व्याख्यानान्तरमपेक्षितमासीत् । तदर्थं मया नारायणस्य प्राणस्य शिवस्य चानुग्रहसम्भृतया प्रेरणया नूतनं भाष्यं प्राणायि । समापि च तेषामेव करुणया ॥

अपूर्वोऽयं रुद्रप्रपाठकः । यत्र दोषपदैरपि रुद्रः स्तूयते । तद्यथा– **'तस्कराणां पतये नमः, मुष्णतां पतये नमः, नमो विरूपेभ्यः, क्षुल्लकेभ्यश्च वो नमः, नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमः, नमः श्वभ्यः, नमो ह्रस्वाय, नमो वृद्धाय, कनिष्ठाय च नमः, नमो जघन्याय, नमो दूताय'** इत्यादि ॥

किमिदम्? भगवद्गुणगानाय श्रुतयः प्रवर्तन्त इति श्रुतम् । तत् कोऽयं समाहारो निन्दायाः? दोषारोपो भगवति?

अत्राऽचक्षते मायावादिनः– चोरचण्डालश्वादयोऽप्यन्ततः ब्रह्मात्मान इति सर्वत्र ब्रह्मरूपत्वानुसन्धानायेदमुदितम् । तथाहि गीतायाम्– **'शुनि चैव श्वपाके च पण्डिताः समदर्शिनः'** इतीति ॥

किमुक्तं भवति? ब्रह्मैव तस्करो बभूव, ब्रह्मैव श्वा बभूवेत्यनुसन्धेयमित्युक्तं भवति । अहो ब्रह्मोपासनविधिस्तेषाम् । शुक्तितो भिन्नं रजतं नास्तीति शुक्ति-रेव रजतत्वेनानुसन्धेयेति पर्यवसितम् । नास्ति तेषां भ्रमस्यौषधम् । नूनं ते ब्रह्मणि नैच्यानुसन्धानेन नीचामेव गतिमाप्नुयुः । नूनमीदृशानेवाऽगूर्य गीता-चार्य आह– **'मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्'** इति । अनुकम्प-नीयास्ते । नैर्गुण्यवादेन भगवद्गुणतस्करा आत्मापहारिणः शोच्यास्ते । तथाहि महाभारते– **'योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते । किं तेन न कृतं पापं चोरेणाऽत्मापहारिणा'** इति । **'प्राकाश्या ह्येते तस्कराः'** इति च श्रुतिः । किं ततोऽन्ये केऽपि तस्करा भूयासुर्ये परं ब्रह्मैव तस्करमाचक्षते ॥

अतोऽन्यदेव वेदहृदयमन्वेष्टव्यं भवति, येन मुखतो दोषवचनान्यपि सर्वाणि वेदपदान्यन्ततो गुणवचनान्येव स्युः, गौणानि भगवन्नामान्येव स्युः । तदेतदुक्तं भगवत्पादेन– **'दोषशब्दाश्च विष्णावि'** इति । तस्य च लोकविलक्षणत्व-ज्ञापनार्थमेव **'विष्णावि'** इति वैदिकपदप्रयोगः । मुख्यतो **'विष्णावि'** । तदनु यथासम्भवमितरदेवतासु चेत्युक्तं भवति ॥

तेन लोके दोषवाचिनामपि पदानां भगवति गुणपरतैव परमार्थः । तेन सर्वपदगदितत्वं भगवति सुदृढमनुसंहितं भवति । ततस्तत्ववादिनामेवानु-सन्धानसरणिः साधीयसीत्यवसीयते । तथाहि श्रूयते–

'गुणाः श्रुताः सुविरुद्धाश्च देवे सन्त्यश्रुता अपि नैवात्र शङ्का ।

'चिन्त्या अचिन्त्याश्च तथैव दोषाः श्रुताश्च नाज्ञैर्हि तथा प्रतीताः' इति ॥

'वेदे श्रुता गुणाः, लोके विरुद्धा अपि, देवे सन्ति । नच तेषां विरुद्धतया मिथ्यात्वमाशङ्कनीयम् । अश्रुता अपि ततश्चिन्त्याः सन्ति । नच यावन्तश्चिन्तयितुं शक्यन्ते रमादीनां तावन्त एव । किन्तु अचिन्त्याश्च तथैव सन्ति, यथा श्रुताश्चिन्त्याश्च । नच देवे दोषाः श्रुताः, नापि चिन्त्याः सन्ति । किम्पुनरचिन्त्याः । अज्ञैर्हि श्रुता इति प्रतीताः, ननु ज्ञानिनाम्' इति तत्वप्रदीपे ॥

श्वादिषु तस्करादिषु च भगवान् तत्तन्नाम्ना सन्निधाय तत्तत्स्वभावानुगुणं तांस्तान् भावान् प्रेरयतीति चोक्तं भवति । एतदप्युक्तम्–**'तथ् सृष्ट्वा तदेवानुप्राविशत्'** इति ॥

तदेवमाचार्याभिमतं तत्ववादानुगुणं तैत्तिरीयशतरुद्रियस्य किमपि नूतनमदूष्यं भाष्यमिदमिदानीमुपस्थाप्यते । वस्तुतस्तु नेदमाचार्यगोविन्देन प्रणीतम् । लिपिकारोऽयम् । नारायणप्राणशिवा एव तस्मिन् सन्निधायेदं भाष्यं प्रणिन्युरिति तु तथ्यम् । तेन तेषामेव पादयोरिदमुपहरणमर्प्यते ॥

पाठभेदसंयोजनक्रमः

अयमत्र पाठक्रमः । तैत्तिरीयशाखावलम्बिनो वयमिति, तैत्तिरीयाणां शतरुद्रियमेव प्रायः कर्णाटे चाऽन्ध्रद्रमिळयोश्च प्रचलितमिति तदेवात्र प्रथममुपास्थाप्यत सह च विस्तृतेन गोविन्दभाष्येण । ततश्च विशेषतो महाराष्ट्रदेशे प्रचलितं शुक्लयजुर्वेदीयं पाठद्वयम्–काण्वसंहितागतं माध्यन्दिनसंहितागतं च । विरळतया कर्णाटकेऽपि सन्ति काण्वाः । तैत्तिरीयशतरुद्रियस्यानयोश्च यत्रक्वच पाठभेदः तन्मूलश्चार्थभेदः, तत्र यदि अपूर्वं वेदार्थमधिजिगांसमाना अद्यापि दिष्ट्या भवेयुस्तर्हि तेषामुपकृतये स्यादिति सङ्क्षिप्ता काचन टिप्पणी चापि संयोजिता ॥

ततः गुर्जरसौराष्ट्रयोः, महाराष्ट्रेऽपि नागपुर-नासिकप्रभृतिस्थलेषु तत्रतत्र प्रचलितेति ज्ञायमानायामद्यापि सकलशाखापारगैराहिताग्निभिरनुष्ठीयमानेति श्रूयमाणायां मैत्रायणीयसंहितायामुपलब्धः पुनरत्यपूर्वपाठसन्दृब्धः शतरुद्रियपाठः । इतरशाखास्वपठितानामपूर्वमन्त्राणां तत्रोपलब्धेः किञ्चिदिव विस्तृता च टिप्पणी तत्र समयोजि ॥

अन्ते च कठानां कपिष्ठलकठानां च सम्प्रदायागतः शतरुद्रियपाठः सटिप्पणः । **'ग्रामेग्रामे काठकं च कालापकं च प्रोच्यते'** इति पतञ्जलिवचनेन ज्ञायते यत् तस्मिन् काले काठकानां शाखा सर्वत्र प्रचलिताऽऽसीदिति । सम्प्रति तु शाखद्वयावलम्बिनोऽपि लुप्तप्राया एवेति ज्ञायते । अथाप्यपूर्वस्तयोः पाठ इति सोऽप्यत्रान्ते न्यवेश्यत, प्राचां विद्यावैशारद्यं किञ्चिदिवावार्ञ्चोऽपि परिभावयन्तु चक्षुषी उन्मील्येति ॥

स्वराङ्कने शाखाभेदेन भेदाः

स्वराङ्कनप्रकारेऽपि शाखाभेदेन बहुधा भेदा भवन्ति । अध्येतॄणां सौकर्याय किञ्चिदिवात्र प्रस्तूयते । तैत्तिरीयाणां तावदयं स्वराङ्कनक्रमः प्रचलितः–

हरिः ओा४म् ॥ इ॒षे त्वो॒र्ज्जे त्वा॑ वा॒यव॑ः स्थोपा॒यव॑ः स्थ दे॒वो व॑ः सवि॒ता प्रार्प्प॑यतु॒ श्रेष्ठ॑तमाय॒ कर्म्म॑ण॒ आ प्या॑यध्वमघ्निया देवभा॒गमूर्ज्ज॑स्वती॒ः पय॑स्वतीः प्र॒जाव॑तीरनमी॒वा अ॑य॒क्ष्मा मा व॑ः स्ते॒न ई॑शत॒ माघश॑ꣳसो रु॒द्रस्य॑ हे॒तिः परि॑ वो वृणक्तु ध्रु॒वा अ॒स्मिन् गोप॑तौ स्यात ब॒ह्वीर्य्यज॑मानस्य प॒शून् पा॑हि ॥ १ ॥

अधस्तिर्यग्रेखा अनुदात्तमाह । यथा–**इ॒षे** । उपरि ऊर्ध्वरेखा स्वरितमाह–**कर्म्म॑णे** । अनुदात्तात् पर उदात्तः, स्वरितात् परः प्रचय इति न तयोः पृथग् रेखाङ्कनम् । ऋग्वेदेऽप्येवम् ॥

✲ ✲ ✲

काण्वानामप्येवमेव रेखाङ्कनम्–

हरिः ओ३म् ॥ इ॒षे त्वो॒र्ज्जे त्वा॑ वा॒यव॑ स्थ । दे॒वो वः॑ सवि॒ता प्रार्प्प॑यतु॒ श्रेष्ठ॑तमाय॒ कर्म्म॑णे ॥ १ ॥

आप्या॑यध्वमघ्न्या॒ इन्द्रा॑य भा॒गं प्र॒जाव॑तीरनमी॒वा अ॑य॒क्ष्माः । मा व॑ स्ते॒न ईशत॒ माघश॑ꣳसः ॥ २ ॥

ध्रु॒वा अ॒स्मिन् गोप॑तौ स्यात ब॒ह्वीः । यज॑मानस्य प॒शून् पा॑हि॒ वसोः॑ प॒वित्र॑मसि ॥ ३ ॥

नात्र कोऽपि रेखाङ्कने विशेषः । सर्वं पूर्ववदेव सर्वत्र । तत्रैको मन्त्रः । अत्र मन्त्रत्रयं बभूव । तेनापूर्वं छन्दोऽनुसन्धानं भवति । प्रथममन्त्रे बृहतीत्रयं याजुषम् । बृहती पङ्क्तिरनुष्टुब् वा । द्वितीये त्रिष्टुप्त्रयम् । तृतीये त्रिष्टुप् च, बृहती च, उष्णिक् च । तैत्तिरीयपाठे तु **'इषे त्वा ऊर्जे त्वा'** इति विश्लेषेण चतुरधिकशताक्षरा उत्कृतिर्नामातिच्छन्दः ॥

***

अथास्ति कश्चिद् विशेषः स्वराङ्कने माध्यन्दिनानाम् । तथाहि स्वरिते तेषां कश्चन विशेषः । उदात्तात् परोऽनुदात्तः स्वरितो भवति । क्वचिदुदात्तगर्भः स्वरितो भवति । यथा **'सुवः॑'** इत्येतत् **'स्वः॑'** इति पठन्ति । **'त॒नुवा॑'** इत्येतत् 'तन्वा॑' इति । सोऽयमुदात्तगर्भः स्वरितः उदात्तपरश्चेत् पुनरनुदात्त एव भवति । यं सन्नतरमनुदात्ततरं चाऽहुः । सोऽयं निघातस्वरः अधस्तात् ‿ इति रेखाङ्कनेन सूच्यते । यथा–**'तया॑ नस्त॒न्वा॒ शन्त॑मया'** इति । यदि नोदात्तपरः सोऽयं स्वरितः॒ इत्यधोवक्ररेखया सूच्यते । यथा–**'यातुधा॒न्यो॒ऽध॒राचीः॑'** इति । काण्वास्तु–**'तया॑ नस्त॒न्वा॒ शन्त॑मया'**, **'यातुधा॒न्यो॑ऽध॒राचीः॑'** इत्येव लिखन्ति । तथाहि तेषामादिमो मन्त्रः–

हरिः ओ३म् ॥ इ॒षे त्वो॒र्ज्जे त्वा॑ वा॒यव॑ स्थ दे॒वो वः॑ सवि॒ता प्रार्प्प॑यतु॒ श्रेष्ठ॑तमाय॒ कर्म्म॑णा॒ आप्या॑यध्वमघ्न्या॒ इन्द्रा॑य भा॒गं प्र॒जाव॑तीरनमी॒वा अ॑य॒क्ष्मा मा व॑ स्ते॒न ईशत॒ माघश॑ꣳ सो ध्रु॒वा अ॒स्मिन् गोप॑तौ स्यात ब॒ह्वीर्य्यज॑मानस्य प॒शून् पा॑हि ॥ १ ॥

वस्तुतस्तु माध्यन्दिनानामतिविलक्षणः सम्प्रदायो भवति । तथाहि तेषां प्रतनः स्वराङ्कनक्रमः–

हरिः ओ३म् ॥ इषेत्त्वोर्ज्जेत्त्वा॑व्वायव॑स्स्थदेवोव॑ꣳसविताप्प्रार्प्प॑यतु॒श्श्रेष्ठ॑तमाय कर्म्म॑णऽआप्प्या॑यद्ध्वमग्घ्न्याऽइन्द्रा॑यभागम्प्रजाव॑तीरनमीवाऽअ॑यक्ष्मामाव॑स्तेनऽ ईशतमाघश॑ꣳसोद्ध्रुवाऽअस्मिन्न्गोप॑तौस्स्यातबह्वीर्य्यज॑मानस्यपशून्पा॑हि ॥ १ ॥

गणकयन्त्रे पुनरेतादृशं लिपिस्वराङ्कनं नातिसुकरमिति तदिह नाऽऽदृतम् । अधिकं याज्ञवल्क्यशिक्षायाः कात्यायनप्रणीतात् शुक्लयजुःप्रातिशाख्याच्चा-वगन्तव्यम् ॥

अत्र मन्त्रेऽशीतिरक्षराणि । तेन कृतिर्नामातिच्छन्दः ॥

***

मैत्रायणीयानां पुनर्महान् स्वराङ्कनक्रमभेदः । अस्मिन् सम्प्रदायेऽपि उपरि ऊर्ध्वरेखा उदात्तस्वरमवगमयति । अधस्तिर्यग्रेखाऽनुदात्तस्वरम् । यथा–**'इ॒षे॑'** इति । स्वरिताङ्कने पुनरितरविलक्षणः क्रमस्तत्र दृश्यते । तथाहि–

हरिः ओ३म् ॥ इ॒षे॑ त्वा॒ सुभू॒ता॑यु वा॒यं॑व॒ स्थ दे॒वो॑ व॒ः सवि॒ता॑ प्रा॑र्प्प॒यतु॒ श्रे॑ष्ठ॒तमाय॒ क॑र्म्मुणा आ॑प्या॒यध्वमघ्न्या दे॒वे॑भ्या॒ इ॑न्द्रा॒य भा॒गं॑ मा॑ व॒ स्ते॒नं॑ ई॒शत॒ मां॑घं॑श॒ꣳसो ध्रु॒वा॑ अ॒स्मिं॑न् गो॑प॒तौ स्यात ब॒ह्वी॑र्य॒जमानस्य प॒शू॑न् पा॒हि ॥ १ ॥

अस्मिन् सम्प्रदाये केवलं प्रचयस्य रेखाङ्कनं नास्ति । यत्र न कोऽपि रेखाविन्यासः स प्रचय इति निश्चयः । ऊर्ध्वाधोरेखाङ्कनेनोदात्तानुदात्तावपि निश्चितौ । स्वरितप्रभेदसूचनायैव केवलं बहवो रेखाविन्यासभेदा इतर-शाखासम्प्रदायविलक्षणा अत्रोपयुज्यन्ते । जात्योऽभिनिहितः, प्रश्लिष्टः, क्षैप्रः, तैरोव्यञ्जन इत्यादयो हि बहवः स्वरितस्य प्रभेदा भवन्तीति तत्र सङ्केतभेदोऽप्यनुसृतः प्रतनैः । आस्तां तावदियं स्वरप्रक्रिया । बालानां सुखबोधाय सङ्केतानां सुकरं विवरणं किञ्चिदिवात्र विविवरीषामः–

यत्र परस्तात् स्वरान्तरं न भवति, एकश्रुतिर्वा भवति तत्र पूर्वः स्वारोऽधोवक्ररेखाङ्कितो भवति । यथा– **'इ॒षे त्वा॒ सु॒भू॒ता॑यु॒'** इति । यथा वा– **'म॒हा॒दे॒वा॑य॒ धीमहि'** इति । यत्र परस्तादनुदात्तो भवति तत्र त्रिशूलाङ्कनम् । यथा– **'सु॒भू॒ता॒यु॒ वा॒य॑व॒ स्थ'** इति, **'श्रेष्ठतमाय क॑र्म्मु॒णा॒ आ॑प्या॒यध्वम्'** इति च । यथा वा– **'त॑न्नो॒ रु॒द्रः प्र॒चो॒द॑या॒त्'** इति ॥

सापवादोऽयं नियमः । क्वचिदन्यथाऽपि भवति । अनुस्वारविसर्गयोर्योगे अनुदात्तपरोऽपि वक्ररेखयैव सूच्यते । यथा– **'मा॑ व॒ स्ते॒न॑ ई॒शत'** इति, **'दे॒वे॑भ्यो॒ ह॒व्यं॑ऽ श॒मीष्व'**इति च । एवमेदोदन्तावपि स्वारौ । यथा– **'वृ॒त्र तू॑र्ये॒ यू॒यं॑म्', द्र॒प्सो॑ऽग्रे॒ पा॒हि'**, इति । यथा वा– **'ह॑स्ते॒ बि॒भ॑र्ष्य॑स्त॒वे'** इति, **'दै॑व्यो॒ भि॒षक्'** इति, **'न॑मो॒ रु॒द्रा॑य॒ च'** इति च । यत्र विवृत्तिस्तत्रापि । यथा– **'न॑म॒स्ते रुद्र म॒न्य॑व॒ उ॒तो'** इति, **'न॑म॒ आ॒शा॑वे॒ च'** इति च । एवमादयो विशेषास्तत्रतत्र प्रयोगतोऽवगन्तव्याः ॥

यत्र पुनरुदात्तगर्भः स्वारो भवति तत्राधस्तादर्धचन्द्राङ्कनं भवति । यथा– **'धा॒न्यमसि'** इति, **'घ॒र्म्मोऽसि'** इति । **'सं ते॒ त॒न्वा॒ तन्वः पृच्यन्ताम्'** इति च । यथा वा– **'न॑मा ऊ॑र्म्म्या॑य चावस्व॒न्याय च'** इति, **'स्रो॒त॒स्याय च'** इति च । इत्यलं स्वारविस्तारेण ॥

अस्मिन् सम्पाठे **'अग्निया'** इति विश्लेषेण षट्सप्ततिरक्षराणि । अति-धृतिरतिच्छन्दः ।

* * *

कठास्तु केवलमुदात्तस्वरमेव उपरि ऊर्ध्वरेखाङ्कनेन सूचयन्ति । तथाहि–

हरिः ओ३म् ॥ इषे॑ त्वोर्ज्जे॑ त्वा वाय॑वस्स्थोपाय॑वस्स्थ देवो॑ वस्सविता॑ प्रा॑र्प्पयतु श्रेष्ठतमाय क॑र्म्मणे । आ॑प्यायध्वमघ्न्या देवभागं प्रजा॑वतीरनमीवा॑ अयक्ष्मा॑ः । मा॑ वस्तेन॑ ईशत मा॑घशँसः प॑रि वो रुद्र॑स्य हेति॑र्वृणक्तु । ध्रुवा॑ अस्मि॑न् गौपतौ स्यात बह्वी॑र्य॑जमानस्य पशू॑न् पा॑हि य॑जमानस्य पशुपा॑ असि ॥ १ ॥

'अनुदात्तं पदमेकवर्जम्' (अ.सू.६.१.१५८) इति स्मरणात् उदात्तस्यावगमे इतरेषां स्वराणां परिज्ञानं प्रायः सुकरम् । तथाहि– **'न॑मस्ते रुद्र मन्य॑वे-'** इति । अत्र नकारस्वर उदात्तः । ततः **'उदात्तादनुदात्तस्य स्वरितः'** (८.४.६६) स्मरणादुदात्तात् पूर्वस्वरोऽनुदात्तः, उत्तरस्वरः स्वरित इति स्थितम् । तेन मकारस्वरः स्वरित इत्यायातम् । ते षष्ठ्यर्थोऽनुदात्तः । रुद्र इति आमन्त्रित-त्वात् सर्वानुदात्तः । तथाहि पाणिनिः– **'आमन्त्रितस्य च'** (८.१.१९) इति, **'ते मयावेकवचनस्य'** (२२) इति च । त्रयोऽप्यनुदात्तस्वराः प्रचयत्वमाप-द्यन्ते । प्रचय एकश्रुतिरिति चानर्थान्तरम् । स्वरितात् परेषामनुदात्ताना-मेकश्रुतिर्भवतीत्याह पाणिनिः– **'स्वरितात् संहितायामनुदात्तानाम्'** (१.२. ३९) इति । **'मन्य॑वे'** इत्येतत् मध्योदात्तं पदमित्यवगतम् । तेन आद्यनुदात्त-मन्तस्वरितं चेति स्फुटम् ॥

अथापि किञ्चिदिव सन्दिग्धमवशिष्यते । यथा– **से॒ना॒न्यै॑** । अत्रोदात्तगर्भः स्वरितः । आद्यौ द्वावप्यनुदात्तौ । तत्र कथं स्वरसूचनमिति? । तादृश-स्थलेष्वर्धचन्द्राकृतिमधोरेखां निक्षिपन्ति । यथा– **'स्वः'** । यथा वा– **'न॑मो हि॑रण्यबाहवे सेनान्ये दिशा॑ं च प॑तये न॑मः'** इति । अस्य च प्रचलितः स्वराङ्कनक्रमः –**नमो॒ हि॑रण्यबाहवे सेना॒न्यै॑ दि॒शां च॒ पत॑ये॒ नम॑ः'** इति ॥

अस्मिन् काठकपाठे प्रथमचरणे याजुष्यश्चतस्रोऽनुष्टुभः । द्वितीये त्रिष्टुब्द्वयम् । तृतीये च । चरमे प्रथमा त्रिष्टुप् । द्वितीया बृहती । तृतीया पङ्क्तिः ॥

* * *

कपिष्ठलकठसंहितायाः सर्वात्मना सम्प्रदायविच्छेदात् स्वराङ्कनक्रमो लुप्त एव । काठकसंहिताद्यनुसारेण तत्रापि स्वरानुसन्धानं करणीयमिति ॥

तथाहि कपिष्ठलकठानामाद्यो मन्त्रः–

ओम् नमो वासुदेवाय । इषे त्वोर्जे त्वा । वायव स्थोपायव स्थ । देवो वः सविता प्रार्प्पयतु श्रेष्ठतमाय कर्म्मणे । आ प्यायध्वमघ्न्या देवभागं प्रजावतीरनमीवा अयक्ष्माः । मा व स्तेन ईशत माघशंसः । परि वो रुद्रस्य हेतिर्वृणक्तु । ध्रुवा अस्मिन् गोपतौ स्यात बह्वीः । यजमानस्य पशून् पाहि । वसोः पवित्रमसि शतधारं वसूनां पवित्रमसि सहस्रधारम् ॥ १ ॥

प्राचीनादर्शे **'हरिः ओ३म्'** इत्यस्य स्थाने **'ओम् नमो वासुदेवाय'** इति पठ्यते । अस्मिन् नववाक्यो मन्त्रः । प्रथमे याजुषी गायत्री **'इषे त्वा ऊर्जे त्वा'** इति विश्लेषेण । द्वितीयेऽनुष्टुप् । तृतीये द्वे बृहत्यौ । पङ्क्तिश्चानुष्टुप् च वा । चतुर्थे द्वे त्रिष्टुभौ **'अघ्नियाः'** इति विश्लेषेण । पञ्चमेऽपि त्रिष्टुबेव । षष्ठे च सप्तमे च । अष्टमे बृहती । नवमे त्रिष्टुप् च भुरिक् जगती च (आसुरी अनुष्टुब् वा) । तदिदं वाक्यभेदप्रयोजनम् ।

अथ चायं स्वरसंयोजनेन सम्पन्नः पाठः–

हरिः ओ३म् । इ॒षे त्वो॒र्जे त्वा॑ । वा॒यव॑ स्थोपा॒यव॑ स्थ । दे॒वो वः॑ सवि॒ता प्रार्प्प॑यतु॒ श्रेष्ठ॑तमाय॒ कर्म्म॑णे । आ प्या॑यध्वमघ्न्या देवभा॒गं प्र॒जाव॑तीरनमी॒वा अ॑य॒क्ष्माः । मा व॑ स्ते॒न ई॑शत॒ माघशं॑सः । परि॑ वो रु॒द्रस्य॑ हे॒तिर्वृ॑णक्तु । ध्रु॒वा अ॒स्मिन् गोप॑तौ स्यात ब॒ह्वीः । यज॑मानस्य प॒शून् पा॑हि । वसोः॑ प॒वित्र॑मसि श॒तधा॑रं॒ वसू॑नां प॒वित्र॑मसि स॒हस्र॑धारम् ॥ १ ॥

एवं रुद्राध्यायेऽपि तैत्तिरीयाद्यनुसारेण स्वरा ऊहनीया इति दिक् ॥

विवृत्तिपरिभाषा

ननु केयं विवृत्तिर्नाम । या स्वारप्रक्रियाप्रसङ्गे पूर्वं प्रास्तावि । तदेतदुक्तं प्राचीनैः–

'द्वयोस्तु स्वरयोर्मध्ये सन्धिर्यत्र न दृश्यते ।
'विवृत्तिर्नाम सा ज्ञेया यऽईशेति निदर्शनम्' इति ।

सा चतुर्विधा भवति । तथाहि नारदीयशिक्षायाम्–

'ह्रस्वादिर्वत्सानुसृता वत्सानुसारिणी चाग्रे ।
'पाकवत्युभयह्रस्वा दीर्घवृद्धा पिपीलिका' इति ।

अयमर्थः–ह्रस्वादिर्दीर्घाग्रा विवृत्तिर्वत्सानुसृता नाम । तद् यथा– **'नम॑स्त॒ऽआयु॑धा॒य'**, **'मा न॒ऽआयु॑षि'**, **'नम॑ऽआ॒तन्वा॒नेभ्यः॑'**, **'नम॒ः शया॑नेभ्य॒ऽआसी॑नेभ्यश्च'**, **'नम॑ऽआ॒शवे॑ चाजि॒राय॑ च'**, **'नम॒ऽऊर्म्या॑य च'**, **'कृत्तिं॒ वसा॑न॒ऽआच॑र'** इत्यादयः वत्सानुसृता नाम विवृत्तयः । अथ दीर्घादि-ह्रस्वान्ता वत्सानुसारिणी नाम द्वितीया विवृत्तिः । तद् यथा–**'अ॒य॒क्ष्मं॑ꣳ सुम॒ना॒ऽअस॑त्'**, **'अ॒सौ यस्ता॒म्रोऽअ॑रु॒णः'**, **'रु॒द्राऽअ॒भितो॑ दि॒क्षु'**, **'उ॒तैनं॑ गो॒पाऽअ॑दृशन्'**, **'रथिभ्यो॑ऽअ॒रथेभ्य॑श्च वो॒ नम॑ः'**, **'रु॒द्राऽअधि॒ भूम्या॑म्'**, **'तेभ्यो॒ नमो॑ऽअस्तु'** इत्यादिः । उभयह्रस्वा पाकवती नाम विवृत्तिः । तद् यथा– **'अ॒रु॒णऽउ॒त ब॒भ्रुः'**, **'याश्च॑ ते॒ हस्त॒ऽइष॑वः'**, **'अथो॒ यऽइ॑षु॒धिः'**, **'नि॒ष॒ङ्गिणऽ-इषुधि॒मते॑'**, **'नम॑ऽइषुमद्भ्यः॑'** इत्याद्या । उभयदीर्घा पिपीलिका नाम चतुर्थी विवृत्तिः । तद् यथा–**'द्रापे॒ऽअन्ध॑सस्पते'**, **'ऐ॒ल॒बृ॒दाऽआ॑यु॒र्युधः'** इत्याद्या ॥

तैत्तिरीयप्रपाठके चेयं विवृत्तिः स्फुटं'ऽ'इति चिह्नसंयोजनेन प्रदर्शिता । अस्मिन् विषये अधिगन्तव्याः प्रमेयविशेषास्तु अस्मत्कृतायां श्रीमध्वविजय-टीकायां तत्वचन्द्रिकायां द्रष्टव्याः ॥

वर्णभेदेन पाठभेदः

तैत्तिरीयसंहिताया लेखनक्रमो देशभेदेन द्विविध उपलभ्यते । एका विधा महाराष्ट्रे प्रसिद्धा । अपरा दाक्षिणात्येषु । तथाहि शषसवर्णेषु परेषु तत्पूर्वा वर्गीयाः प्रथमवर्णास्तथैव लिख्यन्ते महाराष्ट्रे । तद् यथा– **तत् सवितुः, गृत्समदः, संवत्सरः, ऋक्सामाभ्याम्, क्षी(क्षी)रम्, अप्सरसः**– इत्यादि । दाक्षिणात्याः पौष्करसादिमतमवलम्बन्ते । तत्पक्षे शषसेभ्यः पूर्वो वर्गीयः प्रथमो वर्णो द्वितीयवर्णतया विपरिणमते । तद् यथा–**तथ् सवितुः, गृथ्समदः, संवथ्सरः, ऋख्सामाभ्याम्, ख्षीरम्, अफ्सरसः**– इत्यादि ॥

तथाहि वार्त्तिकम्–**‘चयो द्वितीयाः शरि पौष्करसादेः’** (अ.सू.८.४.४८) इति । व्याचख्यौ च वामनः काशिकायाम्–**‘चयः** (चटतकपाः) **द्वितीयाः** (छठथखफाः) **भवन्ति शरि** (शषसेषु) **परतः पौष्करसादेराचार्यस्य मतेन । तकारस्य थकारः– वथ्सः । ककारस्य खकारः ख्षीरम् । पकारस्य फकारः– अफ्सराः’** इति । कथं पौष्करसादिः? आचक्षते–पुष्कराख्ये तीर्थे सीदतीति पुष्करसात् । तस्यायमपत्यं पौष्करसादिरिति ।

सोऽयं प्राचीनः सम्प्रदायः । तस्मादत्रापि तथैव मुद्रितम् । तेनात्र क्षीरं ख्षीरं भवति । वृक्षो वृख्षो भवति । अस्मिन् पक्षे कषयोगेन क्ष(क्ष)कारो न भवत्येव । किन्तु ख्षकार एव । एवमन्यत्राप्येतादृशाः प्रयोगा अवगन्तव्याः ॥

आद्यन्तयोरोङ्कारः

वेदाध्ययन आद्यन्तयोरोङ्कार उच्चारणीय इति सम्प्रदायः । यदाह मनुः–

‘ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा ।
‘स्रवत्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्यते’ इति ।

अन्यत्र च–

‘अध्यायस्य मुखे चान्ते भूत्वा विद्वानतन्द्रितः ।
‘संरक्षणाय वेदानामोङ्कारं तूच्चरेत् सदा ॥

‘स्रवत्यादावनुक्ते च तस्यान्ते तु विशीर्यते ।
‘आद्यन्तप्रणवौ तस्य स्यातामङ्गानि वै ततः’ इति,
‘वेदस्योपक्रमे विद्वानवसानेऽप्यतन्द्रितः ।
‘उच्चरेत् प्रणवं ब्रह्म रक्षायै छन्दसां स्फुटम्’ इति च ।

पाणिनिरप्याह–**‘ओमभ्यादाने’** (८.२.८७) इति । **‘अभ्यादानं प्रारम्भः । तत्र य ओम्शब्दः तस्य प्लुतो भवति । ओ३म् अ॒ग्निमी॑ळे पु॒रोहि॑तम्’** इति जयादित्यः । असमग्रमिदं पाणिनीयं वचः । तत्र चाऽद्यन्तयोर्मात्राभेदः तैत्तिरीयशाखायां सम्प्रदायविद्भिरभिधीयते । तथाह्याचक्षते–

‘प्रारम्भकश्चतुर्मात्रो वेदस्थः स्यात् तदर्धकः ।
‘अध्यायान्त्योऽनुवाकान्त्यः कर्माद्यश्च त्रिमात्रकः’ ॥

तथाच वेदारम्भे चतुर्मात्र ओङ्कारः–**‘ओ४म्’** इति । अध्ययनान्ते कर्मारम्भे च त्रिमात्रः–**‘ओ३म्’** इति । ग्रन्थमध्ये द्विमात्रो दीर्घ ओङ्कारः–**‘ओमित्येतदक्षरमुद्गीथमुपासीत’** इति ।

ओङ्कारस्य प्राथम्यमवगतम् । ततोऽपि प्रथमं किञ्चिदस्ति । तदाहुः–

‘सविसर्गं हरिपदं प्रणवात् पूर्वमिष्यते’ इति ।

तदपि न ‘हरिरोम्’ इति संश्लेषेण । किन्तु विश्लेषेणैव पठनीयम् । एतदप्युक्तम्–

‘हरिपदे विसर्गस्य न सन्धिः प्रणवोत्तरे’ इति ।

तथाच वेदाध्ययनारम्भे–**‘हरिः ओ४म्’** इति चतुर्मात्रः प्रणवः, अन्ते च–**‘हरिः ओ३म्’** इति त्रिमात्रः प्रणव उच्चारणीय इति स्थितम् ।

उपपन्नं सर्वमेतत् । अथापि कः स्वरक्रमः? ओङ्कारस्य चोदात्तः स्वरः । तथाह्याहुः–**‘यजुः प्रणव उच्चः स्यात्’** इति । उच्च इत्युदात्त इत्यर्थः ।

हरिशब्दश्चाद्युदात्तः । तेन **'ह॒रिः ओम्'** इत्यायातम् । परन्तु सम्प्रदाये कञ्चन विशिष्टं स्वरक्रमं पश्यामः । त्रिमात्रे तु यथाश्रुतम्– **'ह॒रिः ओ३म्'** इति । चतुर्मात्रे पुनरोङ्कारे सर्वानुदात्तं हरिपदं पठन्ति–**'ह॒रि॒ः ओ४म्'** इति । कारणं तु मृग्यं भवति । सम्भाव्यते चायमाशयः स्यादिति–**'ओमशेषगुणाधारः'** इत्योङ्कारो भगवतो गुणपूर्णतामाह । उदात्तस्वरः पूर्णतायां निरवधिकत्वमाह । **'उदात्तस्योच्चता तथा'** इति स्मरणात् । हरिरिति निघातः पुनरवधारणार्थः । **'दार्ढ्यमेवानुदात्तार्थः'** इति स्मरणात् । तत्र प्रथमेनानुदात्तेन ओङ्कारार्थमवधारयति । हरिरेव ओम् सर्वगुणपूर्ण इति । तस्मात् हरिरेव सर्ववेदार्थ इति द्वितीयोऽनुदात्तः हरेरेव सर्ववेदार्थत्वमवधारयति । पौराणं वचोऽप्येतमर्थमेव स्फुटमाह–

'वेदाक्षराणि यावन्ति पठितानि द्विजातिभिः ।
'तावन्ति हरिनामानि पठितानि न संशयः' इति ॥

एतदर्थमेवाऽदौ हरिनामस्मरणम् । रुद्राध्यायेऽपि उपक्रमोपसंहारयोः **'हरिः ओम्'** इत्येवोच्यत इति सर्वमतिसुन्दरम् ॥

✻ ✻ ✻

दाक्षिणात्यानां स्वराङ्कनक्रमः

दाक्षिणात्येषु स्वराङ्कनक्रमोऽपि किञ्चिदिव विलक्षणो दृश्यते । ते क्वचिद् व्यञ्जनेऽपि स्वरमङ्कयन्ति । तद् यथा– **प्या॒य॒ध्व॒म्** । **अ॒गा॒त्** । **ब॒र्हिः** । **व॒र्षवृ॑द्धमिति॑ व॒र्ष+वृ॒द्धम् । अ॒य॒ज॒न्**– इत्यादि ।

क्वचित् स्वरितेऽपि । तद्यथा– **ज॒म्भयन्॑** इति ।

अत्रैवं समादधते तद्विदः–'उदात्तादिभिः स्वरधर्मैः युक्तेभ्योऽज्भ्यः पूर्वं श्रूयमाणं व्यञ्जनं यथा तदुत्तरस्वरधर्मेण रज्यते तथैव ततः परं श्रूयमाणं व्यञ्जनमपि घण्टानिर्ह्रादवत् तत्तत्स्वरधर्मेणानुरज्यते । तस्य स्वाभाविकत्वं

मत्वा महाराष्ट्रिये पाठे तादृशे व्यञ्जने स्वराङ्कनं न विधीयते । दाक्षिणात्यपाठे तूत्तरवर्तिनो व्यञ्जनस्यानुरक्तत्वद्योतनाय तत्र स्वराङ्कनं विधीयते' इति ।

साधुः समाधिः । युक्तं च तथा स्वराङ्कनम् । तथाऽपि नायं क्रमः सम्प्रति प्रचलित इति पदपाठेष्वधीतिनां विभ्रमो मा भूदिति महाराष्ट्रियः स्वराङ्कनक्रम एवात्रानुसृतः । तद् यथा–**प्या॒य॒ध्व॒म्** । **अ॒गा॒त्** । **ब॒र्हिः** । **व॒र्षुवृ॑द्धमिति व॒र्ष+वृ॒द्धम् । अ॒य॒ज॒न्**– इत्यादि ।

✻ ✻ ✻

तैत्तिरीयाणां पदपाठेष्वितिकरणम्

पदपाठेष्वितिकरणस्थानान्येवं प्रतनाः पर्यजीगणन्–

'प्रग्रहेङ्ग्योपसर्गान्त इति स्यादप्यसांहिते' इति ।

अयमर्थः– संहितानिमित्तः पाठः सांहितः, तद्भिन्नेऽसांहिते पदपाठाद्यध्ययने प्रग्रहस्य इङ्ग्यस्य उपसर्गस्य चान्ते इतिशब्दोऽपि योजनीयः स्यात् । अवेदपठितोऽपीतिशब्दः पठनीयः स्यादित्यर्थः । अथ के प्रग्रहाः? ये तैत्तिरीयप्रातिशाख्ये चतुर्थेऽध्याये **'अथ प्रग्रहाः'** (४.१) इत्यारभ्याऽ चतुःपञ्चाशतः सूत्रेभ्यः पठिताः । तेषामनार्षेतिपरत्वं च तत्रैव– **'इतिपरोऽपि'**(४.४) इति । प्रगृह्यन्ते पृथक् पठ्यन्ते न सन्धीयन्त इति प्रग्रहाः । द्विवचनान्ता ईदूदेतः, अमी इति बहुवचनान्तोऽपीत्, अस्मे, त्वे, सम्बुद्ध्यन्तो निपातान्तश्च ओत्– एते प्रग्रहसञ्ज्ञा भवन्तीति सङ्ग्रहः ॥

यथा ईदेतोः– **उ॒क्थे अव्य॑थयन्ती स्तभ्नीता९ शाक्वरैव॒ते साम॑नी** (४.४.२) । **उ॒क्थेइति॑ । अव्य॑थयन्ती॒इति॑ । साम॑नी॒इति॑ ।**

यथा वा एतः–**'द्वे ह्ये॑ते देवते॑'** (२.१.९) । **द्वेइति॑ । ए॒तेइति॑ । दे॒वते॒इति॑ ।** यथा वा–**'य॒न्त्रे स्थः॑'** (१.१.११) **य॒न्त्रेइति॑ । स्थ॒ः ।**

ऊतो यथा–**'मधु॑श्च॒ माध॑वश्च॒ वास॑न्तिकावृ॒तू'** (४.४.११) **ऋ॒तू इति॑।**

अस्मे त्वे यथा–**'अ॒स्मे रा॒यस्त्वे राय॑:'** (१.२.५)। **अ॒स्मेइति॑। राय॑:। त्वेइति॑। राय॑:।**

सम्बुद्ध्यन्तस्य ओतो यथा–**'विष्णो॑ ह॒व्यं र॑क्षस्व'** (१.१.४)। **विष्णो॒इति॑। ह॒व्यम्। र॒क्ष॒स्व॒।**

निपातान्तो यथा–**'उ॒तो त॒ इष॑वे॒ नम॑:'** (४.५.१.१)। **उ॒तोइति॑। ते॒। इष॑वे। नम॑:।**

यथा वा–**'अथो॒ ये अ॑स्य॒ सत्वा॑नः'** (४.५.१.९)। **अथो॒इति॑। ये। अ॒स्य॒। सत्वा॑नः।** **'मो ए॑षा॒म्'** (४.५.१०.१) **मो॒इति॑।** एवमन्यदपि प्रातिशाख्यादितोऽवगन्तव्यम्।

***

अथ कानीङ्ग्यानि? विभागवन्ति पदानि इङ्ग्यानि, इङ्ग्यते विभागेन चाल्यत इतीङ्ग्यमिति निर्वदन्ति।

यथा–**वा॒यव॑: स्थोपा॒यव॑: स्थ दे॒वो व॑: सवि॒ता प्रार्प्य॑यतु॒ श्रेष्ठ॑तमाय॒ कर्म॑णे'** (१.१.१)। अत्र उपायव इति श्रेष्ठतमायेति चेङ्ग्ये द्वे पदे–**उ॒पा॒य॒वइत्यु॑प+आ॒यव॑:। श्रेष्ठ॑तमा॒येति॒श्रेष्ठ॑+त॒मा॒य॒।**

यथा वा रुद्रप्रपाठके–**'बा॒हुभ्या॑मु॒त ते॒ नम॑:'** (४.५.११)। **'बा॒हु॒भ्या॒मिति॑-बा॒हु+भ्या॒म्।** **'स॒ह॒स्रा॒ख्षाय॑ मी॒ढुषे॑'** (४.५.१.९)। **'स॒ह॒स्रा॒ख्षायेति॑-सह॒स्र+अख्षाय।**

अयमत्र विशेषः– प्रग्रहोपसर्गयोरन्त इतिकरणं भवति। इङ्ग्ये तु पदस्य द्विरुच्चारणात् पूर्वोच्चारान्ते मध्ये एवेतिकरणम्। नतु प्रतृण्णान्ते। एतदप्युक्तम्–

'प्रग्रहेङ्ग्योपसर्गाणामितिशब्दः प्रयुज्यते।
'परस्तात् पदकालेऽयं पूर्वोच्चारण एव हि' इति।

***

अथोपसर्गाः। ते **'प्रादयः'** (अ.सू.१.४.५८) इति प्रसिद्धाः। तेषां प्रसङ्ख्यानं तु बहुधा भवति। एकान्नविंशतिरुपसर्गा इति तैत्तिरीयाः–

'प्रोपावाऽपर्यधि व्युत्सु न्यन्वपाप्यत्यभि प्रति।
'परा निः सम् नवदशाप्युपसर्गाः स्युरेव हि' इति॥

तैत्तिरीयाणामेव नवदश। वाजसनेयिनस्तु 'दुर्'योगेन विंशतिमुपसर्गानाचक्षते। तथाहि कात्यायनः–

'परोपापावप्रप्रतिपर्यन्वप्यत्यध्याङ्सम्निर्दुरुन्निविस्वभि'
(वाज.प्राति.६.२४) इति॥

अन्यत्राप्युक्तम्–

'विंशतेरुपसर्गाणामुच्चा एकाक्षरा नव।
'आद्युदात्ता दशैतेषामन्तोदात्तस्त्वभीत्ययम्' इति।

विंशतिश्च निस्, दुस् इति द्वे चेति द्वाविंशतिरिति पाणिनीयाः। अवशिष्टानामितिकरणेऽनुपयोगादेकान्नविंशतिमेवोपसर्गांस्तैत्तिरीयाः पठन्ति।

प्रातिशाख्ये तु अन्यादृशमेव सङ्ख्यानमुपलभ्यते–

'आप्रावापोपाभ्यधिप्रतिपरिविनीत्युपसर्गाः' (तै.प्राति.१.१५) इति। अत्रैकादशैवोपसर्गाः परिगणिताः।

शङ्कामहे सूत्रेऽक्षरलोपः सञ्जातः स्यादिति। **'यजुर्वेदविषये एतावन्त एवेति मन्तव्यम्'** इति व्याख्यानमपि भ्रान्तिमूलम्। आधिकानां स्फुटमुपलम्भात्, तत्रेतिकरणाच्च।

एवं नवदशसूपसर्गेषु अष्टावेकाक्षरा उदात्ताः। अवशिष्टेषु अभिरेकोऽन्तोदात्तः। अपरे दश आद्युदात्ताः । सरस्वतीकण्ठाभरणे चैतदाह भोजराजः–**'उपसर्गाश्चाभिवर्जम्'** (८.३.१९३) इति।

तथाचामी इतिकरणीया उपसर्गाः–

प्र। आ। वि। उत्। सु। नि। निर्। सम्– इत्यष्टावेकाक्षरा उपसार्गाः।

उप। अव। परि। अधि। अनु। अप। अपि। अति। प्रति। परा– इति दशोपसर्गा आद्युदात्ताः। एकोऽन्तोदात्तः**–अभि–** इति।

तेषामुदाहरणानि यथा–

प्र= **'प्र मुञ्च धन्वनस्त्वम्'** (४.५.१.१०) **प्रेति। मुञ्च। धन्वनः। त्वम्।**

आ= **'आ प्यायध्वमघ्नियाः'** (१.१.१) **ऐति। प्यायध्वम्। अघ्नियाः।**

यथा वा– **'कृत्तिं वसान आ चर पिनाकं बिभ्रदा गहि'** (४.५.११.१०) **कृत्तिम्। वसानः। एति। चर। पिनाकम्। बिभ्रत्। एति। गहि।**

वि = 'शतवल्शं वि रोह' (१.१.२) । अत्र शतवल्शमितीङ्ग्यम् । **शतवल्शमितिशत+वल्शम्। वीति। रोह।**

उत्= 'त्वा बाहुभ्यामुद्यच्छे' (१.१.२)। **त्वा। बाहुभ्यामिति बाहु+भ्याम्। उदिति। यच्छे।**

सु= 'अग्ने त्वं सु जागृहि वयं सु मन्दिषीमहि' (१.२.३) । **अग्ने। त्वम्। स्विति। जागृहि। वयम्। स्विति। मन्दिषीमहि।**

नि= 'अस्मन्नि धेहि तम्' (४.५.१.१५)। **अस्मत्। नीति। धेहि। तम्।**

निर्= 'अग्नये जुष्टं निर्वपामि' (१.१.४) । **अग्नये। जुष्टम्। निरिति। वपामि।**

सम्= 'सुसम्भृता त्वा सम्भरामि' (१.१.२)। **सुसम्भृतेतिसु+सम्भृता। त्वा। समिति। भरामि।**

उप= 'सुपत्नीरुप सेदिम' (१.१.१०) **सुपत्नीरितिसु+पत्नीः। उपेति। सेदिम।**

अव= 'अवैषां हेड ईमहे' (४.५.१.७)। **अवेति। एषाम्। हेडः। ईमहे।**

परि= 'अयस्मय्या परि भुज' (४.५.१.१२) **अयस्मय्या। परीति। भुज।**

अधि= 'अध्यवोचदधिवक्ता' (४.५.१.६) **अधीति। अवोचत्। अधिवक्तेत्यधि+वक्ता।**

अनु= 'अन्विहि देवङ्गममसि' (१.१.२) । **अन्विति। इहि। देवङ्गममिति देवं+गमम्। असि।**

अप= 'धृष्टिरसि ब्रह्म यच्छापाग्ने' (१.१.७)। **धृष्टिः। असि। ब्रह्म। यच्छ। अपेति। अग्ने।**

अपि='आ देवानामपि पन्थामगन्म' (१.१.१४) । **ऐति। देवानाम्। अपीति। पन्थाम्। अगन्म।**

अति='अग्निस्ते तनुवं माति धाक्' (१.१.८)। **अग्निः। ते। तनुवम्। मा। अतीति। धाक्।**

प्रति= 'प्रति त्वा पृथिवी वेत्तु' (१.१.६)। **प्रतीति। त्वा। पृथिवी। वेत्तु।**

परा= 'परा ता भगवो वप' (४.५.१.१०) । **परेति। ताः। भगवइतिभग+वः। वप।**

अभि= 'गिरिशन्ताभि चाकशीहि' (४.५.१.३)। **गिरिशन्तेति गिरिं+शन्त। अभीति। चाकशीहि।**

उभयोर्योगे परस्येतिकरणम्–**'तेजो॑ऽसि॒ तेजो॒ऽनु॒प्रेहि॒'** (१.१.१०) । **तेज॑ः । अ॒सि॒ । तेज॑ः । अनु॑ । प्रेति॑ । इ॒हि॒ ।**

संहितान्ते चेतिकरणं न भवति–

'अ॒न्तरि॑क्षे भ॒वा अधि॑' (४.५.११.२) । **अ॒न्तरि॑क्षे । भ॒वाः । अधि॑– ।**

यथा वा–**'स्याम॑ ते सु॒मताव॒पि'** (१.४.४६) । **स्याम॑ । ते॒ । सु॒म॒ताविति॑सु+मतौ । अपि॑– ।**

अधिकं प्रातिशाख्यादितो गुरुमुखादवगन्तव्यमित्यलम् ॥

* * *

तुङ्गातीरे पाठप्रवचनम्, ग्रन्थनिर्माणं च

अस्ति कश्चिदणुग्रामस्तुङ्गातरङ्गिणीतीरे 'बाळगारु'नामधेयः । यः किल तुङ्गातनुतरङ्गालिङ्गनसमेधितशीतलपवनान्दोलितशिरस्तरुनिकुरम्बः प्रकृतितः स्निग्धः समुल्लाघयति मनांसि च हृदयानि च । यत्र तुङ्गैव परमाकर्षणं सरसा सुधामधुरघनरसा, या च किलाहो शैलूषीव योषा विहितविविधवेषा हृतकृतमज्जनसज्जनतनुमनोमलदोषा कूलगतसालजालभूषा जनितजनतोषा 'गुळुगुळु'घोषा, क्वचिदपि शान्तावेशा, क्वचिदपि दर्शितरोषा, निदाघे सलिलगर्भादुद्गतैरदभ्रैर्विषमशिलाखण्डैर्निम्नोन्नता च गाधसलिला च पल्वलति तत्रतत्र निष्कम्पनीरा । वर्षासु क्वचित् पुनरावीच्यवयःपरिणतचापला चोक्षा तरुणीव परिनृत्यन्ती विलसति । क्वचिदप्यगाधसलिलाऽन्तःकबळित-द्विरदकल्पशिलाखण्डकलिला घनघनघोषा, क्वचित् कर्दमकडारा, क्वचित् प्रचलाकिमेचका चकास्ति । क्वचिदपि सर्वङ्कषा पुनरुद्वेलाभिरुत्कलिकाभि-

राप्लावितग्रामा सन्त्रासितजनस्तोमा भैरवरवा भैरवीव भीषणा स्वैरमाक्रीकृत्य परितः पल्लीं गुलगुधाकरोति । मुखरयति च कविमनांसि ॥

यत्र च कूजद्विजकुलाकुला कुलायद्रुमा अनुष्ठाननिष्ठुरजनगेहाश्च । ज्ञातय इव बन्धुरक्षणसमुत्सुका युवानः । व्रतनिष्ठा द्विजातय इव मुक्ताहारा युवतयः । कौरव इव स्वकुलक्षयरतो बन्धुजनः । राजन्य इव सदाचारनिरतो द्विजव्रातः । जाङ्गलिक इव विषयापनचणो प्रमदागणः । गृहमेधिन इव स्वगृहकेदाररताः कृषीवलाः । सर्वेऽपि समृद्धभोगाः स्वादुङ्कारं भुञ्जते ॥

अस्ति तत्र कश्चन मठ उपतुङ्गम् । तपोवनतुल्यः परिसरः । मङ्गलतरङ्गया स्वसन्निधानपावितजङ्गमाजङ्गमया नमदघभङ्गया द्विगुणितपावित्र्यः पुण्यो धन्यश्च धरणीभागः । यं किल श्रीमदक्षोभ्यतीर्थश्रीचरणसंस्थानमधिरूढाः कर्मन्दिवर्याः स्वोपास्यमूर्तिं मकारवाच्यं श्रीनरसिंहमुपतिष्ठमाना अध्यावसन् । अध्युष्य चातितमामिह पावित्र्यं समपादयन् । सम्प्रति श्रीपीठमारूढाः श्रीरघुभूषणतीर्थश्रीचरणाः प्रियविद्याः सहृदयतमाः । स्वमठसविधे गतं गलितं मुख्यप्राणमन्दिरं समुद्धृत्य, निर्माय च नूतनं शिलामन्दिरम्, कृतप्राणप्रतिष्ठा इति सम्प्रति सम्पादितप्राणानुग्रहविशेषा इति महत्तरमिदमानन्दपदम् । माननीयास्ते स्वमठे तैत्तिरीयरुद्रप्रपाठकपाठनकर्मणि दिष्ट्या मां न्ययोजयन् परारि ॥

दिष्ट्या च बहवो जिज्ञासवो 'बेङ्गळूरु'नगरादिहाऽगत्यास्मिन् संस्कृतप्रवचने भागं निरूहुः । सहैव पाठप्रवचनेन भाष्यरचनमपि सम्पन्नम् । 'बाळगारु'-मठाधीशानामाराध्यदेवता च शिवान्तर्यामी नरसिंहः । तत्र कश्चिदन्तेवासी 'यशवन्त'पुरवासी सुधीन्द्रनामधेयो मामुपेत्य विज्ञापयामास– 'आचार्यपाद, 'बाळगारु'मठे आराध्यदैवतस्य नरपञ्चाननस्य सन्निधाने रुद्राध्ययनं सम्पन्नमिति महानयं सुयोगः । महदिदं भागधेयं नः । प्रसङ्गस्यास्य चिरस्मरणार्थं काचन नरहरिस्तुतिस्तत्रभवता प्रणीय चास्माकं प्रदेया । याऽस्माभि-र्नित्यपारायणायोपयुज्येत' इति ॥

नृहरिस्तवाविर्भावः

निर्विचिकित्समोमित्यङ्गीचकारि मया । ततः परं द्वित्रेषु दिनेषु बहुधा प्रयतनेऽपि नैकमपि पद्यं निरपद्यत । ततश्च 'बेङ्गळूरु'नगरं प्रति प्रातिष्ठे । अथैकस्यां रात्रावकस्माद् विद्युद्दीपश्चक्षुर्निमीलयामास । को जानीते भगवतो लीलाम्? दिदीपेऽन्तर्दीपः । सपदि तैलदीपस्य पुरतः श्वेतपत्रं न्यक्षिपम् । तदुपरि च हस्तविन्यस्तां लेखनीं व्यापारयम् । लेखनी सरसं प्रससार उपरि पत्रस्य । अहो पदानि संस्पर्धयेवाहमहमिहकयाऽऽगत्य ननृतुः पत्ररङ्गे । अनायासेन नैकम्, किन्तु पञ्चषाणि पद्यानि निरपद्यन्त । नृहरिरिव तस्य स्तवोऽप्यहो आविर्बभूव । अपूर्वोऽयमनुभवः, यद् विना बुद्धिव्यापारं पद्यकदम्बकं सञ्जाघटीतीति, ऋङ्मन्त्रा इव वेददर्शिनाम् । तर्कये तदिदं भगवद्दयोदयमन्तःस्फुरणमिति । तदयं नृहरिस्तवोऽपि रुद्रप्रवचनसम्बद्ध इति विनेयजनवाञ्छयाऽत्र ग्रन्थान्ते न्यवेशि ॥

अन्ते च जिज्ञासूनामुपकाराय पूर्वप्रकाशनेष्विव तारतम्यमीमांसा च पुनः समयोजि ॥

नमोवाकं प्रशास्महे

अथच मम विद्यागुरूणां हरिपदमितानां श्रीविद्यामान्यतीर्थश्रीचरणानां करकञ्जसञ्जातैः श्रीहृषीकेशतीर्थवेदान्तसाम्राज्यमधिरूढैः श्रीविद्याधीशतीर्थ-श्रीचरणैरयं ग्रन्थः प्राकाश्यमानीयत इति महदिदमामोदपदम् । श्रीविद्यामान्य-तीर्थश्रीचरणैः प्रतिष्ठापिता, गुरुकरुणाधिगतनिर्देशकतया ममापि सम्बन्धिनी अपूर्वाणां शास्त्रग्रन्थानां संशोधनार्थं प्रकाशनार्थं च केवलं लब्धजन्मा तत्वसंशोधनसंसदेवास्य प्रकाशनीति हेम्नः परमामोदः । येषां सदाशयेन प्रोत्साहेन चेदं सर्वं सुकरमभूत्, तेभ्यः सर्वेभ्यो महद्भ्यो नमोवाकं प्रशास्महे । जिज्ञासुभ्यः कृतबहुपरिश्रमेभ्यश्चाऽशीःपरम्पराम् ॥

मन्ये हरिलोकगतास्ते मान्यविद्या विद्यामान्यगुरवः पुनरनया सपर्यया परितुष्टाः सहार्दं नः सर्वान् भूयसीभिराशीर्भिरभिनन्दन्तीति ।

भवदीयः—

– डा. बन्नञ्जेपदोपाह्व आचार्यगोविन्दः

शतरुद्रियम्

(तैत्तिरीयसंहितापाठानुसारि)

✻

ओ३म् ॥ रुद्राय भद्राय समुद्रगाय साराय सूराय समीरणाय ।
त्र्यक्षाय पृक्षाय परीक्षकाय नमोऽन्तरिक्षाय पराक्षराय ॥

विष्णोः प्राणस्य रुद्रस्य प्रियं हि शतरुद्रियम् ।
जिज्ञासुजनबोधाय व्याख्यास्यामो यथामति ॥

अथातः शतरुद्रीयं व्याख्यास्यामः ॥

तैत्तिरीया वयम् । अतस्तैत्तिरीयं पाठमेवाऽश्रित्य प्रथमं व्याख्यास्यामः । तैत्तिरीयसंहितायां चतुर्थकाण्डे पञ्चमप्रपाठके पठिताः शतरुद्रियाख्ययज्ञ-मन्त्राः । एके वेदज्ञाः प्रपाठकं प्रश्नमाचक्षते । तेषां पक्षे रुद्राध्यायः पञ्चमः प्रश्नः । 'शतरुद्राच्छश्च घश्च' इति वार्त्तिकम् (अ.सू.४.२.२८) । तेन शतरुद्रीयं शतरुद्रियं वा ॥

[प्रथमोऽनुवाकः]

ह॒रि॒ः ओ४म् ॥ नम॑स्तेरुद्रम॒न्यव॑उ॒तोत॒ऽइष॑वे॒नम॑ः ।
नम॑स्तेऽअस्त॒ुधन्व॑नेबा॒हुभ्या॑म॒ुतते॒नम॑ः ॥ १ ॥

ह॒रि॒ः ओ४म् ॥ नम॑ः । ते॒ । रु॒द्र॒ । म॒न्यवे॑ । उ॒तोइति॑ । ते॒ । इष॑वे । नम॑ः ॥
नम॑ः । ते॒ । अ॒स्त॒ु । धन्व॑ने । बा॒हुभ्या॒मिति॑बा॒हु+भ्या॒म् । उ॒त । ते॒ ।
नम॑ः॥

तत्र प्रथमो मन्त्रः – नमस्त इति ।

समग्रस्य चास्य रुद्राध्यायस्य अग्निरृषिरिति तैत्तिरीयाः । केचिदन्या-नन्यानृषीनप्याचक्षते । तत् तत्रतत्र वक्ष्यामः । प्रथमोऽनुवाकश्छन्दोमयः ।

प्रायोऽनुष्टुप् । यत्र विशेषस्तत्र वक्ष्यते । रुद्रो देवता । प्रथममन्त्रस्य कश्यप ऋषिरित्याहुः ॥

त्रिस्तरोऽयं मन्त्रग्रामः । रुद्र इति शिवः । रुद्र इति प्राणः । रुद्र इति नारायणः ॥

नहि देवानां नामकरणं नामास्ति । गौणानि हि तेषां नामानि भवन्ति । तथाहि निर्वचनम् । दुर्जनान् रोदयतीति रुद्रः । रुजं द्रावयतीति रुग्द्र एव रुद्रः ॥

तथाहि दशपादिका–'रोदेर्णिलुक् च' (८.३९) इति । 'रोदेर्धातो रक् प्रत्ययो भवति णिलुक् च । रुदिर् अश्रुविमोचने । रोदयति दानवयोषित इति रुद्रः शिवः' इति वृत्तिकारः ॥

रुद्र इति शिव इति लोकतः प्रसिद्धम् । विद्वद्रूढ्या प्राणनारायणावपि । तथाहि श्रुतिः प्राणविषया–'इन्द्रस्त्वं प्राण तेजसा रुद्रोऽसि परिरक्षिता' (ष.उ.२.९) इति । 'रुद्रस्थो जगत् परितो रक्षिताऽसि' इति वामनपण्डिताचार्यः । शरीरा-दुत्क्रम्य रोदयति च सः । अपिच स्मरन्ति–'रुजां द्रवणतो रुद्रो वायुः' इति । भट्टभास्करोऽप्याह–'रुतिं शब्दं राति ददातीति प्राणो रुद्र इत्यन्ये' इति ॥

'यो देवानां नामधा एक एव', 'नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परममुदाहरन्ति' इत्यादिश्रुतिप्रथितसर्वनामा नारायण एव मुख्यतो रुद्रः । तथाहि विष्णुसहस्रनामसु–'रुद्रो बहुशिरा बभ्रुः' इति । स्मरन्ति च–

'रुजं द्रावयते यस्माद् रुद्रस्तस्माज्जनार्दनः' इति ब्रह्माण्डे ॥

वामने च–

'नतु नारायणादीनां नाम्नामन्यत्र सम्भवः ।
'अन्यनाम्नां गतिर्विष्णुरेक एव प्रकीर्तितः' इति ॥

एतदप्याह भट्टभास्करः–'रुतिं शब्दं वेदात्मानं ब्रह्मणे राति ददाति कल्पादाविति रुद्रः इत्यपरे' इति । अङ्गीचकारेव चैतमर्थम्–'एवं तीर्थकारैः स्वस्वसमयानुगुणं रुद्रपदं व्युत्पाद्यते' इति । तथाहि भागवते–'तेने ब्रह्म हृदा

य आदिकवये' इति । श्रुतिश्च–'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' (श्वे.उ.६.१.८) इति । तथाचायं मन्त्रार्थः–

हे कपालिन्, ते तव मन्यवे क्रोधाय नमः । उतो अथ च, मन्युना प्रयुज्यमानायै तव इषवे नमः । यत्रेषुर्निहिता प्रयुज्यते तस्मै तव धनुषे चास्तु नमः । रुद्रप्रथमानुवाके एकारपूर्व ओकारपूर्वश्च अकारः न लुप्यत इति प्रातिशाख्ये स्थितम् (तै.प्रा. ११.३)[1] । तेन 'नमस्ते अस्तु' इति प्रगृह्यः । उत, याभ्यां च तव बाहुभ्यां शराः शरासने निक्षिप्य प्रहीयन्ते ताभ्यां बाहुभ्यां च नमः । नमनं च त इष्वादयो मां वर्जयन्त्विति । 'नमः' इति 'न मम' इति चार्थः । किन्तु दुष्टानां दमनायैव तत् सर्वमुपयुज्यताम् ॥

अथ प्राणः । मन्यवे, मन ज्ञाने, ज्ञानरूपाय, असत्सु क्रोधरूपाय च ते नमः । इषुषु सन्निधायासतां हिंसकाय ते नमः । भगवदिषुरूपाय ते नमः । 'पश्चात्मको मारुत एव बाणाः' इति स्मरणात् । धन्वनि बाह्वोश्च सन्निहिताय ते नमः । 'गदा तु वायुर्बलसंविदात्मा शार्ङ्गश्च' इति स्मरणात् । वायोर्बलदेवतात्वेन विशेषतो बाहुगतत्वम् । स एव हि क्षत्रमानी च ॥

अथ नारायणः । हे रुद्र जनार्दन, दुष्टजनानर्दयन् रोदयसि त्वम् । एवं जननमर्दयन् संसाररुजं द्रावयसि । तस्माद्रुद्रो जनार्दन इत्येकार्थे पदे । मन्युरूपाय नरसिंहाय ते नमः । स हि स्तूयते प्राणेन–'यस्ते मन्यो' इति । रुद्रमन्यव इत्येकं च पदम् । रुद्रो दैत्यभयङ्करो मन्युरस्येति । रुद्रजनको

१. तथाहि सूत्रम्–'**धाता रातिः**(सं.१.४.४४)-**उप**(१.५.५)-**वाजपेय**(१.७.७-१२)-**जुष्ट**(३.१.१०)-**श्येनाय**(३.२.८)-**उरव्य**(४.१.१)-**ध्रुवक्षिति**(४.३.४)-**इयमेव सा या**(४.३.११)-**अग्निर्मूर्धा** (४.४.४)-**रुद्रप्रथम**(४.५.१)-**उपोत्तम**(४.५.१०)-**विकर्ष** (४.६. १-५)-**विहव्य**(४.७.१२-१४) **हिरण्यवर्णीय**(६.६.१)-**याज्या**(१.१.१४)- **महपृष्ठ्ये** (४.४.१२; ४.६.६-९;४.७.१५) इति । एष्वनुवाकेषु एकारपूर्व ओकारपूर्वो वा अकारो न लुप्यत इति सूत्रार्थः ।

मन्युरस्येति वा । 'रुद्रश्च क्रोधसम्भवः' इति हि भारते । मन्युरिति यज्ञः । यज्ञानां पतये नमः । त्रिपुरसंहारे रुद्रेषुगताय इषुरूपाय ते नमः । ईषते हिनस्ति हिरण्यकशिपुमितीषवे ते नमः । ईष हिंसायाम् । 'ईषधातोरुः प्रत्ययो भवति । इकारश्चाऽदेरादेशः' इति वैयाकरणाः । धन्वने धनूरूपे वायौ गताय ते नमः । याभ्यां रक्षोवक्षो व्यदारयस्ताभ्यां नमस्त्वत्स्वरूपाभ्यां बाहुभ्याम् ॥

अथच वाह्यत इति बाहुशब्दवाच्याभ्यां सृष्टिस्थितिहेतुभ्यां प्रद्युम्नानिरुद्धाभ्यां नमः । धन्वयति संसारादपगमयतीति धन्वने संहारकारणाय सङ्कर्षणाय नमः । धवि गतौ । धन्वतिः सौत्रो धातुरित्येके । इष्यते मोक्षार्थमितीषवे मोक्षप्रदाय वासुदेवाय ते नमः । एवं संसाररुग्द्रावणाय रुद्राय नारायणाय नमः । चतुर्ष्वपि पादेषु 'ते' इति पदाम्रेडनेन पञ्चानामपि रूपाणामैकरूप्यमाह । एवं पञ्चात्मा नारायणः स्तुतः । तेन पञ्चात्मा प्राणः पञ्चमुखः पशुपतिश्च स्तुतौ भवतः । रुद्रप्रतीके हि तौ स्तूयेते । अत एव रुद्रसूक्तमित्याचक्षते । 'अनुस्मृते-र्बादरिः'(१.२.३०) इति बादरायणसूत्रम् । 'तत्रतत्राग्न्यादिसूक्तेषूक्तस्य विष्णोरग्न्यादिषु तत्तदन्तर्यामितयाऽनुस्मर्यमाणत्वात् सूक्तनियम इति बादरि-र्बादरायणात्मजः शुकः' इति तत्वप्रदीपे । तदेवं 'त्रयोऽर्थाः सर्ववेदेषु' इत्युक्तमर्थत्रयमनुसंहितं भवति ॥ १ ॥

यात॒ऽइषु॑श्शि॒वत॑माशि॒वम्ब॒भूव॑ते॒धनुः॑ ।
शि॒वाशर॒व्या॑यात॒वतया॑नोरुद्रमृडय ॥ २ ॥

या । ते॒ । इषुः॑ । शि॒व॒तमेति॑शि॒व+त॒मा॒ । शि॒वम् । ब॒भूव॑ । ते॒ । धनुः॑ ॥
शि॒वा । श॒र॒व्या॑ । या । तव॑ । तया॑ । न॒ः । रु॒द्र॒ । मृ॒ड॒य॒ ॥

यात इषुरिति । अग्निरृषिरिति स्थितम् । अस्य मन्त्रस्याऽत्रेय ऋषिरिति केचित् ॥

हे रुद्र, या तवेषुः शिवतमा बभूव कल्याणतमाऽस्ति । अहिंसनात्, परेषां हिंसनाच्च, तया, यच्च ते शिवं धनुरस्ति तेन, या च तव शिवा शरव्या, शरवे

शरैर्युध्यमानाय उपयुक्ता तूणी, तया च नो मृडय रक्षय सुखय वा । 'मृड सुखने' इति साम्प्रतो धातुपाठः । 'मृड रक्षणे' इति प्राचीनः पाठः ॥

समानं प्राणेऽपि । विशेषतो भीमः स्तूयते ॥

एवं नारायणस्येष्वादयः । अथ च या ते इषुः वासुदेवाख्या मूर्तिः । यच्च धनुः सङ्कर्षणाख्यं रूपम् । कथं धनुः? धुनोतीति धनुः । 'धन धान्ये' इति च्छान्दसो धातुः । तेन दधन्तीति धनुः । संसारादपगमय्य किञ्चिदपूर्व-मुत्पादयतीत्यर्थः । शरं शरीरं वेति जनयति याति च नियमनार्थमिति शरव्या प्रद्युम्नाख्या अनिरुद्धाख्या च मूर्तिः । ताभिश्चतुर्मूर्तिभिः सह हे रुद्र नारायण नो मृडयेति ॥ २ ॥

याते॑रुद्रशि॒वात॒नूरघो॒रापा॑पकाशिनी ।
तया॑नस्त॒नुवा॒शन्त॑मया॒गिरि॑शन्ता॒भिचा॑कशीहि ॥ ३ ॥

या । ते॒ । रु॒द्र॒ । शि॒वा । त॒नूः । अघो॑रा । अपा॑पकाशि॒नीत्यपा॑प+का॒शि॒नी॒ ॥ तया॑ । न॒ः । त॒नुवा॑ । शन्त॑म॒येति॒शम्+त॒म॒या॒ । गिरि॑-श॒न्तेति॒गिरि॑+श॒न्त॒ । अ॒भीति॑ । चा॒क॒शी॒हि॒ ॥

या ते रुद्रेति । अस्य मन्त्रस्य काश्यप ऋषिरिति केचित् । अत्र पूर्वार्धेऽ-नुष्टुप् । तृतीयचरणः पाङ्क्तः । तुरीयो बार्हतः । गिरिशन्त+अभिचाकशीहि इति विश्लेषेण पाङ्क्त एव वा । संहत्य (८+८+१०+१०) षट्त्रिंशदक्षराणीति विषमपदेयं बृहतीत्याचक्षते ॥

वैकारिकस्तैजसस्तामसश्चेति त्रिविधोऽहङ्कारो भवति । तन्मानितया रुद्रस्यापि त्रिविधा तनूः– सात्विकी राजसी तामसी च । तत्र सात्विक्या तन्वा रक्षेति प्रार्थयते– या ते रुद्र शिवा तनूः । शिवा शान्ता सात्विकी । घोरा राजसी न भवतीत्यघोरा सौम्या । पापं दुःखं तमो वा न प्रकाशयतीति अपापकाशिनी । अपापान् सतः ज्ञानदानेन प्रकाशयतीति च । शन्तमया अतिशयितसुखदात्र्या । तया सात्विक्या तनुवा नः अभि चाकशीहि प्रकाशय । काशतेश्चर्करीतम् ।

अनुग्रहदृष्टिमस्मासु पातय । गिरिशन्त । गिरौ कैलासे तिष्ठन् शं तनोतीति गिरिशन्तः। ज्ञानस्य गिरणाद् गिरिर्मनः। तदभिमानितया तत्रगतः शं तनोतीति च गिरिशन्त उच्यते गिरिशः ॥

अथ प्राणः । हे प्राण, पापान् राक्षसान्, कौरवान्,मायिनश्च न काशयति । ‘पापकाशिनी’ इति च प्रतृण्णम् । पापकानश्नातीति । ननु स्वरः कुप्यति । अर्थविशेषलाभाय क्वचित् स्वरभङ्गोऽपीष्यते । गिरिशमपि तनोति ज्ञानदानेन गिरिशन्तो वायुः । ‘या ते तनूर्वाचि प्रतिष्ठिता या श्रोत्रे या च चक्षुषि । या च मनसि सन्तता शिवां तां कुरु मोत्क्रमीः’ इति तत्वमानिभिः कृता प्राणस्तुतिः ॥

गिरौ ब्रह्मगिरौ शिरसि सन्निधाय चक्षुःश्रोत्रमनोवाक्प्राणैः शं तनोतीति गिरिशन्तः पश्चात्मा नारायणः । गिरणाद् गिरौ शङ्करे पवने च स्थितः, तयोः शं तनोतीति च गिरिशन्तः। गिरिर्मेघ इति नैरुक्ताः। तेन गिरौ मेघे स्थितः वृष्टिं जनयन् जनानां शं तनोतीति गिरिशन्तः। गिरि वेदवाचि गतः शं तनोति। गिरेः तदभिमानिनः नरनारायणात्मना स्वसश्चरणेन शं तनोति। गिरयो गुरवः। तेषां शं तनोति। गिरिशं तनोति। गिरिशस्याप्यन्तकः। सर्वलोकगिरणाद् गिरिः। आनन्दरूपत्वाच्छम्। ततत्वात्तः ॥ ३ ॥

यामिषुं॑ङ्गिरिशन्त॒हस्ते॒(१)बिभ॒र्ष्यस्त॑वे ।
शि॒वाङ्गि॑रित्र॒ताङ्कु॑रु॒माहि॑ꣳसी॒ᳶपुरु॑ष॒ञ्जग॑त् ॥ ४ ॥

याम्। इषु॑म्। गि॒रि॒श॒न्तेति॑गिरि+श॒न्त॒। हस्ते॑ (१)। बिभ॑र्षि। अस्त॑वे ॥
शि॒वाम्। गि॒रि॒त्रेति॑गिरि+त्र॒। ताम्। कु॒रु॒। मा। हि॒ꣳसीः॒। पुरु॑षम्। जग॑त् ॥

यामिषुमिति। अस्योत्तरमन्त्रस्य च गौतम ऋषिरित्येके। गोधूम इत्यन्ये ॥

अस्तवे असितुम् । शत्रुषु क्षेप्तुम् । ‘तुमर्थे सेसेनसे–’ (अ.सू.३.४.९) इति तुमुनोऽर्थे छन्दसि धातोः तवेन् प्रत्ययः । यामिषुं हस्ते बिभर्षि तामस्मद्विषये

शिवां कुरु। माऽस्मासु प्रमुचः। पुरु ब्रह्म सरतीति पुरुषं जगत् ज्ञानिलोकं मा वधीः। गिरिं कैलासं त्रायत इति गिरित्रः ॥

अथ प्राणः । गिरि वाग्देव्यां स्थितो गुरुशिष्यौ त्रायत इति गिरित्रः । ‘सह नाववतु । सह नौ भुनक्तु’ इति श्रुतेः । गिरणाद् गिरिं शिवमपि त्रायते । गिरौ मेघे भूत्वा वृष्ट्या जगत् त्रायते । ‘यदा त्वमभिवर्षस्यथेमाः प्राण ते प्रजाः । आनन्दरूपास्तिष्ठन्ति कामायान्नं भविष्यतीति’ (ष.उ.३.२.१०) इति श्रुतेः। गिरिं मैनाकं वज्रात् त्रायते च ॥

अथ नारायणः । गिरिं पर्वतं गिरिशं वायुं मेघं च त्रायते गिरित्रो नारायणः । गिरि वाचि रमायां स्थितः। वेदवाचि च वाच्यत्वेन। त्रायते च तद्विदः। गिरीन् गुरूंश्च त्रायते ॥

अत्र द्वितीयपादे ‘हस्ते बिभर्षि+अस्तवे’ इति विश्लेषेणाष्टाक्षरता । अथापि प्रथमपादे सप्ताक्षराणीति निचृदनुष्टुप् ॥ ४ ॥

शि॒वे॒नवच॑सात्वा॒गिरि॒शाच्छा॑वदामसि ।
यथा॑न॒स्सर्व॒मिज्जग॑दय॒क्ष्मꣳसु॒मना॒ऽअस॑त् ॥ ५ ॥

शि॒वेन॑। वच॑सा। त्वा॒। गिरि॑श। अच्छ॑। व॒दा॒म॒सि॒ ॥ यथा॑। नः॒।
सर्व॑म्। इत्। जग॑त्। अ॒य॒क्ष्मम्। सु॒मना॒इति॑सु+मनाः॑। अस॑त् ॥

शिवेनेति । शिवेन श्रुतिवचसा त्वामच्छ सम्यग् यथावत् वदामसि वदामः स्तुमः । ‘इदन्तो मसि’ (अ.सू.७.१.४६) इति मसः सकारान्तस्य इकारागमः। ‘निपातस्य च’ (अ.सू.६.३.१३६) इति ‘अच्छ’ इति निपातस्य दीर्घ आदेशः संहितायाम्– ‘अच्छा’ इति। परिगणितानि च दीर्घान्तानि सांहितानि पदानि प्रातिशाख्ये–‘अवा सचस्वा नुदा मृडा वर्धा शिक्षा रक्षाऽद्या भवा भजा यत्रा चरा पिबा ना धामा धारया धर्षा घा वर्द्धया बोधाऽत्रा तत्रा मुञ्चाऽश्वस्या

पृणस्वा हिष्ठा त्वन्तरा जनिष्वा युक्ष्वाऽच्छा' (तै.प्रा.३.८) इति । 'अच्छ-शब्दोऽव्ययमभिशब्दस्यार्थे वर्तते' इति जयादित्यः । तथाहि पाणिनिः स्मरति– 'अच्छ गत्यर्थवदेषु' (अ.सू.१.४.६९) इति । तत्पक्षे अच्छा वदामसि अभिवदाम इत्यर्थः । नः सर्वमपि जगत् सज्जनवृन्दं अयख्ष्मम् । महाराष्ट्राः 'अयक्ष्मम्' , ('अयक्ष्मम्') इति पठन्ति । 'अयख्ष्मम्' इति दाक्षिणात्याः । शषसकारेषु परेषु पूर्वस्य वर्गीयप्रथमाक्षरस्य द्वितीयाक्षरत्वमादिश्यते । तेन यक्ष्मो यख्ष्मो भवति । दिक्षु दिख्षु भवति । सहस्राक्षः सहस्राख्षो भवति । वृक्षो वृख्षो भवति । कक्षः कख्षो भवति । गृत्सो गृथ्सो भवति । ऋक्सामे ऋख्सामे भवतः । संवत्सरः संवथ्सरो भवति । क्षीरं ख्षीरं भवति । अप्सरसोऽफ्सरसो भवन्ति । एवमन्यत्रापि द्रष्टव्यम् । तथाहि तैत्तिरीयप्रातिशाख्यम्– 'प्रथम ऊष्मपरो द्वितीयम्' (१४.१२) इति । वार्त्तिककृदप्याह–'चयो द्वितीयाः शरि पौष्करसादेः' (अ.सू.८.४.४८) इति । पुष्करसादस्यापत्यमयमाचार्यः चयो द्वितीया भवन्ति शरि परत इति मन्यत इत्यर्थः । यक्ष्मः क्षयः । रोगसामान्यस्योपलक्षणम् । व्याधिवर्जितम् । सुमनाः सुमनः,अतिशयार्थे दीर्घः । सर्वात्मना आधिवर्जितं च यथा असत् स्यात् तथा कुरु । गिरौ कैलासे शेते वसतीति गिरिशः शिवः ॥

शिवे मेघे वाग्देव्यां वाचि वा शेत इति गिरिशः प्राणः । गिरो वाग्देव्या ईशो गिरीशः । स एव गिरिश इति वा ॥

प्राणे शिवे मेघे रमायां शेते तिष्ठतीति गिरिशो नारायणः । रामावतारे चित्रकूटादिषु गिरिषु शेते । नरनारायणात्मना व्यासात्मना च हिमगिरौ शेते । कूर्मावतारे मन्दरगिरिस्तस्य पृष्ठे शेते । ब्रह्मगिरौ मूर्धनि चायं शेते ॥

प्रथमपादे 'वचसा तुवा' इति क्षैप्रविश्लेषेण केवलाऽनुष्टुप् ॥ ५ ॥

अध्य॑वोचदधिव॒क्ताप्र॑थ॒मोदैव्यो॑भि॒षक् ।
अहीꣳ॑श्च॒सर्वा॑ञ्ज॒म्भय॒न्थ्सर्वा॑श्चयातुधा॒न्यः॑ ॥ ६ ॥

अधी॑ति । अ॒वो॒च॒त् । अ॒धि॒व॒क्तेत्य॑धि+व॒क्ता । प्र॒थ॒मः । दैव्यः॑ । भि॒षक् ॥ अहीन्॑ । च॒ । सर्वा॑न् । ज॒म्भय॑न् । सर्वाः॑ । च॒ । या॒तु॒धा॒न्य॑इति॑-यातु+धा॒न्यः॑ ॥

अधीति । अस्य मन्त्रस्य कण्व ऋषिरिति केचित् ॥

शिवः प्राणो नारायणश्च अध्यवोचत् । अधिकं श्रेष्ठं प्रमेयमुपदिदेश देवानाम् । मन्त्रदर्शिनामस्माकं वा । यतः स एवाधिको वक्ता गुरूणामपि गुरुः । इन्द्रादीनां शिवोऽधिवक्ता । तस्यापि प्राणः । तस्यापि नारायण इति स एव सर्वाधिको वक्ता । स हि प्रथमवक्ता सर्ववेदानाम् । तेन ह्यधिष्ठिताः सर्वे वक्तारो वदन्ति । 'श्रोता मन्ता द्रष्टाऽऽदेष्टाऽऽघोष्टा विज्ञाता प्रज्ञाता सर्वेषां भूतानामन्तरपुरुषः' इति ह्यैतरेयी श्रुतिः । स नः अध्यवोचत्, अधिवदतु उपदिशत्विति वा । 'छन्दसि लुङ्लङ्लिटः' (अ.सू.३.४.६) इति हि पाणिनिः । देवसम्बन्धी प्रथमो भिषक् । मनोमानित्वान्मनोरोगनिवारकः शिवः । मनोमूलत्वाद् दैहिकानां च व्याधीनाम् । रुजां द्रावणादेव हि तं रुद्रमाचक्षते । 'त्वादत्तेभी रुद्र शन्तमेभिः शतं हिमा अशीय भेषजेभिः' (ऋ.सं.२.३३.२; तै.ब्रा.२.८.६.८) इति, 'भिषक्तमं त्वां भिषजां शृणोमि' (ऋ.सं.२. ३३.४) इति च श्रुतिः । प्राणस्यापि समानमेतत् । रुद्रत्वसामान्यात् । नारायणस्य च । 'वैद्यो नारायणो हरिः' इति हि स्मरन्ति । 'अच्युतानन्तगोविन्दनामोच्चारणभीषिताः । नश्यन्ति सकला रोगाः सत्यं सत्यं वदाम्यहम्' इति च सावधारणं वचः ॥

आघ्नन्तीत्यहयः अविद्याकामकर्मादयः । 'आङि श्रिहनिभ्यां ह्रस्वश्च' (१.६६) इति दशपादिका । 'अहिरन्तोदात्तो व्युत्पादितः । केचिदाद्युदात्तमिच्छन्ति' इति काशिकायां (अ.सू.६.२.४८) वामन आह । वस्तुतस्तु आद्युदात्तत्वमेव साधु । तथाहि वृत्तिकारः– 'ह्रस्वश्च पूर्वपदस्य उदात्तश्च' इति । 'समाने ख्यः स चोदात्तः' (१.६५) इति पूर्वसूत्रादुदात्तपदमनुवर्तनीयम् । तदेतत् 'ह्रस्वश्च' इति चकारेण बोध्यत इत्यर्थः । श्रुतिषु च सर्वत्राऽद्युदात्त एवाहिशब्दः पठ्यते । तस्माच्चिन्त्यमेव काशिकावचनम् ॥

अहिरिति वृत्र इति नैरुक्ता मेघमाचक्षते । तथाह्यहिशब्दार्थमाह यास्कः– 'अहिरयनात् एत्यन्तरिक्षे' इति । यस्य हः । अर्थान्तरं चाऽह–'निर्ह्रसितोपसर्ग आहन्तीति' इति । तथाच 'अहीन् मेघान् वर्षणेन जम्भयन् शुष्कयन्' इति चार्थः स्यात् । जभि नाशने । अहिरज्ञानमिति तत्ववादिनः । स एवच प्रसङ्गानुगुणोऽर्थः । अहीनज्ञानादीन् जम्भयन् नाशयन्निति । एवं शिवं स्तुवन्ति हि–'पश्ववृन्मम मनस्तमस्ताडय' इति । जगद्गुरुत्वात् प्राणोऽप्येवम् । गुरु-तमत्वान्नारायणोऽपि । एवं यातनाप्रदाः सर्वा यातुधान्यो दुष्टशक्तीश्च नाशयन् ज्ञानमार्गमध्यवोचदिति ॥

अत्र द्वितीयचरणे 'दैवियो भिषक्' इति, तुरीये च 'यातुधानियः' इति च क्षैप्रविश्लेषेण केवलाऽनुष्टुप् ॥ ६ ॥

अ॒सौयस्ता॒म्रोऽअ॑रु॒णऽउ॒तब॒भ्रुस्सु॑म॒ङ्गलः॑ ।
येचे॒माꣳरु॒द्राऽअ॒भितो॑दि॒क्षु(२)श्रि॒तास्स॑हस्र॒शोवै॑षा॒ꣳ
हेड॑ऽईमहे ॥ ७ ॥

अ॒सौ । यः । ता॒म्रः । अ॒रु॒णः । उ॒त । ब॒भ्रुः । सु॒म॒ङ्ग॒लइति॑सु+म॒ङ्गलः॑ ॥
ये । च॒ । इ॒माम् । रु॒द्राः । अ॒भितः॑ । दि॒क्षु(२) । श्रि॒ताः । स॒ह॒स्र॒शइति॑-
सहस्र+शः । अवेति॑ । ए॒षा॒म् । हेडः॑ । ई॒म॒हे ॥

अस्योत्तरमन्त्रस्य च काल ऋषिरिति केचित् ॥

अथ शिवप्राणनारायणानादित्यप्रतीके स्तौति– असौ । असावादित्यः । यस्ताम्र उदयेऽस्तमये च । क्वचिदरुण ईषद्रक्तः । क्वचिद् बभ्रुः प्रखरतेजाः । बिभर्ति तेज इति बभ्रुः । सर्वत्रापि सुमङ्गलः । ये च दिख्षु दिक्षु अभितः सर्वतोदिशं व्याप्येमां पृथिवीं श्रिताः सहस्रशः सहस्राणि रुग्द्रावकतया रुद्रा रश्मयः । यश्च एषां रश्मीनाम् अस्मत्कर्तृकः अवहेडः अवहेळनमवज्ञा, तत्प्रतिक्रियार्थं तं सूर्यगतं गायत्र्यादिभिर्मन्त्रैः शरणमीमहे ॥

एवं प्राणोऽपि सूर्यगतः स्तूयते । नारायणोऽपि । बभ्रुरिति विष्णोर्हि नाम । जगद्भरणात् । 'रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः' इति हि विष्णु-सहस्रनामसु । ये चेमा रुद्राः किरणगता भगवद्रूपविशेषाः । अत एव हि तं हृषीकेशमाहुः । केशवं चाऽहुः । सूर्यरश्मयो हि केशा उच्यन्ते । 'अंशवः केशसञ्ज्ञिताः' इति स्मरणात् ॥

अथच मूलरूपमिव हनुमानपि उद्यद्रविसन्निभ इति ताम्र उच्यते । तामसानां म्रदनाच्च ताम्रः । म्रद मर्दने । तामसस्य रावणस्य वा । रजनिचरविनाशकाङ्क्षया वा ताम्रः । तमु काङ्क्षायाम् । तेषु क्रोधेन ताम्रास्यश्च । अरुणो भीमः । इयर्ति कौरवसेनामिति । तरुणारुणवर्णश्च । अरून् कृतापराधान् शतं धार्तराष्ट्रान् नयति अपनयति लोकादस्मादिति च । भगवतो नारायणस्य सदा हृदि भरणात् बभ्रुर्मध्वः । नारायणतत्वस्य सात्विकलोके भरणाच्च । ये चेमां भूमिमभितो दिक्षु श्रिताः रुद्राः दुर्जनरोदकाः कपिसैनिकाः, ये चेमे रुद्राः पाण्डवसैनिकाः, ये च मायिरोदका मध्वशिष्याः त्रिविक्रमपण्डितप्रमुखाः । यश्चैषां हेडः भुवः परिवेष्टनम्, हेड वेष्टने । तत् अवधृत्य शरणमीमहे । अवमा वयं तानीमह इति वा । स्वर्लोकात् भूलोकं प्रत्यागमनं वा हेडः । तमीमहे । हेड इत्यदन्तं सान्तं वा । सान्तत्वे द्वितीयान्तता च ॥

'दिक्षु श्रिताः सहस्रशः+अवैषां हेड ईमहे' इति विश्लेषेण तुरीय-पञ्चमपादयोरष्टाक्षरता । तेन पञ्चपादाऽनुष्टुबिति पङ्क्तिश्छन्दः । वस्तुतस्तु 'श्रि॒ताः स॑हस्र॒शो अ॑वैषाम्' इति विश्लिष्टः संहितापाठः प्राप्तः । रुद्रस्य प्रथमे उपोत्तमे चानुवाके एकारपूर्व ओकारपूर्वो वा अकारो न लोपमापद्यते इति हि प्रातिशाख्य(११.३)वचनम् । अथापि उत्तरत्रास्यापवादकं सूत्रं पठ्यते– 'यवनहपरः स्वरपरेषु' (१२.४) चाकारो लुप्यत इति । तेन 'सहस्रशोऽ-वैषाम्' इति युक्तः संश्लिष्टः पाठः ॥

साम्प्रदायिकास्तु– 'ये चेमां रुद्रा अभितो दिक्षु श्रिताः' इत्यन्तस्तृतीयः पादः । ततः परश्चतुर्थ इति चतुष्पादेवायं मन्त्र इत्याचक्षते । तत्पक्षे– 'सहस्रशो+अवैषां हेड ईमहे' इति तुरीयपादोऽपि द्वादशाक्षरः । तेन पूर्वार्धेऽष्टाक्षरं पादद्वयम् । उत्तरार्धे च द्वादशाक्षरमिति आस्तारपङ्क्तिश्छन्दः । 'परौ चेद् द्वादशाक्षरावास्तारपङ्क्तिः' इति पिङ्गलस्मरणात् । स्यादिदमपि । न नो हानिः काचित् ॥ ७ ॥

अ॒सौयो॑व॒सर्प्प॑ति॒नील॑ग्रीवो॒विलो॑हितः ।
उ॒तैनं॑ङ्गो॒पाऽअ॑दृश॒न्नदृ॑शन्नुदहा॒र्य्यः॑ ।
उ॒तै॒नँव्विश्वा॑भू॒तानि॒सदृ॒ष्टोमृं॑डयातिनः ॥ ८ ॥

अ॒सौ । यः । अ॒व॒सर्प॒तीत्य॑व+सर्प्प॑ति । नील॑ग्रीव॒इति॒नील॑+ग्री॒व॒ः । विलो॑हित॒इति॒वि+लो॒हि॒त॒ः ॥ उ॒त । ए॒न॒म् । गो॒पाइति॑गो+पाः । अ॒दृ॒श॒न्न् । अदृ॑शन्न् । उ॒द॒हा॒र्य्य॑इत्यु॑द+हा॒र्य्यः॑ ॥ उ॒त । ए॒न॒म् । विश्वा॑ । भू॒तानि॑ । सः । दृ॒ष्टः । मृ॒ड॒या॒ति॒ । न॒ः ॥

असौ योऽवसर्पतीति । योऽसावादित्यः अवाक् सर्पति नीचैर्गच्छति गगनादधः समुद्रान्तर्निलीय भूमेरपरार्धं गच्छतीव, असावादित्यो ब्रह्म नारायणाख्यम् । वायुश्च शङ्करश्च । नीलग्रीवः । नीलवर्णसमुद्रजलस्पृक् नीलग्रीव इवाऽदित्यः । मण्डले च सुलोहितः । नीलमणियुक्तहारग्रीवौ प्राणनारायणौ । उद्यद्रवि-प्रभत्वात् सुलोहितौ च । 'हारी हिरण्यमयवपुः' इति हि स्मरन्ति । शिवः नीलकण्ठ इति तु प्रसिद्धं वचः । कालकूटविषपानेन नीलग्रीवः । स्वयं विशेषेण लोहितवर्णः । अग्निरप्यत्र स्तूयते । ग्रीवायां नीलः ज्वालायां लोहित इति । एवमग्निगताः शिवप्राणनारायणाः स्तूयन्ते ॥

ज्ञानिभिरन्तर्हृदि साक्षात्करणीयो भगवानादित्ये सन्निधाय करुणया सर्वलोकदृश्यो बभूवेत्याह– उतैनम् । उत अपिच एनमस्तं गच्छन्तं गोपा अपि

अज्ञा अनधिगतशास्त्रा अपि गा गोष्ठं निनीषन्तोऽदृशन् अदर्शन् । पश्यन्ति । अस्तमयात् पूर्वं सान्ध्यप्रभायां पाकार्थं नदीतो जलहार्यो नार्योऽपि पश्यन्ति । न केवलं मनुष्याः । उत पश्यन्त्येनं सर्वाणि भूतानि खगमृगादीन्यपि । सूर्यमस्तं जिगमिषन्तं दृष्ट्वैव तानि स्वनिलयं प्रति प्रस्थास्यन्ति । अज्ञानामपि स्वदर्शनं भूयादिति दयालुर्भगवान् किल सूर्यगो बभूव । एवमाऽविपालगोपालं सर्वैरपि दृष्टः सः नः अस्मानपि मृडयाति मृडयतु पालयतु सुखयतु वा ॥

ननु सूर्य एव दृश्यते । न शङ्करः प्राणो नारायणो वा । अत आह– उतैनं गोपाः अदृशन् । गा वेदवचनानि पान्तीति गोपा वेदज्ञाः तं गायत्र्या सूर्यमण्डले पश्यन्ति । उदं जीवसङ्घं विषयेषु हरन्तीति, नाकाय नयन्तीति वा उदहार्यस्तत्वदेवता अपि पश्यन्ति । एवमेनं विश्वानि भूतान्यपि, भूतिमन्ति भूतानि, ज्ञानिनः मुक्तजीवा वा । 'सर्वेभ्यो भूतेभ्यो ददृशे' इति श्रुतेः । स नोऽस्माभिरपि दृष्टः पालयतु । अज्ञानिनो यत् सूर्यं पश्यन्ति तत् सूर्यगतं शिवं प्राणं नारायणं च पश्यन्ति । प्रतिमायां दृष्टायां भगवान् दृष्ट इति ह्याचक्षते लोके । ज्ञानिनस्तु सूर्यगं भगवद्रूपमेव पश्यन्ति । उक्तं हि– 'हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् । तत् त्वं पूषन्नपावृणु' इति ॥

षट्पदा अनुष्टुबियम् । तेन जगती । 'यो+अवसर्पति' इति विश्लेषेण प्रथम-पादेऽष्टाक्षरता । 'अदृशन्नुदहारियः' इति चतुर्थे । अत्र 'योंऽव॒सर्प्पति' इति संश्लिष्टः संहितापाठः पूर्वोक्तादेव प्रातिशाख्यवचनात् ॥ ८ ॥

नमो॑ऽअस्तु॒नील॑ग्रीवायसहस्रा॒क्षाय॑मी॒ढुषे᳚ ।
अथो॒येऽअ॑स्य॒सत्वा॑नो॒हन्तेभ्यो॑कर॒न्नम॑ः ॥ ९ ॥

नम॑ः । अ॒स्तु॒ । नील॑ग्रीवा॒ये॒ति॒नील॑+ग्री॒वा॒य॒ । स॒ह॒स्रा॒क्षाये॑ति॒सहस्र+अ॒क्षाय॑ । मी॒ढु॒षे᳚ ॥ अथो॒इति॑ । ये । अ॒स्य॒ । सत्वा॑नः । अ॒हम् । तेभ्य॑ः । अ॒क॒रम् । नम॑ः ॥

नम इति। अस्य मन्त्रस्य शम्भुरृषिरिति केचित् ॥

नीलग्रीवाय सहस्राख्षाय सहस्राक्षाय सहस्रकिरणाय सूर्यगताय मीढुषेऽभि-लषितसेचकाय शिवाय नमः । मिह सेचने । 'दाश्वान् साह्वान् मीढ्वांश्च' (अ.सू.६.१.१२) इति निपातनात् साधुः। अथो ये अस्य सत्वानः सत्वानि परिवारगणास्तेभ्योऽप्यहं नमोऽकरम् । अकरमिति छान्दसो लुङिति वैयाकरणाः। 'कृ-मृ-दृ-रुहिभ्योऽङ्' (८.१.१७) इति सरस्वतीकण्ठाभरणे भोजदेवः। वस्तुतस्तु भ्वादिमपि कृञ्धातुं प्रतनाः पेठुः। कृञ् करणे-करति करतः करन्तीति। करते करेते करन्त इति। तेन अकरमिति लङि रूपमित्येव युक्तमिति भाति। करोमीत्यर्थः॥

अथ नीलमणिग्रीवाय मुख्यप्राणाय । सहस्रमक्षाणीन्द्रियाण्यस्य नियम्यतया सन्तीति सहस्राक्षः। गिरिशपुरन्दरयोरपि नियामकः। नमस्तस्मा अस्तु। अथो ये अस्य सत्वान उपसन्नास्तत्वाभिमानिनो देवास्तेभ्योऽपि नमस्करोमि॥

अथ नारायणो नीलग्रीवः शिवान्तर्यामी । नीलमणिहारश्च । सहस्राक्ष इति पुरुषसूक्तगदितः । 'विश्वतश्चक्षुरुत विश्वतोमुखः' । इन्द्रान्तर्यामी च । अभिलषितसेक्ता। मेघगतो वृष्ट्या भुवः सेक्ता। पुरुषगतः स्त्रियां रेतःसेक्ता च। 'पुमान् रेतः सिञ्चति योषितायाम्' इति हि श्रुतिः। 'मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यहम्' इति च। येऽस्य सत्वेष्वनन्तीति सत्वानो ब्रह्मादयो देवास्तेभ्योऽकरं नमः । 'सत्वानोऽहम्' इति संश्लिष्टः संहितापाठः, 'यवनहपरः–' (१२.४) इति पूर्वोक्तात् प्रातिशाख्यवचनादेव। कथं तर्हि 'तेभ्योऽकरं नमः' इति? 'अकरम्' इति परेऽकारो लुप्यत इति प्रति-प्रसवादेव(तै.प्रा.१२.७)[१] ॥

१. तथाहि सूत्रम्–**'अभ्यावर्त्तिन्-अपूपम्-अपिदधामि-अद्यानु-अदितिश्शर्म्म-अग्नेर्जिह्वाम्-अग्नयः-पप्रयः-अस्माकम्-अस्मे-धत्त-अश्मा-अश्वाश्रुतिः-अश्याम-अमा-अर्यमन्-अस्मत्पाशान्-अस्मिन्यज्ञे-अस्ता-अव्यथमाना-अभिद्रोहम्-अधायि-अदः-अथो-अदुग्धाः-अरिष्टाः-अरथाः-अर्चन्ति-अन्यतरस्याम्-अत्रस्थ-अन्नाय-अङ्गिरस्वत्-अकरम्'** इति । एतेषु परेषु एकारपूर्व ओकारपूर्वश्चाकारो लुप्यत इत्यर्थः।

अत्र पूर्वार्धे सप्तदशाक्षराणि, उत्तरार्धे पञ्चदशेति संहत्य द्वात्रिंशदक्षराऽ-नुष्टबिति सम्प्रदायः । 'सत्वानो+अहम्' इति व्यूहे तु भुरिगनुष्टुप् ॥ ९ ॥

प्रमुंञ्चधन्वंनस्त्वमुभयोरार्त्नियोर्ज्याम् ।
याश्चंतेहस्तऽइषंवः(३)परांताभंगवोवप ॥ १० ॥

प्रेतिं । मुञ्च । धन्वंनः । त्वम् । उभयोंः । आर्त्नियोः । ज्याम् ॥ याः ।
च । ते । हस्तें । इषंवः(३) । परेतिं । ताः । भगवइतिंभग+वः । वप ॥

अस्य उत्तरयोश्च मन्त्रयोर्नारद ऋषिरिति केचित् । प्रथमचरणे 'तुवम्' इति, द्वितीये 'जियाम्' इति विश्लेषेण स्फुटाऽनुष्टुप्॥

भगवन्तं प्रत्यक्षं पश्यन् प्रार्थयते– प्रमुञ्च भगव इति । धनुरित्युपलक्षणम् । संहारसाधनत्वं ग्राह्यतावच्छेदकम् । भगवान् सृष्ट्यादौ शार्ङ्गस्यांशभूतं धनुर्ब्रह्मणे वायवे रुद्रायेन्द्राय च ददाविति तस्य प्राशस्त्यान्मुखतो ग्रहणम्। पुरातनेषु क्षत्रियेषु युद्धसाधनतया तस्यैव प्राचुर्याच्च॥

हे भगवः भगवन्, उभयोः आर्त्नियोर्धनुष्कोट्योर्निबद्धां धनुषः ज्यां प्रमुञ्च विश्लथय। संहारोन्मुखो मा भूरस्मासु विषये। याश्च ते हस्ते प्रयुयुक्षया गृहीता इषवस्ता अपि परावप दूरे स्थापय। तूणीरे तूष्णीं तिष्ठन्तु ताः। न भवद्धस्ते। यदा चाऽसुरी शक्तिरभ्युत्तिष्ठते, यदा चाधर्मः, तदा शत्रूणां धन्वन उभयोरात्र्योर्ज्यां प्रमुञ्च भेदय विश्लेषय । याश्च तैर्हस्ते गृहीता इषवस्ताश्च परावप परावर्तय, परावर्त्य तेष्वेव पातय । तदर्थं यास्तव हस्ते गृहीता इषवस्ताः परावप शत्रुसेनायां निक्षिप्य निराकुरु शत्रुपीडाम्॥ १० ॥

अवतत्यधनुस्त्वꣳसहंस्राख्षशतेंषुधे ।
निशीर्य्यंशल्यानाम्मुखांशिवोनंस्सुमनांभव ॥ ११ ॥

अ॒व॒तत्येत्य॑व+तत्य॑ । धनुः॑ । त्वम् । सह॑स्रा॒ख्षेति॒सह॑स्र+अ॒ख्ष॒ । शते॑षु॒ध॒इति॒शत॑+इ॒षु॒धे॒ ॥ नि॒शीर्य्येति॑नि+शीर्य्य॑ । श॒ल्याना॑म् । मुखा॑ । शि॒वः । न॒ः । सु॒मना॒इति॑सु+मनाः॑ । भ॒व॒ ॥

अवतत्येति । प्रथमपादे ‘धनुस्तुवम्’ इति विश्लेषेण केवलाऽनुष्टुप् ॥

सहस्राख्ष इत्युक्तार्थम् । अथच सहस्रं भक्तानाम् । असङ्ख्ये भक्तजने तवाक्षीणि अनुग्रहीतुम् । एवं सहस्रं शत्रवः । असङ्ख्ये दुर्जने तवाक्षीणि तान् निग्रहीतुम् । अत एव शतेषुधिः । अनन्तान्यायुधनिधानानि तव । इषव इत्युपलक्षणम् । ‘सर्वप्रहरणायुधः’ इति स्मरणात् । मयि मा भूत् तवास्त्रक्षेपः । धनुरवतत्य अवरोप्य अपगतज्यं कृत्वा नः शिवो भव, सुमनाः प्रसन्नो भव । मद्भक्तोऽयमित्यस्मासु शान्तः सुमनस्को भव । अस्माकं च मनः सुमार्गे प्रेरय । तदर्थं शल्यानां निशितानि मुखानि निशीर्य शीर्णानि कृत्वा शान्तमना मामनुगृहाण । सर्वं समानं प्राणे च शङ्करे च ॥ ११ ॥

विज्य॒न्धनुः॑ऽक्कप॒र्द्दिनो॒विश॑ल्यो॒बाण॑वाँउ॒त ।
अने॑शन्न॒स्येष॑वऽआ॒भुर॑स्यनिष॒ङ्गथिः॑ ॥ १२ ॥

विज्य॒मिति॒वि+ज्य॒म् । धनुः॑ । क॒प॒र्द्दिनः॑ । विश॑ल्य॒इति॒वि+श॒ल्य॒ः । बाण॑वा॒निति॒बाण॑+वा॒न् । उ॒त ॥ अने॑शन् । अ॒स्य॒ । इष॑वः । आ॒भुः । अ॒स्य॒ । नि॒ष॒ङ्गथिः॑ ॥

विज्यं धनुरिति । ‘अनेशन्नस्य+इषवः’ इति विश्लेषेण केवलाऽनुष्टुप् ॥

कपर्दिनो जटाजूटमण्डितस्य शिवस्य धनुर्विज्यमवरोपितज्यं भवत्विति पुनः परोक्षप्रार्थनम् । उत अथ बाणवांस्तूणीरो विशल्यो बाणरहितो भवतु । अस्येषवः अनेशन् अदर्शनं यान्तु । णश अदर्शने । अस्य निषङ्गथिः खड्गः । निषज्यते कोश इति । ‘नौ षञ्जेर्गथिन्’ (१.४१) इति दशपादिका । वृत्तिकारस्तु रथस्कन्धार्थकत्वमाह– ‘षञ्ज परिष्वङ्गे । निषजति निषज्यते वा निषङ्गथिः रथस्कन्धः’ इति । आभुः आवृतो भवन् कोशे तिष्ठतु । एवम्भूतं

शान्ताकारं शिवं दिदृक्षाम इत्येतत् । ‘निषङ्गथिर्बाणाधारः’ इति स्थूलं व्याख्यानम् । तदा निषङ्ग इत्येव पर्याप्तम् । किं वृथाऽधिकाक्षरोपादानेन । यत् कश्चिदाह–‘नितरां कोशे सज्जत इति निषङ्गः खड्गः । निषङ्गथिः खड्गकोशः’ इति । तदप्यपेशलम् । नहि निषङ्गशब्दः खड्गवचनः प्रसिद्धः । अपि-चास्मिन्नर्थे ‘निषङ्ग+थिः’ इति द्वैपद्यं स्यात् प्रतृण्णे । नैवं पदकाराः पठन्ति ॥

कं परं मौक्तानन्दं ददातीति कपर्दो नारायणः । तस्यायं भक्त इति कपर्दी प्राणः । कं परं ददातीति कपर्दं ज्ञानम् । ‘ज्ञानेनैव परं पदम्’ इति स्मरणात् । तादृशस्य मोक्षसाधनस्य ज्ञानस्य विषयोऽयमिति कपर्दी नारायणः । कपर्दिनि सन्निधानाच्च । कपिलव्यासादिरूपेषु स्वयं कपर्दी च सः । कपरदं रूपं वासुदेवाख्यम् । तद्वानिति वा । तदुपासकतया प्राणश्च तद्वान् । अस्य प्राणस्य अकारवाच्यस्य नारायणस्य चानुग्रहात् कपर्दिन उग्राण्यायुधानि चास्मान् न नाम बाधन्ताम् ॥ १२ ॥

[1]याते॑हे॒तिम्मी॑ढुष्टम॒हस्ते॑ब॒भूव॑ते॒धनुः॑ ।
तया॒स्मान्वि॒श्वत॒स्त्वम॑य॒ख्ष्मया॒परि॑ब्भुज ॥ १३ ॥

या । ते॒ । हे॒तिः । मी॒ढु॒ष्ट॒मेति॑मीढुः+त॒म॒ । हस्ते॑ । ब॒भूव॑ । ते॒ । धनुः॑ ॥ तया॑ । अ॒स्मान् । वि॒श्वतः॑ । त्वम् । अ॒य॒ख्ष्मया॑ । परीति॑ । भु॒ज॒ ॥

या ते हेतिरिति । उत्तरस्य मन्त्रत्रयस्य शम्भुरेव ऋषिरिति केचित् । ‘विश्वत-स्तुवम्’ इति विश्लेषेण केवलाऽनुष्टुप् ॥

मीढुष्टम अतितमां भक्ताभीष्टपूरण, ते हस्ते शत्रुनिबर्हणाय धनुरिति या हेतिर्बभूव, अन्या च याकाचिद्धेतिः । तया अयख्ष्मया अयक्ष्मया निर्दोषया परिदृढया विश्वतः भयकारणात् त्वमस्मान् परितो भुज रक्ष । भुज पालने ।

१. –**‘याते॑हे॒तिम्मी॑ढुष्टम’** इति क्वचिन्मुद्रितः स्वरपाठोऽसङ्गतः ।

परियोगे भुजेर्बयोगस्तैत्तिरीयाणां सम्प्रदायः । तथाहि तैत्तिरीयप्रातिशाख्यम्– ‘उपसर्ग-पाथएषोऽति-आति-धाम-परम-भूते-पूर्वेषु छ-खि-भुजेषु च’ (१४.८) इति ॥ १३ ॥

नम॑स्तेऽअ॒स्त्वायु॑धा॒याना॑ततायधृ॒ष्णवे᳚ ।
उ॒भाभ्यां॑(४)मु॒तते॒नमो᳚बा॒हुभ्या॒न्तव॒धन्व॑ने ॥ १४ ॥

नम॑ः । ते॒ । अ॒स्तु॒ । आयु॑धाय । अना॑तताये॒त्यना॑+त॒ता॒य॒ । धृ॒ष्णवे᳚ ॥
उ॒भाभ्या॑म् (४) । उ॒त । ते॒ । नम॑ः । बा॒हुभ्या॒मिति॑बा॒हु+भ्या॒म् । तव॑ ।
धन्व॑ने ॥

नमस्त इति । अत्र ‘आयुधाय+अनातताय’ इति विश्लेषेण केवलाऽनुष्टुप् ॥

अनातताय धनुष्यनारोपिताय, सति चाऽरोपणे धृष्णवे विपक्षक्षपणदक्षाय, अथाप्यस्मासु कृपया अनातताय त आयुधाय बाणरूपाय नमोऽस्तु । अनातताय असज्जिताय सर्वप्रहरणायुधाय वा । उत अथ याभ्यामायुधान्यातनोषि ताभ्यामनातताभ्यां त उभाभ्यां बाहुभ्यां नमः । अनन्तेभ्यो बाहुभ्यः । क्रियासहयोगेन द्वित्वम् । एकेन धनुरपरेण बाणः । एकेनासिरपरेण चर्मेत्यादि । तव धन्वने चानातताय अनारोपितज्यायास्तु नम इति ॥ १४ ॥

परि॑ते॒धन्व॑नोहे॒तिर॒स्मान्वृ॑णक्तुवि॒श्वत॑ः ।
अथो॒यऽइ॑षु॒धिस्तवा॒रेऽअ॒स्मन्निधे᳚हि॒तम् ॥ १ ॥ ॥ १५ ॥

परीति॑ । ते॒ । धन्व॑नः । हे॒तिः । अ॒स्मान् । वृ॒ण॒क्तु॒ । वि॒श्वत॑ः ॥
अथो॒इति॑ । यः । इ॒षु॒धिरिती॑षु+धिः । तव॑ । आ॒रे । अ॒स्मत् । नीति॑ ।
धे॒हि॒ । तम् ॥ १ ॥

(हस्ते᳚ दि॒क्ष्विष॑व उ॒भाभ्या॒ं द्वावि॑ꣳशतिश्च ।)

इति प्रथमोऽनुवाकः

—०—

परि त इति । अत्र ‘तव+आरे’ इति विश्लेषेण केवलाऽनुष्टुप् ॥

तव धन्वनो या हेतिरिषुरूपा, धन्वनः सकाशात् या हेतिः हिंसा वा, साऽस्मान् विश्वतः सर्वथा, विश्वान् सपरिवारान् वा अस्मान्, परिवृणक्तु परिवर्जयतु । अथो अन्यच्चेदमभ्यर्थ्यते । किमिति? यस्तव इषुधिस्तूणीरः, यत्र दुर्जनभर्जन्य इषवः, तमस्मत् अस्मत्तः आरे दूरे निधेहि । आरे निकटे अन्तरेव स्थितेषु कामक्रोधाद्यरिषु निधेहीति वा । अस्मत्तः परावर्त्य आरे अरीणां समूहे निधेहीति केचित् ॥ १५ ॥

प्रथमेऽनुवाकेऽस्मिन् पञ्चदश मन्त्राः । पञ्चाशतःपञ्चाशतः पदानां परिसङ्ख्यानम् । चतुर्थमन्त्रे ‘यामिषुं गिरिशन्त हस्ते’ इत्यन्ता प्रथमा पञ्चाशत् । सप्तमे–‘ये चेमाꣳ रुद्रा अभितो दिक्षु’ इत्यन्ता द्वितीया पञ्चाशत् । दशमे–‘याश्च ते हस्त इषवः’ इत्यन्ता तृतीया पञ्चाशत् । चतुर्दशे– ‘उभाभ्याम्’ इत्यन्ता चतुर्थी पञ्चाशत् । ततश्च द्वे शते द्वाविंशतिश्च (२२२) पदानि भवन्ति ॥ ✼ ॥

इत्याचार्यगोविन्दस्य कृतिषु तैत्तिरीयरुद्रप्रपाठकप्रथमानुवाकभाष्यम् ॥

—०—

[द्वितीयोऽनुवाकः]

ॐ ॥ नमो॒हिर॑ण्यबाहवेसेना॒न्ये॑दि॒शाञ्च॒पत॑ये॒नमो॒ १

नमो॑वृ॒ख्षेभ्यो॒हरि॑केशेभ्य॒ऽप्पशू॒नाम्पत॑ये॒नमो॒ २

नम॑स्स॒स्पिञ्ज॑राय॒त्विषी॑मतेपथी॒नाम्पत॑ये॒नमो॒ ३

नमो॑बभ्लु॒शाय॑विव्या॒धिनेन्ना॑ना॒म्पत॑ये॒नमो॒ ४

नमो॒हरि॑केशायोपवी॒तिने॑पु॒ष्टाना॒म्पत॑ये॒नमो॒ ५

नमो॑भ॒वस्य॑हे॒त्यैजग॑ता॒म्पत॑ये॒नमो॒ ६

नमो॑रु॒द्राया॑तता॒विने॒ख्षेत्रा॑णा॒म्पत॑ये॒नमो॒ ७

नम॑स्सू॒तायाह॑न्त्याय॒वना॑ना॒म्पत॑ये॒नमो॒ ८

नमो॒(१)रोहि॑तायस्थ॒पत॑येवृ॒ख्षाणा॒म्पत॑ये॒नमो॒ ९

नमो॑म॒न्त्रिणे॑वा॒णि॒जाय॒कख्षा॑णा॒म्पत॑ये॒नमो॒ १०

नमो॑भु॒वन्तये॑वा॒रि॒वस्कृ॒तायौष॑धीना॒म्पत॑ये॒नमो॒ ११

नम॑उ॒च्चैर्घो॑षायाक्र॒न्दय॑तेपत्ती॒नाम्पत॑ये॒नमो॒ १२

नम॑ऽक्कृ॒त्स्नवी॒ताय॒धाव॑तेसत्व॑नाम्पत॑ये॒नमः॑ ॥ २ ॥ १३

नम॑ः । हिर॑ण्यबाहव॒ इति॒ हिर॑ण्य+बा॒ह॒वे । से॒ना॒न्य॑ इति॑ सेना+न्ये॑ । दि॒शाम् । च॒ । पत॑ये । नम॑ः । नम॑ः । वृ॒ख्षेभ्य॑ः । हरि॑केशेभ्य॒ इति॒ हरि॑+के॒शे॒भ्यः॒ । प॒शू॒नाम् । पत॑ये । नम॑ः । नम॑ः । स॒स्पिञ्ज॑राय । त्विषी॑मत॒ इति॑ त्विषि॑+म॒ते । प॒थी॒नाम् । पत॑ये । नम॑ः । नम॑ः । ब॒भ्लु॒शाय॑ । वि॒व्या॒धिन॒ इति॑ वि+व्या॒धिने॑ । अन्ना॑नाम् । पत॑ये । नम॑ः । नम॑ः । हरि॑-के॒शा॒येति॒ हरि॑+के॒शा॒य । उ॒प॒वी॒तिन॒ इत्यु॑प+वी॒तिने॑ । पु॒ष्टाना॑म् । पत॑ये । नम॑ः । नम॑ः । भ॒वस्य॑ । हे॒त्यै । जग॑ताम् । पत॑ये । नम॑ः । नम॑ः । रु॒द्राय॑ । आ॒त॒ता॒विन॒ इत्या॑+त॒ता॒विने॑ । ख्षेत्रा॑णाम् । पत॑ये । नम॑ः । नम॑ः । सू॒ताय॑ । अह॑न्त्याय । वना॑नाम् । पत॑ये । नम॑ः । नम॑ः (१) । रोहि॑ताय । स्थ॒पत॑ये । वृ॒ख्षाणा॑म् । पत॑ये । नम॑ः । नम॑ः । म॒न्त्रिणे॑ । वा॒णि॒जाय॑ । कख्षा॑णाम् । पत॑ये । नम॑ः । नम॑ः । भु॒व॒न्तये॑ । वा॒रि॒व॒स्कृ॒ताये॒ति॑ वारिवः+कृ॒ताय॑ । ओष॑धीनाम् । पत॑ये । नम॑ः । नम॑ः । उ॒च्चैर्घो॑षाये-त्यु॒च्चैः+घो॒षा॒य । आ॒क्र॒न्दय॑त॒ इत्या॑+क्र॒न्दय॑ते । प॒त्ती॒नाम् । पत॑ये । नम॑ः । नम॑ः । कृ॒त्स्न॒वी॒ताये॒ति॑ कृ॒त्स्न+वी॒ताय॑ । धाव॑ते । सत्व॑नाम् । पत॑ये । नम॑ः ॥ २ ॥

(वना॑नाम्पत॑येनमोनम॒ एका॒न्नत्रिं॒शच्च॑)

इति द्वितीयोऽनुवाकः

—०—

इतः परं त्रिष्वनुवाकेषु उभयतोनमस्कारा मन्त्रा भवन्ति । अथास्मिन् द्वितीयेऽनुवाके त्रयोदश मन्त्रा उभयतोनमस्कारा अनवानमविच्छेदेन पठ्यन्ते । एकोना अशीतिः पदानि । इतो निगदमन्त्रा इति न च्छन्दश्चिन्ता । अथाप्याचक्षते– 'अस्यानुवाकस्यर्षिर्मण्डूकः । छन्दो महागायत्री । रुद्रो देवता' इति । नमस्कारादिनमस्कारान्तमेकं यजुरित्येकः पक्षः । तथा च द्वितीयानुवाके त्रयोदश यजूंषि । होमविवक्षयेदम् । त्रयोदशात्र स्वाहाकारा भवन्ति । मन्त्रपारायणे तु समग्रोऽनुवाक एकं यजुः ॥

तथाहि काशकृत्स्नवचनमित्युद्धरन्ति–‘अष्टावनुवाका अष्टौ यजूंषि’ इति । यजुष्यपि अक्षरपरिगणनया केचिच्छन्दोऽनुसन्धानमिच्छन्ति ॥

तत्र प्रथमो नमोवाकः–‘नमो॒ हिर॑ण्यबाहवे सेना॒न्ये॑ दि॒शां च॒ पत॑ये॒ नम॑:’ इति । रामकृष्णाद्यवतारेषु कटककेयूरादिदिव्यहिरण्याभरणालङ्कृत-बाहवे नारायणाय । आञ्जनेयभीमरूपयोर्मूलरूपे च हिरण्यबाहवे वायवे । शिवाय च तथा ॥

अथ हितं च रमणीयं च हिरण्यमुच्यते । मनोहरबाहवे । हिरुक् सुखं च हिरण्यमुच्यते । आनन्दमयबाहवे । सर्वाङ्गोपलक्षणम् । हिरण्यं वाहयति प्रापयतीति च हिरण्यबाहुः । आन्तरं हिरण्यं सुखम् । बाह्यं धनकनकादि । यस्य यद् योग्यं स तल्लभते । देवसेनां नयति तारकसङ्ग्रामे । पाण्डवसेनां नयत्यर्जुनसारथिर्भूत्वा । कपिसेनां नयति दाशरथिर्भूत्वा । उपास्यत्वेन इनेन देवेन सहितामास्तिकजनतामूर्ध्वलोकाय नयति । इनेन प्राणेन नारायणेन, अभिमानिना शिवेन च सहितां सेनां मनोवृत्तिं नयति नियमयति । दश दिशां तद्गतप्रजानां पतये नमः । दिगधिपतीनां च । दिशन्ति उपदिशन्तीति दिशः । सर्वेषां उपदेशकानां च पतये पत्ये नमः । ‘षष्ठीयुक्तश्छन्दसि वा’ (अ.सू.१.४.९) इति पतय इति साधु ॥

रावणेनापह्रियमाणया सीतया ऋष्यमूके पातितं हिरण्यमयमाभरणं रामाय वाहयति प्रापयतीति हिरण्यबाहुर्हनुमान् । धृष्टद्युम्ने स्थित्वा स्वयं च पाण्डव-सेनानेता सेनानीर्भीमः । विष्णुतत्वोपदेशकानां पतिर्मध्वः ॥ १ ॥

अथ द्वितीयः–‘नमो॑ वृ॒ख्षेभ्यो॒ हरि॑केशेभ्यः पशू॒नां पत॑ये॒ नम॑:’ इति । कमानन्दः । षकारः प्राण आत्मा । वृतौ कषावेभिरिति वृक्षाः भगवतोऽ-नन्तावताराः । खं ज्ञानम् । वृतौ खषावेभिरिति वा वृख्षाः । वृश्चन्ति संसारवृक्षं छिन्दन्तीति च वृक्षाः । तेभ्यो नमः । व्रश्चू छेदने । वृक्षेषु सन्निहितेभ्यः । विशेषतो न्यग्रोधोदुम्बराश्वत्थेषु । ‘न्यग्रोधोदुम्बरोऽश्वत्थः’ इति हि

विष्णुसहस्रनामसु । अशोकवनिकाव्रश्चनात् रक्षसां व्रश्चनाच्च वृक्षो हनुमान् । कौरवाणां शतस्य तत्सेनायाश्च व्रश्चनाद् वृक्षो भीमः । दुर्मतव्रश्चनाद् वृक्षो मध्वः । एवं वायोस्त्रिरूपेभ्यो वृक्षेभ्यो नमः । अज्ञानव्रश्चनात्, अन्ते जगतो व्रश्चनात् शिवस्याष्टमूर्तयो वृक्षाः । वृतः क्षः नरसिंहः एभिरिति च ॥

हरिद्वर्णपर्णा इति वृक्षा हरिकेशाः । तद्गता भगवद्रूपविशेषाश्च । अथ हरिः सूर्यः । तस्य केशसञ्ज्ञितेषु रश्मिषु सन्निहिताः प्राणनारायणौ शिवश्च । को ब्रह्मा । ईशः शिवः । केशावपि हरतीति हरिकेशो भगवान् । बहुरूपत्वाद् बहुवचनम् । हरतीति हरिः कस्येशश्च । हरेः कपेरिव केशा अस्येति हरिकेशो हनुमान् । हरिकेशो नीलकेशो भीमः । हृतकेशो मुण्डितकेशो मध्वः । तेभ्यो नमः । हरिर्विष्णुः । को ब्रह्मा वायुर्वा । ईशः शिवः । तेभ्यस्त्रिमूर्तिभ्यो नमः । हरिकेशेभ्यः स्फुटितहाटकश्रीजटेभ्यः शिवमूर्तिभ्यो नमः ॥

पशूनां नियतिबद्धानां जीवानां पतिर्नारायणः प्राणः शङ्करश्च । पान्ति शंसाधनाश्चेति वेदाः पशवः । वेदानां परममुख्यार्थत्वात् पशूनां पतिर्नारायणः । तदनन्तरं प्राणः । तदनन्तरं शिवः । वेदमानिन्या रमायाः पतित्वाच्च नारायणः पशुपतिः । वाङ्मानिन्या भारत्याः पतित्वात् पशूनां पतिः प्राणः । पशूनां ग्राम्यारण्यानां पतित्वाच्च । ‘वायवः स्थोपायवः स्थ’ इति श्रवणात् । वाग्देवतायाः पार्वत्याः पतित्वात् पशूनां पतिः शिवः ॥ २ ॥

अथ तृतीयः–‘नमः॑ स॒स्पिञ्ज॑राय॒ त्विषी॑मते पथी॒नां पत॑ये॒ नम॑:’ इति । ‘सस्पिरिति बालतृणं शष्पमुच्यते । तद्वत्पिञ्जर इति शष्पपिञ्जर इति परोक्षेण सस्पिञ्जर उच्यते’ इति व्याचक्षते । न तेन किमपि गुणानुसन्धानमिति नास्माकं तत्र भरः । लोके क्षुल्लवचनानामपि भगवद्गुणपरतानुसन्धानार्थं हि रुद्राध्याय-प्रवृत्तिः । ‘दोषशब्दाश्च विष्णवि’ इति ह्युक्तम् । अत एवास्य मन्त्रजातस्य महद् वैशिष्ट्यम् । सतां पीडनात् सस्पिरिति यज्ञकर्मविघातकोऽसुरगणः

स्यात् । तं जरयति नाशयतीति सस्पिञ्जरः । अथच पञ्जर एव पिञ्जरः । तृतीयोऽतिशये । हृदयपञ्जरे सस्ति शेत इति सस्पिञ्जरः । षस स्वप्ने ॥

त्विषिर्दीप्तिः । तद्वान् त्विषिमान् । 'त्विषिमते' इत्येव प्रतृण्णम् । निरतिशयेयं त्विषिरिति संहितायां दैर्घ्यम् । तथाहि प्रातिशाख्यम्–'शक्ती-रथी-त्विषी–' (३.७) इत्यादि । मतुपि 'शरादीनां च' (अ.सू.६.३.१२०) इति दीर्घत्वमिति वदन् चिन्त्यः । नहि त्विषिः शरादिषु पठ्यते । सूर्यगताय सूर्यादिभासकाय त्विषीमते नमः । 'यदादित्यगतं तेजः' इत्यादिस्मृतेः । 'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' इति श्रुतेश्च । तथा प्राणस्तथा शिवः । होमाग्निगतत्वाच्च त्विषीमान् । पथिः पथिकः । संसारपथिकानां पतिः पाता मोक्षमार्गप्रदर्शकः । पथयः पतितपथाः ब्रह्मादयो देवास्तेषामयं पतिः । यथायोग्यं प्राणशङ्करौ च । पथीनां रुद्रादीनां पतिः प्राणः । पथीनामिन्द्रादीनां रुद्र इति । पथीनां पतये पथां प्रवर्तकाय । देवयानादिपथानां सतामसतां च पथाम् ॥

सस्पिं सतां पीडकं रक्षोगणं क्षपयतीति सस्पिञ्जरो हनुमान् । शष्पपिञ्जर इति व्याख्यानेऽपि न नो हानिः । त्विषिः क्षात्रं तेजः । अतिशयितत्विषिमान् भीमसेनः । संसारपथिकानां वा तत्वपथानां वा पतिः यथार्थज्ञानदानेन पालको मध्वः ॥ ३ ॥

अथ चतुर्थः–'नमो बभ्लुशाय विव्याधिनेऽन्नानां पतये नमः' इति । जगद् बिभर्तीति बभ्रुः, श आनन्दरूपश्चेति बभ्रुश एव बभ्लुशो नारायणः । 'विष्णुर्नारायणो बभ्रुः' इति ह्यभिदधति । 'रुद्रो बहुशिरा बभ्रुः' इति च विष्णुसहस्रनामसु । भगवन्तं बिभर्तीति बभ्रुर्वायुः । तत्रायं शेते । 'वरदो वायुवाहनः' इति हि स्मरन्ति । जगद्धरणाद् बभ्रवो ब्रह्मादयस्तत्वदेवाः । तेष्वयं शेते । हव्यं बिभर्ति पिङ्गलवर्णश्चेति बभ्रुरग्निः । तत्रायं शेते । समानमेतत् प्राणस्य च शिवस्य च । बिभर्ति भारमिति बभ्रुर्वृषभः । बभ्रुरेव

बभ्लुः । तद्वान् बभ्लुशः । लोमश इतिवत् । वृषभवाहनः शिवः । तस्मिन् शेते तिष्ठतीति केचित् ॥

जगदुदरे भरतीति बभ्रुर्विष्णुः । 'पिङ्गलो नकुलश्चैव खलतिर्विष्णुरेव च । चतुर्ष्वर्थेषु मेधावी बभ्रुशब्दं प्रयोजयेत्' इति प्राचीनम् । अन्तर्यामित्वेन तद्वान् बभ्लुशः प्राणः शङ्करश्च ॥

सुरशत्रून् विविध्यतीति विव्याधी नारायणः प्राणश्च । व्याधो भूत्वाऽर्जुनं विव्याधेति विव्याधी रुद्रः । व्यध ताडने ॥

अन्नानामुपजीव्यानां पतिः सर्वोपजीव्यो नारायणः । 'अद्यतेऽत्ति च भूतानि तस्मादन्नम्' इति श्रुतेः । अद्यत इत्युपजीव्यत इत्यर्थः । अत्तीति संहरतीत्यर्थः । अन्नानां संहारकाणामपि पतिः सर्वसंहर्ता । रुद्रादीनामन्नानां पतिर्वायुः । इन्द्रादीनामन्नानां पतिः शिवः । सूर्यचन्द्रयोः स्थित्वाऽन्नानामदनीयानां पोषकः नारायणः प्राणः शिवश्च ॥

बभ्रुर्विष्णू रामावतारेऽस्यांसेऽशेत तस्थाविति बभ्लुशो हनुमानुच्यते । पिङ्गलवर्णवत्त्वाच्च । कौरवसेनां विविधं विव्याधेति विव्याधी भीमसेनः । अनुनदन्तीत्यन्नानां वेदविदां पतिर्मध्वः ॥ ४ ॥

अथ पञ्चमः–'नमो हरिकेशायोपवीतिने पुष्टानां पतये नमः' इति । पूर्वं 'वृक्षेभ्यो हरिकेशेभ्यः' इति वृक्षविशेषणतया हरिकेशत्वमुक्तम् । इह तु हरिकेशायेति स्वतन्त्रं नामेति भेदः । हरेः सिंहस्येव केशाः केसरा अस्य नृसिंहावतारे । हरेर्हयस्येव केशा अस्य हयवदनावतारे । तथाह्यभिदधति–

'विष्णौ शाखामृगे शक्रे सिंहदर्दुरवाजिषु ।
'वर्णे च रुग्मकपिले हरिशब्दः प्रयुज्यते' इति,
'यमानिलेन्द्रचन्द्रार्ककपिमण्डूकवाजिषु ।
'शुककेशवसिंहाग्निवर्णादिषु हरिं स्मरेत्' इति च ॥

हरेर्वायोः कस्य ब्रह्मणश्चेशः । स्वयं हरिः कस्येशश्चेति वा । क इति ब्रह्मा वायुश्च । कमिति जलम् । हरिरयं के अप्स्वन्तः समुद्रे शेते । हर्योः सूर्यचन्द्रयोः केशेषु रश्मिषु स्थित इति हरिकेशः । हरति हविरिति हरेरग्नेः केशेषु शिखासु सन्निहितश्च । समानमेतत् प्राणशङ्करयोरपि । हरेर्वायोरिन्द्रस्य सूर्यस्य चन्द्रस्य यमस्य च कानि इन्द्रियाणि । तेषामयमीशः । हृषीकेशं हि तमाचक्षते । इन्द्रादीनां प्राणशङ्करावपि । व्योमकेशत्वाद्धरिकेश इति नीलकेशः शिवः । तात्स्थ्याच्च प्राणनारायणौ । हरिर्नारायणः कौ ब्रह्मवायू चेशा अस्येति हरिकेशः शिवः ॥

उपरि शिरसि परिवीताः परिगताश्चक्षुःश्रोत्रमनोवाक्प्राणाः अस्येत्युपवीती । उपरि वीतं गतं येषां त ऊर्ध्वगतिमन्तः सात्विकजीवाः । तेषामयं स्वामी । यथायोगं प्राणशिवावपि । धृतोपवीतौ च प्राणशिवौ । स्वयं भगवानपि रामकृष्णाद्यवतारेषु ॥

गुणपुष्टानां सर्वेषां पतये श्रीपतये नमः । वेदाध्ययनेन पुष्टमनसां पतिः प्राणश्च शिवश्च ॥

हरिकेशः पिङ्गकेशो हनुमान् । स कपित्वादेव नोपवीती । मध्वो यतित्वात् । तत उपवीती भीमः । वेदार्थपुष्टानां पतिर्मध्वः । 'भाष्यन्ते ह्यपरिमिताः समस्तवेदेष्वेतेन प्रतिपदमप्रयत्नमर्थाः' इति पण्डिताचार्यवचनम् । अथच दशविधां पुष्टिमाचक्षते–वाक्पुष्टिः, ज्ञानपुष्टिः, शरीरेन्द्रियपुष्टिः, गृहक्षेत्रपुष्टिः, धनधान्यपुष्टिः, प्रजापुष्टिः, पशुपुष्टिः, ग्रामपुष्टिः, धर्मपुष्टिः, अणिमादिपुष्टिश्चेति । सर्वाभिराभिः पुष्टिभिः पुष्टानां पतिर्नारायणः । पुष्टय एव पुष्टानि । पुष्टीनां पतिर्भगवान् । तदनु प्राणशिवौ च । प्राणावतारेषु दशपुष्टिमान् भीमसेनः ॥ ५ ॥

स्तुतः पञ्चभिर्मन्त्रैः पञ्चात्मा नारायणः, पञ्चविधः प्राणः, पञ्चमुखश्च रुद्रः । अथ षष्ठेन मूलरूपं स्तौति– 'नमो भवस्य हेत्यै जगतां पतये नमः' इति ।

हिनोति हन्ति हन्यते वाऽनयेति हेतिरायुधम् । त्रिपुरसंहारे भवस्येषुभूताय हरये नमः । भवस्य संसारस्य नाशयित्रे च, भवस्य पुनर्जन्मनः नाशयित्रे च । भवस्य हेतिस्त्रिशूलं तत्र सन्निहिताय च । अन्ते भवस्य शिवस्यैव हन्त्रे । 'मृत्युर्यस्योपसेचनम्' इति, 'मृत्युमृत्युं नमाम्यहम्' इति च श्रुतिः । यथासम्भवं प्राणस्यापि शिवस्यापि ॥

ब्रह्मादिसर्वजगतां पतये हरये नमः । सर्वलोकानां वा । भारत्यन्तानां जगतां पतये प्राणाय नमः । विष्णुषण्महिष्यन्तानां जगतां पतये शिवाय नमः ॥ ६ ॥

अथ सप्तमः–'नमो रुद्रायाऽऽततायिने क्षेत्राणां पतये नमः' इति । रुजं द्रावयतीति रुद्रो जनार्दन इत्युक्तम् । 'रुद्रो वा एष यदग्निः' इति श्रुतेरग्नौ स्थित्वाऽऽहुतिस्वीकरणाद् रुद्रो नारायणः । रुदं दुःखं द्रावयति वा । रुतेन वेदनादेन द्रवति वा ॥

रुजां द्रावणत एव रुद्रो वायुः । राक्षसानां रुद्रो हनुमान् ॥

आततं जीवजातमवतीति आततावी नारायणः प्राणश्च । आततेन धनुषाऽवतीति शिवः । अर्जुनमवतीति वा । मनस्याततः सन्नवतीति च । आततं स्वसैन्यम् आततेन गदायुधेन धनुषा वाऽवतीति भीमसेनः ॥

क्षेत्रं पिण्डाण्डं च ब्रह्माण्डं च । 'इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते' इति हि गीतासु । 'हिंसाहेतुश्च जीवस्य परेण प्रेर्यते च यत् । अव्यक्तादि शरीरं तत्' इति श्रुतिः । सर्वशरीराणां पतये क्षेत्रज्ञाय हरये नमः । 'क्षेत्रज्ञं चापि मां विद्धि' इति च भगवद्वचनम् । जीवकलामानी वायुश्च क्षेत्राणां क्षियन्ति निवसन्ति पिण्डाण्ड इति जीवानां पतिः । मनोमानित्वादेव क्षेत्राणां शरीराणां पतिः शिवः । 'शरीरपुरुषः शिवः' इति ह्याचक्षते । निवसन्त्यत्र तत्वानीति क्षेत्राणि तत्वशास्त्राणि । तेषां पतिर्मध्वः । पुण्यक्षेत्राणां स्वसन्दर्शनेन पावित्र्यसम्पादकाय च नमः ॥ ७ ॥

अथाष्टमः–'नम॑ः सू॒तायाह॑न्त्याय॒ वना॑नां॒ पत॑ये॒ नम॑ः' इति । नमः सूताय पार्थसारथये कृष्णाय । जगद्रक्षार्थं लीलया मातापितृभ्यां प्रसूत इव सूतस्तस्मै । जगति सुष्ठु ऊताय सन्तताय । सुष्ठु ऊतमवनं यस्मादस्य जगतः । सुगुणोतत्वाच्च सूतः । वायुरपि यथासम्भवं सुगुणोपेतः । नारायणस्य शरीराख्ये रथे सारथिश्चायम् । सूते कर्णे तत्सूते शल्ये च विशेषतः सन्निहितौ प्राणनारायणौ । सूते रोमहर्षणे च । सामान्यतः सर्वसूतेषु च । शिवेऽप्येवं योजनीयम् । अञ्जनायां केसरिणा सूतः हनुमान् । भगवता सीतान्वेषणार्थं सूतः प्रेरितः । 'प्रसूते प्रेरिते सूतः' इत्यभिदधति । सद्गुणैरूतत्वाच्च सूतः । 'येये गुणा नाम जगत्प्रसिद्धा यं तेषुतेषु स्म निदर्शयन्ति । साक्षान्महाभागवतप्रबर्हं श्रीमन्तमेनं हनुमन्तमाहुः' इति हि विदन्तः स्मरन्ति । 'ज्ञाने विरागे हरिभक्तिभावे धृतिस्थितिप्राणबलेषु योगे । बुद्धौ च नान्यो हनुमत्समानः पुमान् कदाचित् क्वच कश्चनैव' इति च ॥

अहन्त्याय केनाप्यहन्तव्याय हिंसितुमशक्याय । अकृतसाधनैरसत्तमैः गन्तुमवगन्तुं चाशक्याय नारायणाय नमः । 'हन हिंसागत्योः' । हन्यमानेऽपि देहे अहन्यमानाय । समानं प्राणशङ्करयोरपि । हन्त्यः देहयोगवियोगाख्य-हननार्हो जीवः । स न भवतीत्यहन्त्यः । यथासम्भवं प्राणशिवावपि । अहंशब्दवाच्ये जीवे भवः अहन्त्यः प्राणः । जीवकलामानित्वात् । अहङ्कारे भवोऽहन्त्यः शिवः । कौरवसेनायां केनापि हिंसितुमशक्यः, धैर्येणाभि-गन्तुमप्यशक्योऽहन्त्यो भीमः ॥

वननीयपतित्वेन वनानां पतये हरये नमः । वनानां जलानामरण्यानां च पात्रे । वने काननेऽनन्तीति वनानः आरण्याः पशवः । जलेऽनितीति जलानितिवत् । तेषां पतये नमः । भवनानां पतये नमः । सवनानां पतये नमः । जलेऽनन्तीति वनान आप्या मत्स्यादयः तेषां पात्रे नमः । समानं वायुशङ्करयोरपि । त्रिवृत्करणे वनानामपां मानी प्राण इति वनानां पतिरुच्यते ।

प्रेतभवनानां वनानां श्मशानानां पतिः शिवः । ये वनन्ति, वन शब्दे, ते वनाः वेदार्थज्ञाः तेषां पतिर्मध्वः । वन सम्भक्तौ । वनन्तीति वनाः भगवद्भक्ताः तेषां पतये च मध्वाय नमः । अवतारत्रयचिन्तनायैव हि त्रीणित्रीणि नामानि नमःकवचितानि पठितानि ॥ ८ ॥

अथ नवमः–'नमो॒ रोहि॑ताय स्थ॒पत॑ये वृ॒क्षाणा॒ं पत॑ये॒ नम॑ः' इति । ये रोहन्ति तेषु स्थिताय रोहिताय नमः । 'रुहे रश्च लो वा' (६.१३) इति दशपादिका । आह च वृत्तिकारः–'रुहेर्धातोरितन् प्रत्ययो भवति । रेफस्य लकारो वा । रोहतीति रोहितः, लोहितः' इति । रोहतां हिताय च । उद्यदादित्य इव लोहितवर्णत्वाच्च रोहितः । रोषोऽपि यस्य हितः स रोहितः । लोकहितत्वाच्च लोहित एव रोहितः । रुजां द्रावणतो रोगिहितत्वाच्च रोहितः । समानं प्राणशङ्करयोरपि ॥

स्थपतौ सन्निधाय शिल्पकौशलदानात् स्थपतिः । 'स्थपतिर्नगरादिकृत्' इति यादवप्रकाशः । सर्वत्र स्थितश्च पतिश्च सर्वस्य । स्थावराणां पतिः । ये शरीरे चलन्तस्तिष्ठन्ति तेषां पतिः । चराचरपतिरित्येतत् । यद् ब्रह्माण्डे स्थितं तस्य सर्वस्य पतिः । स्थानां स्थावरजङ्गमानां ये पालकाः ब्रह्मादयस्तेषु ततः । तेषां तिरानन्दोऽस्येति च । 'तीत्यानन्दः समुद्दिष्टः' इति स्मरणात् । चराचरपतित्वं यथासम्भवं प्राणशङ्करयोरपि ॥

स्थपतिर्यान् वृक्षान् व्रश्चित्वा रमणीयं विग्रहं तक्षति तेषां वृक्षाणां पतये नमः । वृश्च्यन्ते इति वृक्षाः देहाः । 'समानं वृक्षं परिषस्वजाते' इत्यस्यवामीये । तेषां स्वामी । 'पुरमेकादशद्वारमजस्य' इति श्रुतेः । ये पुनरविद्यां वृश्चन्ति ते वृक्षाः ज्ञानिनस्तेषामयं पाता । वनानां पतय इत्युक्तम् । वनगतानां वृक्षाणां चायं पाता । 'ततः परं नृसिंहाख्यः स आरण्याश्रयो मतः' इति हि स्मरन्ति । 'कक्षश्वभ्रे नृसिंहस्य सदाऽवस्थितिकारणात् । द्रवन्ति कक्षश्वभ्राभ्यां तदज्ञानेऽपि रक्षणात्' इति च । एवं वायुरपि वृक्षाणां पतिः, शङ्करश्च ॥

मुखे लोहितत्वाद् रोहिताय हनुमते नमः । रुरोह रामोऽस्यांसमिति च रोहितः । राज्ये स्वस्वपदस्थानां पतिर्भीमः । सर्वेषामुपरि स्थितः पतिः स्थपतिः अधिपतिः । 'स्थपतिः पुनः स्थापत्येऽधिपतौ तक्ष्णि' इति यादवप्रकाशः । 'स्थपतिः कञ्चुकिन्यपि । जीवेष्टियाजके शिल्पिभेदे ना सत्तमे त्रिषु' इति मेदिनी । तेन क्षत्रियसत्तमो भीमः स्थपतिः । वृक्षाणां पूर्वोक्तदिशा ज्ञानिनां पतये मध्वाय नमः । वृतः क्षो नृसिंहो यैस्तेषां नृसिंहोपासकानां च पतिरयम् । वृश्चन्तीति संसारवृक्षच्छेत्तॄणां च पालकोऽयं मध्वः ॥ ९ ॥

अथ दशमः–'नमो॑ म॒न्त्रिणे॑ वाणि॒जाय॒ कक्षा॑णां॒ पत॑ये॒ नमः॑' इति । मन्त्रिषु मन्त्रालोचकेषु स्थिताय । वणिगेव वाणिजः । प्रज्ञादित्वात् स्वार्थेऽण् । वणिक्षु स्थिताय । राजकीये व्यापारक्षेत्रे च नियामकतया स्थिताय । अधिलोकं प्रातीतिकोऽयमर्थः । अथाध्यात्मम्, मन्त्रिणे सर्वमन्त्रप्रतिपाद्याय । सर्वे मन्त्राः सन्त्यस्य प्रतिपादकत्वेन । मन्त्रजापकेषु स्थित्वा तदनुग्राहकाय । अधिपुराणम् – पाण्डवमन्त्रिणे कृष्णाय । वेदवाण्या जायतेऽभिव्यज्यत इति वाणीज एव वाणिजः । यथायथं मन्त्रप्रतिपाद्याय प्राणाय च शङ्कराय च । अन्यत् समानम् । तन्तूनां वयनं वाणिरित्युच्यते । 'वाणिर्व्यूतिश्च वानं च' इति यादवप्रकाशः । अत्र नाम्नां परस्परं वयनं समन्वयनम् । तेन सर्ववेदपदवाच्यत्वेन जायते व्यक्तो भवतीति वाणिजः । यथायथं प्राणशङ्करावपि । नृसिंहरूपेण कक्षाणां पतये नम इत्युक्तार्थम् । के परमानन्दे क्षियन्ति निवसन्तीति कक्षा मुक्तास्तेषां पतये नमः । कषन्तीति कक्षाः । 'कष हिंसायाम्' । 'कषेः सः प्रत्ययः'(९.२१) इति दशपादिका । लोकसंहारकाणां कालाग्नियमरुद्रादीनां पतये नमः ॥

नमः सुग्रीवमन्त्रिणे हनुमते । एतदर्थं वाणी द्रौपदीत्वेन जातेति वाणिजो भीमः । कानि इन्द्रियाणि क्षपयन्तीति कक्षाणां जितेन्द्रियाणां पतये मध्वाय नमः ॥ १० ॥

अथैकादशः–'नमो॑ भु॒वन्त॒ये॑ वारिवस्कृ॒तायौष॑धीनां॒ पत॑ये॒ नमः॑' इति ।

भवन्त्यनेन जगन्तीति भुवन्तिः । भुवं जलाद्याधारतया तनोति विस्तारयतीति भुवन्तिः । वरिव इति धननाम । 'युधा देवेभ्यो वरिवश्चकर्थ' (१.५९.५) इत्यृग्वेदे । 'एष इन्द्रो वरिवस्कृत्' (८.१६.६) इति च । वरिवस्कृतः दैवस्य मानुषस्य च धनस्य दातारः देवाः, इहत्या विद्वांसो धनाढ्याश्च । तेषामयं स्वामी । विदुषि स्थित्वाऽयमेव ज्ञानदाता; धनिनि स्थित्वा अयमेव धनदाता च । वरिवस्कृतामयं वारिवस्कृत इति । वरिवो वरिवस्या । वरिवस्कृतामयं वारिवस्कृतो भक्तवत्सलः । वारिणि वासः कृतोऽनेनेति वारिवस्कृतः समुद्रशायी नारायणः । 'मम योनिरप्स्वन्तः' इति श्रुतिः । ओषधीनां ग्राम्यानामारण्यानां चायं पतिरिति स्थूलमधिलोकं दर्शनम् । सूक्ष्मदृशामध्यात्ममर्थान्तरं प्रतिभाति । ओषधयः संसारदग्धानामाश्रयभूता ब्रह्मादयस्तेषामयं पतिः । रामावतारे ओषधीनां मृतसञ्जीवन्यादीनां शक्तिव्यञ्जकतया स्वामी । यथायथं सर्वमेतत् प्राणशङ्करयोश्च । उग्रेण लवणाम्भसि तपस्तप्तमिति रुद्रोऽपि कथञ्चिद् वारिवासकृत् स्यात् ॥

भुवं तनोति स्वस्थानमिति भुवन्तये किम्पुरुषस्थाय हनुमते नमः । वारिणि समुद्रमध्ये द्वारकायां वासं कृतवानिति वारिवस्कृत् कृष्णः । वारिवस्कृतः कृष्णस्यायं भक्ताग्रणीरिति वारिवस्कृताय भीमाय नमः । ये भगवतः वरिवस्याकृतस्तेषामयं स्वामीति च वारिवस्याकृत एव वारिवस्कृतः । ओषधीनां भवौषधानां शास्त्राणां तत्वविद्यानां वा पतिर्मध्वः ॥ ११ ॥

अथ द्वादशः–'नम॑ उ॒च्चैर्घो॑षायाऽऽक्र॒न्दय॑ते प॒त्तीनां॒ पत॑ये॒ नमः॑' इति । उच्चैः घोषो यस्य तस्मै उच्चैर्घोषाय । 'श्रोता मन्ता द्रष्टाऽऽदेष्टा घोष्टा' इति ह्यैतरेयी श्रुतिः । उच्चैर्घोषो वेदाख्यो यस्य । वज्रनिर्घोषादयोऽप्युच्चैर्घोषन्त्येनम् । पापिन आक्रन्दयते । अथच दैवासुरे युद्धे उच्चैर्घोषाय सिंहनादं कुर्वते । आक्रन्दयते युद्धाय आह्वानं कुर्वते । युद्धे च तान् रोदयते । पदातिषु सन्निधाय तेषामपि जयदानेन पालकाय । समानं सर्वत्र ॥

अथच सिंहनादेन राक्षसान् भीषयन्, अर्जुनरथे च स्थित्वा कौरवसेनाम्,

उच्चैर्घोषो हनुमान्। कौरवपक्षीयानाक्रन्दयन् भीमसेनः। पदातिरेव सन् समग्रं भारतं सञ्चरन्, पत्तीनां पतिर्मध्वः। अथच स्वेन सहाटतां पत्तीनामन्तेवासिनां स्वामी। ज्ञानयुद्धपत्तीनां चायं स्वामी॥ १२॥

अथ त्रयोदशः–'नम॑ः कृथ्स्नवी॒ताय॒ धाव॑ते॒ सत्व॑नां॒ पत॑ये॒ नम॑ः' इति। कृत्स्नैः शरणमिच्छद्भिः परिवीताय परिगताय नमः। निश्चलं स्थित एव धावत्सु धावति। 'आसीनो दूरं व्रजति शयानो याति सर्वतः' इति हि श्रुतिः। सत्वनां सात्विकानां पतये नमः। अथच कृत्स्नं जगद् वीतं व्याप्तं येन। कृत्स्नमन्ते वीतं भक्षितं येन। कृत्स्नं वीतं ज्ञातमस्य। वीतं जातमनेन। कृत्स्नमवितथं वीतं कान्तिरिच्छाऽस्य। कृत्स्नं वीतं प्रेरितमनेन। वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु। धावति, णिलुक्, धावयति पावयति सर्वमिति धावते। भक्तानां रक्षणाय च धावते। पवित्राणां पवित्रमित्येतत्। भक्तानां पातकानि शोधयते वा। सात्वतां पतये च कृष्णाय। समानं शङ्करेऽपि॥

कृत्स्नैः कपिभिः परिवीतो हनुमान्। रक्षोभिश्च सङ्ग्रामे। कृत्स्नो भगवान् वीतः सङ्गतोऽनेनेति च। परसैनिकेषु भीत्या धावत्सु पलायमानेषु तेषां पृष्ठतो धावते भीमाय। सात्विकजीवानां पतये मध्वाय च नमः। सत्वं ब्रह्म अनन्तीति सत्वानः सात्विकाः॥

इति त्रयोदशनमोवाकमेकोनाशीतिपदकमेकं यजुर्द्वितीयोऽनुवाकः॥ १३॥

इत्याचार्यगोविन्दस्य कृतिषु तैत्तिरीयरुद्रप्रपाठकद्वितीयानुवाकभाष्यम्॥

अत्रोदितानि नामानि–३७
एतदनुवाके पदानि–७९
संहत्य–२२२+७९=३०१

—०—

[तृतीयोऽनुवाकः]

नम॒स्सह॑मानायनिव्या॒धिन॑ऽआव्या॒धिनीना॒म्पत॑ये॒नमो॒ १

नम॑ःककु॒भाय॑निष॒ङ्गिणे᳚स्ते॒नाना॒म्पत॑ये॒नमो॒ २

नमो॑निष॒ङ्गिण॑ऽइषुधि॒मते॒तस्क॑राणा॒म्पत॑ये॒नमो॒ ३

नमो॒वञ्च॑तेपरि॒वञ्चतेस्ता॒यूनाम्पत॑ये॒नमो॒ ४

नमो॑निचे॒रवे॑परिच॒रायार॑ण्याना॒म्पत॑ये॒नमो॒ ५

नम॑स्सृका॒विभ्यो॒जिघा॑ꣳसद्भ्योमुष्ण॒ताम्पत॑ये॒नमो॒ ६

नमो॑सि॒मद्भ्यो॒नक्त॒ञ्चर॑द्भ्यᳶप्रकृ॒न्ताना॒म्पत॑ये॒नमो॒ ७

नम॑ऽउष्णी॒षिणे॑गिरिच॒राय॑कुलु॒ञ्चाना॒म्पत॑ये॒नमो॒ ८

नम॒ऽ(१)इषु॑मद्भ्योधन्वा॒विभ्य॑श्चवो॒नमो॒ ९

नम॑ऽआतन्वा॒नेभ्य॑ᳶप्रति॒दधा॑नेभ्यश्चवो॒नमो॒ १०

नम॑ऽआ॒यच्छ॑द्भ्योविसृ॒जद्भ्य॑श्चवो॒नमो॒ ११

नमोस्य॑द्भ्यो॒विद्ध्य॑द्भ्यश्चवो॒नमो॒ १२

नमऽआसीनेभ्यश्शयानेभ्यश्चवोनमो १३

नमस्स्वपद्भ्योजाग्रद्भ्यश्चवोनमो १४

नमस्तिष्ठद्भ्योधावद्भ्यश्चवोनमो १५

नमस्सभाभ्यस्सभापतिभ्यश्चवोनमो १६

नमोऽश्वेभ्योऽश्वपतिभ्य(२)श्चवोनमः ॥ ३ ॥ १७

नमः । सहमानाय । निव्याधिनइतिनि+व्याधिने । आव्याधि-नीनामित्या+व्याधिनीनाम् । पतये । नमः । नमः । ककुभाय । निषङ्गिणइतिनि+सङ्गिने । स्तेनानाम् । पतये । नमः । नमः । निषङ्गिणइतिनि+सङ्गिने । इषुधिमतइतीषुधि+मते । तस्कराणाम् । पतये । नमः । नमः । वञ्चते । परिवञ्चतइतिपरि+वञ्चते । स्तायूनाम् । पतये । नमः । नमः । निचेरवइतिनि+चेरवे । परिचरायेतिपरि+चराय । अरण्यानाम् । पतये । नमः । नमः । सृकाविभ्यइतिसृकावि+भ्यः । जिघांᳲसद्भ्यइतिजिघांᳲसत्+भ्यः । मुष्णताम् । पतये । नमः । नमः । असिमद्भ्यइत्यसिमत्+भ्यः । नक्तम् । चरद्भ्यइतिचरत्+भ्यः । प्रकृन्तानामितिप्र+कृन्तानाम् । पतये । नमः । नमः । उष्णीषिणे । गिरिचरायेतिगिरि+चराय । कुलुञ्चानाम् । पतये । नमः । नमः । (१) । इषुमद्भ्यइतीषुमत्+भ्यः । धन्वाविभ्यइतिधन्वावि+भ्यः । च । वः । नमः । नमः । आतन्वानेभ्यइत्या+तन्वानेभ्यः । प्रतिदधानेभ्य इतिप्रति+दधानेभ्यः । च । वः । नमः । नमः । आयच्छद्भ्य-इत्यायच्छत्+भ्यः । विसृजद्भ्यइतिविसृजत्+भ्यः । च । वः । नमः । नमः । अस्यद्भ्यइत्यस्यत्+भ्यः । विद्ध्यद्भ्यइतिविद्ध्यत्+भ्यः । च । वः । नमः । नमः । आसीनेभ्यः । शयानेभ्यः । च । वः । नमः । नमः । स्वपद्भ्यइतिस्वपत्+भ्यः । जाग्रद्भ्यइतिजाग्रत्+भ्यः । च । वः । नमः । नमः । तिष्ठद्भ्यइतितिष्ठत्+भ्यः । धावद्भ्यइतिधावत्+भ्यः । च । वः ।

नमः । नमः । सभाभ्यः । सभापतिभ्यइतिसभापति+भ्यः । च । वः । नमः । नमः । अश्वेभ्यः । अश्वपतिभ्यइत्यश्वपति+भ्यः (२) च । वः । नमः ॥ ३ ॥

(कुलुञ्चानाम्पतयेनमोनमोऽश्वपतिभ्यस्त्रीणि च)

इति तृतीयोऽनुवाकः

—०—

तृतीयोऽनुवाकोऽप्येकं यजुः । सप्तदश नमोवाकाः । शतं च त्रीणि च पदानि । अग्निरेवर्षिः । यजुष्ट्वान्न छन्दश्चिन्ता । अक्षरगणनया वा याजुषं छन्द ऊह्येत । रुद्रपदगदिताः शिवप्राणनारायणा देवताः ॥

केचिदाचक्षते–'अस्यानुवाकस्य महादेव ऋषिः । महादेव एव देवता । बृहती च्छन्दः' इति । पूर्वानुवाके द्रव्यविषयाण्युभयतोनमस्काराणि नामान्युक्तानि प्रायः । अत्र क्रियाविषयाणि ॥

तत्र प्रथमो नमोवाकः–'नमः सहमानाय निव्याधिने आव्याधिनीनां पतये नमः' इति । अयं मन्त्रार्थः । सहमानाय केनाप्यनभिभाव्याय नारायणाय नमः । 'अनभिभाव्यत्वं सह इत्युच्यते' इति हि स्मरन्ति । 'सर्वानभिभवन् सहमानः' इत्यपि व्याचक्षते । 'भक्तापराधसहिष्णुः' इति वा । मानेन सहितः सहमानः सर्ववेदवेद्यः । मकारो विष्णुवचनः । 'अकयप्रविसम्भूम–' इत्यादेः । तेन सह सदा वर्तमानोऽनः प्राणः सहमानः । मया रमया सहितः सहमो नारायणः अनः प्रेरकोऽस्येति वा । मो विष्णुरनः प्राणः । ताभ्यां नियामकाभ्यां सहितः सहमानः शिवः ॥

स्वयमनभिभाव्योऽपि देवशत्रून् नितरां विध्यति विध्वाऽभिभावयतीति निव्याधी नारायणः प्राणो रुद्रश्च । अस्य सेना अप्याव्याधिन्यः शत्रूणामित्या-व्याधिनीनां सेनानां पतये नमः ॥

रावणकृतं पुच्छदाहादिकमपराधं सहत इति सहमानो हनुमान् । कौरवसेनां निविध्यतीति निव्याधी भीमसेनः । आव्याधिन्यः प्रतिपक्षभेदिन्यो युक्तयस्तासां पतये मध्वाय नमः ॥ १ ॥

अथ द्वितीयो नमोवाकः–'नमः ककुभाय निषङ्गिणे स्तेनानां पतये नमः' इति । ककुभ इति महद्वचनः । ककुभाय महते देवाय नमः । सर्वतोऽपि महते नारायणाय । जीवेषु महते प्राणाय । इन्द्रादिभ्यो महते शिवाय । सर्वासु ककुब्सु दिक्षु भातीति ककुभः सर्वगतो नारायणः । विशेषतश्च रामावतारे । 'रामः पुरस्तात् परतोऽपि रामो रामः परं दिक्षु विदिक्षु रामः' इत्यादेः । कः आनन्दरूपः सन् कौ भूमाववतरन् भातीति च । कः वायुरपि कौ भूमाववतरन् भातीति ककुभः । वृषककुदि भातीति ककुभो नन्दिवाहनः शिवः ॥

ज्ञानिषु भक्तेषु नितरां सङ्गिने । 'ज्ञानी त्वात्मैव मे मतम्' , 'यो मद्भक्तः स मे प्रियः' इत्यादेः । समानं त्रिष्वपि ॥

अत एव स्तेनानां पतये महाचोराय नमः । तदुक्तम्–

'नारायणो नाम नरो नराणां प्रसिद्धचोरः कथितः पृथिव्याम् ।
'अनेकजन्मार्जितपापसञ्चयं हरत्यशेषं स्मृतमात्र एव' इति ॥

यथायथं प्राणश्च शिवश्च स्तेनानां पती एव ॥

रोदसी व्याप्य तिष्ठन् महान् हनुमान् ककुभः । भारतसङ्ग्रामे निषङ्गी भीमसेनः । नन्वर्जुनोऽपि निषङ्गी । सत्यम् । अर्जुनोऽपि निषङ्गी । किन्त्ववक्तव्यमेतत् । स किल गाण्डीवी । धनुर्युद्धे बाणाः, बाणाधारतया निषङ्गौ च भवन्त्येव । नह्यनिषङ्गी अनिषुर्धनुषा योद्धुमर्हति । भीमस्तु वस्तुतो गदायुधः । अथापि लीलया निषङ्गी भूत्वा धनुषाऽपि युयुध इति विशिष्य स्तूयते गदाधरोऽपि निषङ्गी बभूवेति । स्तेना इति ब्रह्मस्तेनाः । तदुक्तम्–'ब्रह्मस्तेना निरानन्दा अपक्रमनसोऽशिवाः' इति । अथ क इमे ब्रह्मस्तेना नाम? एतदप्युक्तम्– 'योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते । किं तेन न कृतं पापं

चोरेणाऽत्मापहारिणा' इति । पातयतीति पतिः । णिलुक् । ब्रह्मस्तेना-नामधःपातहेतुर्मध्वः । ब्रह्मस्तेनानां तामसानामन्धे तमसि पातनाय तथा बुद्धिप्रेरयिता चायमेवेति च स्तेनानां पतिरयम् ॥ २ ॥

अथ तृतीयो नमोवाकः– नमो निषङ्गिणे इषुधिमते तस्कराणां पतये नमः' इति । निषङ्ग इषुधिरिति कोशकाराः । नायमत्र श्रुतिविवक्षितोऽर्थः । 'इषुधिमते' इत्यनेन पौनरुक्त्यप्रसङ्गात् । तर्हि को विवक्षितोऽर्थः । निषङ्गिणे धनुर्धरायेति युक्तं वचः । निर्वचनसाम्यात् । निषज्यन्तेऽत्र शरा इति निषङ्गः । प्रयोगात् पूर्वं तूणीरे निषज्यन्ते । प्रयोगदशायां धनुषि निषज्यन्ते । तेन निषङ्ग इति तूणीरोऽपि धनुरपि । असुरदमनार्थं शार्ङ्गहस्ताय नमः । विशेषतः कोदण्डपाणये रामाय । 'निषङ्गिणे खड्गहस्ताय' इत्यपि व्याचक्षते । धनुर्हस्तत्वादेव बाणपूर्णे इषुधी चास्य स्त इतीषुधिमते च नमः । तत् शास्त्रगदितं स्वर्णस्तेयादिमहापातकं कुर्वन्तीति तत्करा एव तस्कराः । 'तद्-बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च' इति गणसूत्रेण (अ.सू.६.१. १५७) तत्करस्तस्करो बभूव । बृहत्पतिर्बृहस्पतिः । तस्कराणां तथा बुद्धिदानेन चौर्ये प्रेरयित्रे तस्कराणां पतये नमः । तत्तत्कर्मानुगुणं तस्कराणां नरकाद्यनर्थेषु पातयित्रे नमः । समानं सर्वत्रापि ॥

अथच रामपादनिषङ्गिणे, नीचै राक्षसैः सह सङ्गरे सङ्गिने हनुमते नमः । इषुधिमते भीमायेत्युक्तार्थम् । भीमस्य धनुर्युद्धं विस्मयावहमिति तात्पर्य-द्योतनाय पुनरुक्तिः । अथवा पूर्वोक्तदिशा निषङ्गिणे धनुर्धरायेत्यर्थः । इषुधिमत इति सतूणीरायेति । अतो न पुनरुक्तिः । भगवद्गुणतस्कराणां पातयित्रे, भगवद्भक्तपापतस्कराणां देवानां पतये मध्वाय च नमः ॥ ३ ॥

अथ चतुर्थो नमोवाकः–'नमो वञ्चते परिवञ्चते स्तायूनां पतये नमः' इति । सर्वं वञ्चति जानाति, सर्वत्र वञ्चति गच्छति वा । तस्मै वञ्चते सर्वगताय सर्वज्ञाय नमः । वञ्चु गतौ । चुरादौ वञ्चतिः प्रलम्भनार्थे पठ्यते । णिचो

लोपपक्षे वञ्चतीति च भवति । तथाच वञ्चते प्रतारके स्थित्वा तत्प्रेरकाय नमः । असुराणां स्वलीलानटनेन मिथ्याज्ञानं जनयित्वा वञ्चयते नमः । क्वचित् सतामपि अधिकपुण्यक्षयाय वञ्चयते । वञ्चत इत्युक्तमेव पुनः परिस्फुटमाह– परिवञ्चत इति । परिपूर्णं परिस्फुटं वञ्चति जानाति इत्यनन्तज्ञानः । सर्वगतायाश्चित्प्रकृतेरप्ययं पतिरिति परिवञ्चन् । परितो वञ्चके स्थितत्वाच्च । एवं तामसजीवान् परितः सर्वात्मना मोक्षसुखेन वञ्चितान् करोति । भगवानपि मातापितृभ्यां जायते, शितविशिखहतो रक्तसिक्तो भवति, पत्न्या वियुक्तो दुःखितो भवति, स्वकार्यसाधनार्थं मृषा वदति, तेन कपटिनामग्रणीरयं इत्यादिभ्रमजननेन परितो वञ्चयतीव । अन्तर्यामी सन्नन्तर्वञ्चति इति वञ्चन् सर्वान्तर्यामी । बहिश्च परितो वञ्चतीति सर्वगतः परिवञ्चन्निति वा । तदुक्तम्– 'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः' इति च । अथापि न दृश्यत इति वञ्चयन्नेव परिवञ्चति । तदेतदुक्तम्–'दोषशब्दाश्च विष्णवि' इति । लोके दोषवचनैरपि पदैर्भगवद्गुणानुसन्धानं महते पुण्यायेति समग्रो रुद्रानुवाकः दोषशब्दानेव प्रायो विचित्यविचित्य भगवन्तं स्तौतीत्यतिसुन्दरम् । ये कपटसाधुवेषाश्छद्मचारिणः सङ्घशो भवन्ति ते स्तायव उच्यन्ते स्त्यायन्तीति । 'स्त्यै शब्दसङ्घातयोः' । तेषामयं प्रेरकः पतिः । स्तायूनां पातकिनां पातयित्रे च नमः । अथ च ये सङ्घशः शब्द्यन्ते वसव इति विश्वेदेवा इति रुद्रा इत्यादित्या इति मरुत इति तेषां सर्वेषामयं पतिः । विशिष्य चैकोनपञ्चाशतः मरुतां गणस्य पतिः प्राणः । एकादशरुद्राणाम्, कोटिशः परिवारभूतानां रुद्राणां च पतिः शिवः ॥

अथ लङ्कां वञ्चते गच्छते रावणं च वञ्चयते हनुमते नमः । दुःशासनहृदयविदारणेन रुधिरं पिबन्निव दर्शयन् परितः स्थितानां कर्णादीनां भयजननेन परिवञ्चते भीमाय नमः । स्त्यायन्ति सर्वान् शब्दान् भगवद्गुण-परतयाऽनुसन्दधतीति स्तायवस्तेषां पतये मध्वाय नमः । अथ चान्ततः वेदद्रोग्धारश्छद्मवैदिकाः स्तायवस्तेषां पातयित्रे । 'मिथ्यातर्कैः कुहकेन्द्र-

जालैर्वैदिकेषु परिस्थातुमिच्छन्ति । न तैः सह संवसेत् । प्राकाश्या ह्येते तस्कराः' इति हि श्रुतिः ॥ ४ ॥

अथ पञ्चमो नमोवाकः–'नमो॑ निचे॒रवे॑ परिच॒रायार॑ण्याना॒ पत॑ये॒ नमः॑' इति । नितरां चरणशीलो निचेरुः । छान्दसमेत्वम् । निचेरुषु नित्यसञ्चरणशीलेषु यत्रसायङ्गृहेषु यतिषु स्थिताय नमः । ये गुरून् परिचरन्ति तेषु ब्रह्मचारिषु, येऽतिथीन् परिचरन्ति तेषु गृहस्थेषु स्थिताय परिचराय नमः । अरण्यानामिति तास्थ्यात् ताच्छब्द्यम् । अरण्यानामित्येव प्रतृण्णम् । अरण्यस्थितानां वानप्रस्थानां पतये नमः । आरण्यानामिति च शक्यं पदपाठः पठितुम् । अथच नीचैश्चरति वसुदेवादिषु परिचरति च तान् । नीचेष्वपि चरति । परिणतेष्वपि चरति । परितः सर्वं प्रळये चरति । आरण्यानां मृगाणां तपस्विनां च पतिः । 'नृसिंहाख्यः स आरण्याश्रयो मतः' इति हि स्मरन्ति । 'अथ यदूर्ध्वमपराह्णात् प्रागस्तमयात् स उपद्रवस्तदस्याऽरण्या अन्वायत्तास्तस्मात् ते पुरुषं दृष्ट्वा कक्षं श्वभ्रमित्युपद्रवन्ति' इति हि श्रुतिः । 'दुष्टोपद्रवकर्तृत्वान्नरसिंह उपद्रवः' इति, 'कक्षश्वभ्रे नृसिंहस्य सदाऽवस्थितिकारणात् । द्रवन्ति कक्षश्वभ्राभ्यां तदज्ञानेऽपि रक्षणात् । मृगा भीता यतस्तेषां नृसिंहः स्वाश्रयः सदा' इति च सामसंहितावचनम् । यथायथं समानं प्राणरुद्रयोः ॥

लङ्कायां सीतान्वेषणार्थं गृहाद् गृहं नितरां चरन् हनुमान् निचेरुः । 'चतुरङ्गुलमात्रोऽपि नावकाशः स विद्यते । रावणान्तःपुरे तत्र यं कपिर्न जगाम सः' इति रामायणे । कौरवसेनायाः परितश्चरन् परिचरो भीमसेनः । आरण्यानां मुनीनामपि मार्गदर्शक आनन्दतीर्थो मुनिः ॥ ५ ॥

अथ षष्ठो नमोवाकः–'नमः॑ सृका॒विभ्यो॒ जिघां॑ꣳसद्भ्यो मुष्ण॒तां पत॑ये॒ नमः॑' इति । 'सृकमिति वज्रमुच्यते' इति भट्टभास्करादयः । 'सृका आयुध-विशेषः' इति भोजराजीयोणादिसूत्रवृत्तौ दण्डनाथः । 'धावति ससर्तीति वा सृकः वायुः बाणो वा' इति दशपादिकावृत्तिकारः । सरति शत्रूनिति सृकमि-

त्यायुधसामान्यमुच्यत इति युक्तं वचः । सृकानि चक्रगदाशूलादीन्यायुधानि सन्त्येषामिति सृकाविनः । 'बहुलं छन्दसि' (अ.सू.५.२.१२२) इति मत्वर्थीयश्छान्दसो विनिः । 'अन्येषामपि दृश्यते' (अ.सू.६.३.१३७) इति दीर्घः । सृकेन विध्यन्तीति सृकाविधः । तेभ्यः सृकाविद्भ्यः । छान्दसो दलोपः इति वा । 'नहि-वृति-वृषि-व्यधि-रुचि-सहि-तनिषु क्वौ' (अ.सू.६.३.११६) इति पूर्वपदवृद्धिः । अथवा सृकैरायुधैरवन्ति स्वजनमिति सृकाविनः । 'सुप्यजातौ णिनिस्ताच्छील्ये' (अ.सू.३.२.७८) इति ताच्छील्यार्थो णिनिः । बहुरूपत्वाद् बहुवचनम् । दुष्टान् दैत्यान् जिघाꣳसद्भ्यः, देवेभ्योऽर्थे । 'ब्रह्म ह देवेभ्यो विजिग्ये' इति हि श्रुतिः । 'स्थित्वा देवेषु तद् ब्रह्म व्यजयद् दैत्यदानवान्' इति च स्मृतिः । अथच सृकाविनः वज्राद्यायुधवन्त इन्द्राद्या देवाः । तेषु सन्निहितेभ्यो भगवद्रूपेभ्यो नमः । एवं दैत्यदानवान् जिघांसत्सु देवेषु सन्निहितेभ्यो भगवद्रूपेभ्यश्च । एवं तामसानां पुण्यं मुष्णतां तत्वमानिनां देवानां पतये नमः ॥

एवं मारकायुधधारिणः सन्तः दुर्गमेषु गिरिगह्वरेषु स्थित्वा पुण्यक्षेत्रयात्रिकान् जिघांसन्ति, मुष्णन्ति च तेषां सर्वस्वं तेषामाततायिनामप्ययमन्तर्नियन्ता । समानमेतत् प्राणरुद्रयोरपि ॥

वज्रतुल्यनखाः सृकाः । तद्वन्तः कपयः सृकाविनः । तेषु सन्निहितेभ्यो हनुमद्रूपेभ्यो नमः । अयमेव हि प्राणावतारत्वात् तेषु सन्निहितो रक्षोभिर्युयुधे । एवं न केवलं स्वयम्, किन्तु पाण्डवसैन्येषु च सन्निधाय कौरवसेनां जिघांसद्भ्यो भीमरूपेभ्यो नमः । तथा तमोऽज्ञानं वा मुष्णतां तत्ववादिनां पतये मध्वाय नमः ॥ ६ ॥

अथ सप्तमो नमोवाकः–'नमो॑ऽसि॒मद्भ्यो॒ नक्तं॒ चर॑द्भ्यः प्रकृ॒न्ताना॒ं पत॑ये॒ नमः॑' इति । असिमत्सु स्थितेभ्यः, स्वयं चासिधरेभ्यो भगवद्रूपेभ्यो नमः । 'सर्वशस्त्रभृतां वरः' इति हि स्मरन्ति । 'दरारिचर्मासिगदेषुचापपाशान्

दधानोऽष्टगुणोऽष्टबाहुः' इति च । एवं प्राणरुद्रयोः । अथचासिरसनं दोषनिरसनम् । तद्वन्तश्चासिमन्तः । अथचासिरिति वरणास्यां परितः प्रवहन्ती काचन नदी । तद्वद्भ्यो काशीनिलयेभ्यो रुद्ररूपेभ्यः । कानि तानि रुद्ररूपाणि? एकादश भागवतोक्तानि–'मन्युर्मनुर्महानासो महान् शिव ऋतध्वजः । मरुरेता भवः कालो वामदेवो धृतव्रतः' इति । एतेनासिमद्भ्यो रुद्रानुचरेभ्यो नम इति वदन्तः परास्ताः । मुख्ये सम्भवत्यमुख्यार्थ-स्वीकारायोगात् । न केवलं देवेषु स्थित्वा तेभ्यो जयं ददौ, असुरेषु स्थित्वा तेषां पराजयं चायमेव ददावित्याह– नक्तश्चरद्भ्य इति । रक्षसामन्तस्थित्वा तन्नियामकेभ्यो भगवद्रूपेभ्यो नमः । एतदप्युक्तम्–'निर्गुणोऽपि ह्यजोऽव्यक्तो भगवान् प्रकृतेः परः । स्वमायागुणमाविश्य बाध्यबाधकतां गतः' इति । नक्तश्चरद्भ्य इत्येकं वा पदम् । नाक्ता अलिप्ताः सर्वत्र चरन्तीति च नक्तंचरन्तः न्यासिनः । दीर्घलोपः । बिन्दुरवधारणे । तेषु स्थिताय नमः । प्रकृन्ताः ये हत्वा मुष्णन्ति । तेषु स्थित्वा तैस्तथाविधं कर्म कारयति नारायणः प्राणः रुद्रश्च । रुद्रस्य तमोमानित्वात् तदधिष्ठाने दोषपदानां भगवति चिन्तनम् । अथच स्वान्तध्वान्तं प्रकर्षेण कृन्तन्तीति प्रकृन्ताः ज्ञानिनः । कृती छेदने । तेषां पतये । एक एव बहुरूप इत्यन्ते एकवचनेनोपसंहारः । तत्तत्पतित्वेनैव तत्तत्पद-वाच्यत्वमिति चान्ते पतिशब्दः ॥

रक्षसस्त्रिशिरसो हस्तादसिमाच्छिद्य तेनैव तं जघानेत्यसिमान् हनुमान् । गौरवाद् बहुवचनम् । जतुगृहान्नक्तमेव निर्गत्य मातरं भ्रातॄंश्च ररक्षेति नक्तं चरन् भीमः । गौरवाद् बहुवचनमिति सूचयन्नेकवचनेनोपसंहरति– ये संसारवृक्षं प्रकृन्तन्ति तेषां पतये मध्वाय नम इति ॥ ७ ॥

अथाष्टमो नमोवाकः–'नम॑ उष्णी॒षिणे॑ गिरि॒चराय॑ कुलु॒ञ्चाना॒ं पत॑ये॒ नमः॑' इति । उष्णीषमिति शिर उच्यते । उष्णीषमिति शिरोवेष्टनं वास उच्यते । उष्णीषमिति किरीटमुच्यते । उष्णीषिणे प्रशस्तशिरसे नमः । प्राशस्त्यं च ज्ञानानन्द-

मयत्वम् । उष्णीषाण्यस्य सन्तीति अनन्तशिरस्त्वं च । शिर इति सर्वाङ्गोपलक्षणम् । अथचोष्णीषिणे दिव्यकिरीटिने । स्मरन्ति हि–'केयूरवान् मकरकुण्डलवान् किरीटी' इति । किरीटमिति सर्वाभरणोपलक्षणम् । अथच य उष्णीषिणः वासोवेष्टितशिरसः तेषु स्थिताय नागरिकेषु । अथ च ये पुनरज्ञातनगरजीवना वनेषु गिरिषु चरन्तो गिरिजनास्तेषु च स्थिताय गिरिचराय । अथच ये तस्कराः, मा नो जनाः परिचैषुरिति वाससा वेष्टितशिरसः साधूनिवात्मनो दर्शयित्वा चौर्यादिकमसाधु कर्म चरन्ति तेषु स्थित्वा तत्प्रेरकाय । ये च गिरिदुर्गेषु चरन्तः क्षेत्रयात्रिकान् लुण्टन्ति तेषु स्थित्वा तैस्तत्कर्म कारयित्रे गिरिचराय नमः । अथच उष्णं संसारतापमीषते नाशयतीति उष्णीषी । 'ईष गतिहिंसादर्शनेषु' । ब्रह्मणो गिरिरिति शिर उच्यते । तत्र चक्षुः श्रोत्रं मनो वाक् प्राण इति पञ्चात्मा चरतीति गिरिचरः । रामावतारे विशेषतः गिरिचरः । गिरौ कैलासे चरतीति गिरिचरः शिवः । कुं भूमिं लुञ्चन्त्यपहरन्तीति कुलुञ्चाः, दुर्योधनादिवत् परेषां भूमेरपहर्तारः । कुत्सिता वा लुञ्चकाः । कुललुञ्चका वा । लुञ्च अपनयने । तेषामप्ययं प्रवर्तकः स्वामी । अथ चैवंविधानां कुलुञ्चानां पातयित्रे च नमः । णिलुक् । कुत्सितं संसारं लुञ्चन्तीति कुलुञ्चास्तत्वमानिनस्तेषां च पतये नमः । अथच उष्णीषी अग्निगतः । गिरिचरो वायुगतः । कुलुञ्चानां पतिरादित्यगतः ॥

उष्णेन स्वपुच्छगेन वह्निना लङ्कां हिनस्तीति उष्णीषी हनुमान् । कौरवसेनामध्ये गिरिरिवाचलश्चरतीति गिरिचरो भीमः । कुत्सितं पापं लुञ्चन्तीति कुलुञ्चा वेदास्तेषां पतिर्मध्वः ॥ ८ ॥

अथ नवमो नमोवाकः–'नम॒ इषु॑मद्भ्यो धन्वा॒विभ्य॑श्च वो॒ नमः॑' इति । अवसिताः परोक्षमन्त्राः । इतः परमाचतुर्थानुवाकान्तं प्रत्यक्षमन्त्रा वो युष्मभ्यं नम इति । एवमवसितास्त्रिनामानो मन्त्राः । इतः परं द्वाभ्यान्द्वाभ्यां नामभ्यां

प्रस्तौति । अथ मन्त्रार्थः– इषुमद्भ्यः इषुहस्तेषु स्थितेभ्यः भगवद्रूपेभ्यो नमः । धन्वाविभ्यो धनुर्हस्तेषु स्थितेभ्यश्च नमः । धन्वावीति 'बहुलं छन्दसि' (अ.सू.५.२.१२२) इति मत्वर्थीयो विनिः । 'अन्येषामपि दृश्यते' (अ.सू. ६.३.१३७) इति दीर्घः । धन्वनाऽवन्ति स्वभक्तानिति वा धन्वाविनः । शार्ङ्गधन्वा नारायणः । विशेषतश्च भार्गवराघवकृष्णा धन्वाविनः । पिनाकधन्वा शिवः । स्वयं भीमः युधिष्ठिरादिषु सन्निहितानि चत्वारि रूपाणीति वायोः पञ्च रूपाणि विशिष्योल्लिखति– इषुमद्भ्यो धन्वाविभ्यो नम इति ॥

अथ च युक्तिरूपामिषुं श्रुत्याख्यधनुषि संयोज्य ये युध्यन्ते तेषां नियामकाः नारायणप्राणशिवाः ॥ ९ ॥

अथ दशमो नमोवाकः–'नम॑ आतन्वा॒नेभ्यः॑ प्रति॒दधा॑नेभ्यश्च वो॒ नमः॑' इति । वो रुद्रप्राणनारायणेभ्यो नमः । कीदृशेभ्यः? आतन्वते आरोपयन्ति ज्यामित्यातन्वानास्तेभ्यः । प्रतिदधते सन्दधते बाणमिति प्रतिदधानास्तेभ्यः ॥

आतन्वते विस्तारयन्ति श्रुतिवचनैः प्रमेयजातमित्यातन्वानाः । दुर्वादिनां दुर्वचसां प्रतितर्कैः प्रतिवचनं दधत इति प्रतिदधानाः । तन्नियामकेभ्यो नमः ॥ १० ॥

अथैकादशो नमोवाकः–'नम॑ आ॒यच्छ॑द्भ्यो विसृ॒जद्भ्य॑श्च वो॒ नमः॑' इति । आयच्छद्भ्यः धनुषि बाणं सन्धाय ज्यामाकर्षद्भ्यः । बाणान् विसृजद्भ्यश्च । तेषु सन्निधाय तत्तत्कर्मप्रवर्तकेभ्यो वो नमः ॥

अथच रहस्यप्रमेयाणि आयच्छद्भ्यः निगूहमानेभ्यः । अवश्यं वक्तव्यानि विसृजद्भ्य उपदिशद्भ्यश्च ॥ ११ ॥

अथ द्वादशो नमोवाकः–'नमोऽस्य॑द्भ्यो॒ विद्ध्य॑द्भ्यश्च वो॒ नमः॑' इति । विसृष्टं शरमस्यद्भ्यः शत्रुदेहे क्षिपद्भ्यः । असु क्षेपणे । नानाविधान्यायुधानि शक्त्यादीन्यस्यद्भ्यो वा । शत्रूंस्तेन विद्ध्यद्भ्यः ताडितान् कुर्वद्भ्यश्च वो नमः ।

आ नवमादा द्वादशमिमे चत्वारो मन्त्राः किरातरूपस्य शिवस्यार्जुनेन युद्धवार्तां कथयन्तीव ॥

अथच ज्ञानयुद्धे प्रतिवादिमत्तेभकुम्भदलनान् तर्कानस्यद्भ्यः, तेन तान् विद्धान् कुर्वद्भ्यश्च वो नमः ॥ १२ ॥

अथ त्रयोदशो नमोवाकः– 'नम॒ आसी॑नेभ्यः शया॑नेभ्यश्च॒ वो॒ नमः॑' इति । आसीनेषु शयानेषु च स्थितेभ्यो रुद्रप्राणनारायणेभ्यो नमः । एवं विरुद्धक्रियानियामकत्वमितस्त्रिभिराह । अथ च नारायणः– 'आसीनो दूरं व्रजति शयानो याति सर्वतः' इति च श्रुतिः । प्राणश्च भगवता सह सर्वजीवहृदय आसीनः । सप्तविद्यासु शयानः । 'आ शये सप्तशिवासु मातृषु' इति हि श्रुतिः । मनोमानित्वाच्छिवश्च हृदय आसीनः शास्त्रेषु शेते । तमसा शाययति च जीवम् । अथच प्राणावताराः– सदा रामचरणसविध आसीनः । युवराजपद-व्यामासीनः । व्याससविधे आसीनः । सर्वेऽपि सर्वशास्त्रेषु शयाना अनायासेन विहरन्तः ॥ १३ ॥

अथ चतुर्दशो नमोवाकः– 'नमः॑ स्वप॒द्भ्यो॒ जाग्र॑द्भ्यश्च वो॒ नमः॑' इति । तत्तदवस्थाप्रेरकेभ्यो रुद्रप्राणनारायणेभ्यो नमः । प्रळयकाले योगनिद्रया स्वपन् जीवांश्च स्वापयन्, सदा जाग्रत् सतश्च स्वरूपे जागरयन् भगवान् । त्रीणि प्राणरूपाणि, त्रिविधाहङ्कारमानीनि रुद्ररूपाणि सुखरूपस्य भगवतः प्राप्तिरूपं स्वापं कुर्वन्ति स्वपन्तीत्युच्यन्ते । अत एव सदा जाग्रति च ॥ १४ ॥

अथ पञ्चदशो नमोवाकः– 'नम॒स्तिष्ठ॑द्भ्यो॒ धाव॑द्भ्यश्च वो॒ नमः॑' इति । तिष्ठत्सु धावत्सु च सन्निहितेभ्यो रुद्रप्राणनारायणेभ्यो नमः । सर्वविरुद्धधर्मोपलक्षणम् । अथच स्थाणुरिवाचलो भगवान् । 'नित्यः सर्वगतः स्थाणुः' इति हि भगवद्वचनम् । 'मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि' इति वचनाद्वा तिष्ठद्भ्यः । अत एव भक्तानुग्रहाय धावद्भ्यो गजेन्द्रमोक्षणायेव । अथच प्राणरुद्रौ–

भगवत्येव तिष्ठद्भ्यः, यत्र भगवद्भक्तास्तत्र धावद्भ्यश्च । गौरवाद्, बहुरूपत्वाद्वा बहुवचनम् ॥ १५ ॥

अथ षोळशो नमोवाकः– 'नमः॑ स॒भाभ्यः॑ स॒भाप॑तिभ्यश्च वो॒ नमः॑' इति । वादजल्पवितण्डारूपाः सभाः प्रचलन्ति । तत्ववादसभाः प्रचलन्ति । अतत्ववादसभाः प्रचलन्ति । तत्र सभापतिर्निर्णयं ददाति । वस्तुतस्तु न वादिनो विवदन्ते, नापि सभापतयो निर्णयं ददति । तेषु सन्निहिता रुद्रप्राणनारायणा एव विवदमाना इव निर्णयं ददाना इवान्तर्विहरन्तो विलसन्ति । एवं देवसभासु च देवेषु स्थित्वा सभापताविन्द्रे च सन्निधाय । भगवत्पक्षे वायुचतुर्मुखौ च सभापती । अथच भगवद्रूपैः सह भान्तीति सभा वायो रुद्रस्य च मूर्तयः । रामेण सह भान् हनुमान् । कृष्णेन भीमः । बादरायणेन मध्वः । वानरसभापति-र्हनुमान् । क्षत्रसभापतिर्भीमः । विद्वत्सभापतिर्मध्वः ॥ १६ ॥

अथ सप्तदशो नमोवाकः– 'नमो॒ अश्वे॒भ्योऽश्व॑पतिभ्यश्च॒ वो॒ नमः॑' इति । 'नमःपूर्वोऽग्रेऽश्वेभ्योऽश्वियाय' (१.११.१४) इति तैत्तिरीयप्रातिशाख्यम् । नमःशब्दात् परस्य अश्वेभ्य इत्यस्याकारो न लोपमापद्यत इति । तेन नमो अश्वेभ्य इत्योकारात् परस्याकारस्य नलोपः । मनुष्यकर्माणि अनुसंहितानि । अथ प्राणितत्पालककर्माणि च भगवदधीनानीत्यनेनाऽह । अश्वा इति प्राणिमात्रोपलक्षणम् । अश्वगजगवादिषु तत्पतिषु साद्याधोरणगोपालादिषु स्थितेभ्यो रुद्रप्राणनारायणेभ्यो नमः । भगवानेवाश्वे सन्निधाय सादिनं वहति । सादिनि सन्निधायाश्वं दमयति वाहयति चेति विचित्रेयं भगवल्लीला । एवमाशु वानाद् गतेरश्वो भगवान् । हयग्रीवत्वाच्च । रामकृष्णादिरूपेष्वश्वपतयश्च अश्वेषु स्थित्वा पतन्ति गच्छन्तीति । देहाख्यरथेऽश्वमुखो वायुः शास्त्रेषु पठ्यते । इन्द्रियाश्वानां पतिश्च । मनोमानित्वादाशु वं तत्वज्ञानमनेनेत्यश्वः शिवः । अश्वानामिन्द्रियदेवानामिन्द्रादीनां पतिश्चायम् । 'इन्द्रियाणि हयानाहुः' इति हि श्रुतिः ॥

अथच लङ्कां प्रत्याशुवानादश्वो हनुमान् । शत्रुसेनां प्रत्याशु वानाद् भीमः । दुर्वादिनः प्रत्याशुवानान्मध्वः । अश्वो भगवान् पतिर्येषां तेऽश्वपतयः । अथचाऽशु वेदेषु चरन्तोऽश्वा विपश्चितः । तेषामेते पतयः ॥ १७ ॥

इत्याचार्यगोविन्दस्य कृतिषु तैत्तिरीयरुद्रप्रपाठकतृतीयानुवाकभाष्यम् ॥

—०—

अत्रोदितानि नामानि—४२
संहत्य—३७+४२=७९
पदानि—१०३
संहत्य—३०१+१०३=४०४

[चतुर्थोऽनुवाकः]

नम॑ऽआव्या॒धिनी᳚भ्योवि॒विद्ध्य॑न्तीभ्यश्चवो॒नमो॒ १
नम॒ऽउग॑णाभ्यस्तृꣳह॒तीभ्य॑श्चवो॒नमो॒ २
नमो॑गृ॒त्सेभ्यो॑गृ॒त्सप॑तिभ्यश्चवो॒नमो॒ ३
नमो॒व्राते᳚भ्यो॒व्रात॑पतिभ्यश्चवो॒नमो॒ ४
नमो॑ग॒णेभ्यो॑ग॒णप॑तिभ्यश्चवो॒नमो॒ ५
नमो॒विरू॑पेभ्योवि॒श्वरू॑पेभ्यश्चवो॒नमो॒ ६
नमो॑म॒हद्भ्य॑ᳵक्षुल्ल॒केभ्य॑श्चवो॒नमो॒ ७
नमो॑र॒थिभ्यो॑र॒थेभ्य॑श्चवो॒नमो॒ ८
नमो॒रथे᳚भ्यो॒(१)रथ॑पतिभ्यश्चवो॒नमो॒ ९
नम॒स्सेना᳚भ्यस्सेना॒निभ्य॑श्चवो॒नमो॒ १०
नम॑ᳵक्ष॒त्तृभ्य॑स्सङ्ग्रही॒तृभ्य॑श्चवो॒नमो॒ ११
नम॒स्तक्ष॑भ्योरथका॒रेभ्य॑श्चवो॒नमो॒ १२
नम॒ᳵक्कुला॑लेभ्यᳵक्क॒म्मारि᳚भ्यश्चवो॒नमो॒ १३

नम॑ःप्पुञ्जि॒ष्टे॑भ्योनिषा॒देभ्य॑श्चवो॒नमो॒ १४
नम॑ऽइषुकृ॒द्भ्योधन्व॒कृद्भ्य॑श्चवो॒नमो॒ १५
नमो॑मृग॒युभ्य॑श्श्व॒निभ्य॑श्चवो॒नमो॒ १६
नम॒श्श्वभ्य॒श्श्वप॑तिभ्यश्च(२)वो॒नम॑ः ॥ ४ ॥ १७

नम॑ः । आ॒व्या॒धिनी॑भ्य॒इत्या॑+व्या॒धिनी॑भ्यः । वि॒वि॒द्ध्यन्ती॑भ्य॒इति॑वि+ वि॒द्ध्यन्ती॑भ्यः । च॒ । व॒ः । नम॑ः । नम॑ः । उग॑णाभ्यः । तृ॒ꣳह॒तीभ्य॑ः । च॒ । व॒ः । नम॑ः । नम॑ः । गृ॒त्सेभ्य॑ः । गृ॒त्सप॑तिभ्य॒इति॒गृत्सप॑ति+भ्य॒ः । च॒ । व॒ः । नम॑ः । नम॑ः । व्रातेभ्य॑ः । व्रात॑पतिभ्य॒इति॒व्रात॑पति+भ्य॒ः । च॒ । व॒ः । नम॑ः । नम॑ः । ग॒णेभ्य॑ः । ग॒णप॑तिभ्य॒इति॑ग॒णप॑ति+भ्य॒ः । च॒ । व॒ः । नम॑ः । नम॑ः । विरू॑पेभ्य॒इति॒वि+रू॒पे॒भ्य॒ः । वि॒श्वरू॑पेभ्य॒इति॑वि॒श्व+ रू॒पेभ्य॒ः । च॒ । व॒ः । नम॑ः । नम॑ः । म॒हद्भ्य॒इति॑म॒हत्+भ्य॒ः । क्षु॒ल्ल॒केभ्य॑ः । च॒ । व॒ः । नम॑ः । नम॑ः । र॒थिभ्य॒इति॑र॒थि+भ्य॒ः । अ॒र॒थेभ्य॑ः । च॒ । व॒ः । नम॑ः । नम॑ः । रथे॑भ्यः(१) । रथ॑पतिभ्य॒- इति॒रथ॑पति+भ्य॒ः । च॒ । व॒ः । नम॑ः । नम॑ः । सेना॑भ्यः । से॒ना॒निभ्य॒- इति॑से॒ना॒नि+भ्य॒ः । च॒ । व॒ः । नम॑ः । नम॑ः । क्ष॒त्तृभ्य॒इति॑क्ष॒त्तृ+भ्य॒ः । स॒ङ्ग्र॒ही॒तृभ्य॒इति॑सङ्ग्र॒ही॒तृ+भ्य॒ः । च॒ । व॒ः । नम॑ः । नम॑ः । तक्ष॑भ्य॒इति॒- तक्ष॑+भ्य॒ः । र॒थ॒का॒रेभ्य॒इति॑र॒थ+का॒रेभ्य॑ः । च॒ । व॒ः । नम॑ः । नम॑ः । कुला॑लेभ्यः । क॒र्मा॒रेभ्य॑ः । च॒ । व॒ः । नम॑ः । नम॑ः । पु॒ञ्जि॒ष्टेभ्य॑ः । नि॒षा॒देभ्य॑ः । च॒ । व॒ः । नम॑ः । नम॑ः । इ॒षु॒कृद्भ्य॒इती॑षुकृ॒त्+भ्य॒ः । ध॒न्व॒कृद्भ्य॒इति॒धन्व॒कृत्+भ्य॒ः । च॒ । व॒ः । नम॑ः । नम॑ः । मृ॒ग॒युभ्य॒इति॑मृग॒यु+भ्य॒ः । श्व॒निभ्य॒इति॑श्व॒नि+भ्य॒ः । च॒ । व॒ः । नम॑ः । नम॑ः । श्वभ्य॒इति॒श्व+भ्य॒ः । श्वप॑तिभ्य॒इति॒श्वप॑ति+भ्य॒ः । च॒ (२) । व॒ः । नम॑ः ॥ ४ ॥

(रथे॑भ्यः॒श्वप॑तिभ्यश्च॒ द्वे च॑)

इति चतुर्थोऽनुवाकः

—०—

समग्रश्चतुर्थोऽनुवाकः सप्तदशनमोवाकात्मकमेकं यजुः । शतं द्वे च पदानि । ऋष्यादिकं च पूर्ववत् । केचित्तु अस्यानुवाकस्य 'दुर्वासा ऋषिः, उष्णिक् छन्दः, शम्भुर्देवता' इत्याहुः ॥

तत्र प्रथमो नमोवाकः– 'नम॑ आव्या॒धिनी॑भ्यो वि॒विद्ध्यन्ती॑भ्यश्च वो॒ नम॑ः' इति । आ समन्ताद् विध्यन्तीत्याव्याधिन्यो व्याधसेनाः । ता एव विविधं विध्यन्तीति विविध्यन्त्यः । व्याधस्त्रियः । तासु स्त्रीरूपा भगवन्मूर्तयः । ताभ्यो नमः । व्याधरूपस्य रुद्रस्य परिवारभूता देवताशक्तयश्च ताः । ताभ्यश्च नमः । वायोस्त्रिमूर्तयश्च । बाहुबलेन सेनाबलेन चाऽव्याधिन्यो विविध्यन्तीति पूर्वरूपद्वयम् । युक्तिबलेन तृतीया तनुः ॥ १ ॥

अथ द्वितीयो नमोवाकः– 'नम॒ उग॑णाभ्यस्तृꣳह॒तीभ्य॑श्च वो॒ नम॑ः' इति । उकार उत्कर्षवचनः । उत्कृष्टो गणो यासां ता उगणा गणदेवताः । वसवः, विश्वेदेवाः, रुद्राः, आदित्याः, मरुत इति । उगणाः सप्तमातृका वा । तद्गताभ्यो भगवन्मूर्तिभ्यः प्राणमूर्तिभ्यो रुद्रमूर्तिभ्यश्च वो नमः । अथच गण इति सेनासन्निवेशभेदः । त्रिगुणा पत्तिः सेनामुखम् । त्रिगुणं सेनामुखं गुल्मः । त्रिगुणो गुल्मो गण इति । उत्कृष्टा गणा यासु ता व्याधसेनाः । ता एव मृगाणां तृंहत्यः हिंसाजनन्यः । तृंहु हिंसायाम् । अथवा उगणा अप्सरसः उत्तम- गणिकाः । तृंहत्यश्चामुण्डीधूमावत्यादयः । तद्गताः नारायणप्राणरुद्रमूर्तयः ॥

उत्कृष्टा गतिर्णो बलं चासामित्युगणा वायोस्त्रिमूर्तयः । शत्रुसेनां तृंहत्यावाद्ये । दुर्वादान् तृंहती तृतीया तनुः ॥ २ ॥

अथ तृतीयो नमोवाकः– 'नमो॑ गृ॒त्सेभ्यो॑ गृ॒त्सप॑तिभ्यश्च वो॒ नम॑ः' इति । गृध्यन्ति परस्वमिति गृत्सा गृध्नवः । गृधु अभिकाङ्क्षायाम् । गृधेः सः प्रत्ययः, धकारस्य दकार आदेश इति वैयाकरणाः । तेषु स्थित्वा तेषां तादृशीं बुद्धिं जनयद्भ्यो नारायणप्राणरुद्रेभ्यो नमः । तेषां पालका गृत्सपतयः । यथा गृत्सा

दुर्योधनादयः । तेषां पालका अनुमन्तारो धृतराष्ट्रादयः कर्णादयश्च । तेषु स्थितेभ्यश्च नमः । 'गृत्सन्ति बुद्धिमत्तया जीवन्तीति गृत्सा मेधाविनः' इत्यपि व्याचक्षते । गर्धयन्तीति च गृत्साः । णिलुक् । गर्धयतां तत्वदेवानां पतयश्च । अथच गृणन्ति उपदिशन्ति भगवन्तमिति गृत्सा गुरवः । तेषु स्थितेभ्यो नमः । गृत्सानां पतयो जगद्गुरवः महाचार्याः । 'कृष्णं वन्दे जगद्गुरुम्' इति च स्म हि स्मरन्ति । गृणन्त्येनमिति गृत्सो भगवान् । जगद्गुरौ प्राणे स्थितत्वाच्च । 'प्राणो वै गृत्सः' इत्यैतरेयी श्रुतिः । गृत्सस्य प्राणस्य पतिश्च भगवान् । बहुरूपत्वाद् बहुवचनम् । गृणतां स्तुवतां पालकत्वाच्च गृत्सपतयः । गॄ शब्दे ॥

अन्ते गिरन्ति जगदिति संहारकत्वाद्वा गृत्सा नारायणप्राणरुद्राः । गॄ निगरणे । गृत्सानां देवानां पतयश्च । अथच गृत्सा वायोस्त्रिमूर्तयः । रक्षांसि गिलति । कौरवसेना गिलति । दुर्वादांश्च गिलति । गृत्सानां गिलतां पतयश्च ते ॥ ३ ॥

अथ चतुर्थो नमोवाकः–'नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमः' इति । विभिन्नगुणकर्मणां जनानां समुदाया व्राताः । व्रातपतयश्च तेषां नेतारः । तत्र गतेभ्यो नमः । व्रतनिष्ठा वा व्राताः । गुणानां व्रात एषामस्तीति व्राताः । चेतनव्रातपतयश्च यथासम्भवम् । समानं सर्वत्र ॥ ४ ॥

अथ पञ्चमो नमोवाकः–'नमो गणेभ्यो गणपतिभ्यश्च वो नमः' इति । भूतगणेभ्यः गणपतिभ्यश्च । तद्गतेभ्यो वो नमः । इन्द्रियगणा इति तदभिमानिदेवगणाः तन्नियामकेभ्यो नमः । जीवगणस्य पतिभ्यश्च वो नमः । 'गणानां त्वा गणपतिं हवामहे' इति श्रुतिः । गणनीयेभ्यः ज्ञानानन्दादि-गुणगणेभ्यः । गुणरूपेभ्यः । देवगणपतिभ्यश्च । इन्द्रियगणस्य पतय इति पश्चात्मा प्राणः । गकारो ज्ञानवचनः । णश्च निर्वृतिवाचकः । ज्ञानानन्द-स्वरूपेभ्यो नमः । वानरगणपतिर्हनुमान् । पाण्डवसेनागणपतिर्भीमः । तत्ववादिगणपतिर्मध्वः ॥ ५ ॥

अथ षष्ठो नमोवाकः–'नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमः' इति । विगतभौतिकरूपेभ्यः अनन्तरूपेभ्यश्च भगवद्भ्यः । 'अविकारिणे स्फुट-मनन्तरूपिणे' इति हि स्मरन्ति । अथच विकृतरूपेषु रक्षोभूतपिशाचादिषु स्थितेभ्यः, वृकव्याघ्रादिनानारूपेषु स्थितेभ्यश्च वो नमः । अथच विरूपेभ्यः मत्स्यकूर्मादिविविधरूपेभ्यः । विश्वमेव रूपं प्रतीकं येषाम् । 'इदं हि विश्वं भगवानिवेतरः' इति हि भागवते । विश्वेषु समस्तजीवेषु बिम्बरूपं येषाम् । ये च विश्वं रूपयन्ति । अथच विरूपाः कपिः क्षत्रियो यतिरिति विविधरूपाः । विश्वं विष्णुं भक्तेभ्यो निरूपयन्ति च ॥ ६ ॥

अथ सप्तमो नमोवाकः–'नमो महद्भ्यः क्षुल्लकेभ्यश्च वो नमः' इति । वयसा ज्ञानेन च महत्सु वृद्धेषु स्थितेभ्यः, वयसा ज्ञानेन च क्षुल्लकेषु अल्पेषु अर्भकेषु वटुषु युवसु च स्थितेभ्यो वो नमः । 'नमो महद्भ्यो नमो अर्भकेभ्यो नमो युवभ्यो नम आशिनेभ्यः' इति श्रुतिः । आकारतः शक्तितश्च महत्सु गजादिषु क्षुल्लकेषु पिपीलिकादिषु च स्थितेभ्यः । महत आकाशादपि महद्भ्यः । क्षुल्लात् परमाणोरपि क्षुल्लकेभ्यः । 'अणोरणीयान् महतो महीयान्' इति श्रुतिः । सम्बन्धतः महत्सु पित्रादिषु स्थितेभ्यः, क्षुल्लकेषु पुत्रादिषु च स्थितेभ्यो वो नमः । वायोस्त्रिरूपाणि च लोके महान्ति । भगवदपेक्षया क्षुल्लकानि अर्भकाणि च भवन्ति । शिवरूपाणि च ॥ ७ ॥

अथाष्टमो नमोवाकः–'नमो रथिभ्योऽरथेभ्यश्च वो नमः' इति । रथिषु रथारूढेषु अरथेषु पदातिषु च स्थितेभ्यो वो नमः । जीवरथे शरीरे स्थितेभ्यो नमः । अथाप्यरथेभ्यः शरीराभिमानविरहात् ॥

सर्वत्र रममाण एव स्थित इति रथो भगवानस्त्येषां रक्षकत्वेनेति रथिनः प्राणावताराः । अथाप्यरथाः पदातयो भूत्वैव युयुधिरे । भीमोऽपि रथादवप्लुत्य गजैर्युयुध इति भारते । अकारवाच्यस्य भगवतो रथाः शरीरस्थानीयाः । 'वायुरनिलम्' इति श्रुतिः । शरीरमानित्वाच्च रथी शिवः ॥ ८ ॥

अथ नवमो नमोवाकः–‘नमो॒ रथे᳚भ्यो॒ रथ॑पतिभ्यश्च वो॒ नम॑ः’ इति । रथेषु च त एव स्थिताः, रथपतिषु च । तेभ्यो युष्मभ्यं नमः । रथेभ्य इति रतिरूपेभ्यः । जीवरथपतिभ्यश्च । भगवद्रथभूताश्च प्राणादयः ॥ ९ ॥

अथ दशमो नमोवाकः–‘न॒मः सेना᳚भ्यः सेना॒निभ्य॑श्च वो॒ नम॑ः’ इति । सेनासु सेनापतिषु च स्थितेभ्यो वो नमः । सेनानिभ्य इति सेनानीभ्यः । ईदन्तमिदन्तवत् प्रतनाः प्रयुञ्जते । ‘सेनानीनामहं स्कन्दः’ इति हि गीतासु । इनेन सूर्येण सहिताः, तत्राधिष्ठिततया, नारायणप्राणरुद्राख्या देवताः । देवसेनाया नेतारश्च । इनेन प्रभुणा नारायणेन सहिताः प्राणशङ्करमूर्तयः ॥

इनेन रामेण कृष्णेन व्यासेन च सहिताः प्राणस्य त्रिमूर्तयः । कपिसेनायाः पाण्डवसेनायाः पण्डितसेनाया नेतारश्च ॥ १० ॥

अथैकादशो नमोवाकः–‘नम॑ः ख्ष॒त्तृभ्य॑ः सङ्ग्र॒हीतृभ्य॑श्च वो॒ नम॑ः’ इति । न केवलं रथेषु रथिकेषु, अश्वेषु वा, किन्तु क्षत्तृषु रथयन्तृषु च स्थितास्त एव नारायणप्राणरुद्राः । तेभ्यो नमः क्षत्तृभ्यः । कथं क्षत्ता? क्षदतीति क्षत्ता । ‘क्षद गतौ’ । ‘क्षद स्थैर्ये’ इति स्कन्दस्वामी । ‘क्षद गतिहिंसनयोः’ इत्येके । ‘क्षद सम्भृतौ’ इत्यपरे । ‘क्षद संवरणे’ इत्यन्ये । अनियता धातुपाठा भवन्ति । अर्थस्तु प्रयोगतोऽनुगन्तव्यः । ‘तृन्तृचौ शंसिक्षदादिभ्यः सञ्ज्ञायां चानिटौ’ (२.१) इति दशपादिका । ‘क्षदेर्युक्ते’ (२.१.१४७) इति सरस्वती-कण्ठाभरणे उणादिप्रकरणे भोजः । ‘क्षदेर्युक्तेऽर्थे तृन्प्रत्ययोऽनिट् चासौ भवति । क्षत्ता नियुक्तः’ इति दण्डनाथः । ‘क्षुदिर् सम्पेषणे । क्षुदति पिनष्टीति क्षत्ता’ इति दुर्गसिंहः । सारथिर्दौवारिको वेत्यैककण्ठ्यम् । अत्र तु युद्धप्रसङ्गात् सारथिरिति युक्तम् । त एव च क्षत्तारः रश्मिसंयमनेनाश्वानां सङ्ग्रहीतारः नियन्तारः । तद्गतेभ्यो युष्मभ्यं नमः । युद्धोपयुक्तानां बाणाद्यायुधानां सङ्ग्रहीतारो वा । रथिनः पुरतः सारथिर्भवति । पृष्ठतश्चक्ररक्षावायुधसङ्ग्रहीतारौ भवतः । क्षतात् तारयन्तीति क्षत्तारः नारायणप्राणरुद्राः । भक्त्या दत्तस्य

पत्रफलपुष्पादेः सम्यक् प्रीत्या ग्रहीतारः । समं प्राणावतारेष्वपि । मृत-सञ्जीवन्यादीनामानयनेन कपीन् क्षतात् तारयन् हनुमान् क्षत्ता । नायकीभूय स्वसेनारक्षणेन भीमः । ‘बलं भीमाभिरक्षितम्’ इति हि भारते । शास्त्रं दुर्वादक्षतात् तारयामास मध्वः । द्वीपान्तरस्थानां कपीनां सङ्ग्रहीता । पाण्डवसेनायाः सम्यक् ग्रहीता स्वाधीनीकरणेन । सतां शिष्यत्वेन ग्रहीता, सं विष्णुमेव सर्वशास्त्रार्थत्वेन ग्राहयिता च । ‘अकयप्रविसम्–’ इत्यादेः ॥ ११ ॥

अथ द्वादशो नमोवाकः–‘न॒मस्तख्ष॑भ्यो रथका॒रेभ्य॑श्च वो॒ नम॑ः’ इति । न केवलं रथादिषु स्थित्वा नियमयति । रथकारेषु च स्थित्वाऽयमेव रथानपि निर्मम इत्याह । तक्ष्णोति तक्षति वा तक्षा शिल्पी । तक्षू तनूकरणे । ‘कनिन् यु-वृषि-तक्षि-राजि-धन्वि-द्यु-प्रतिदिवः’ (६.५१) इति दशपादिका । तद्विशेषो रथकारः काष्ठशिल्पी । तक्षसु रथकारेषु स्थित्वा शिल्पकौशलहेतुभ्यो नारायण-प्राणरुद्रेभ्यो वो नमः ॥

तक्ष्णोति तनूकरोति आकारतक्षणेन संहारेण वेति तक्षा भगवान् । रतिरूपत्वाद् रथस्थत्वाद्वा रथ इत्याक्रियत इति रथकारः । रथस्य कारः आकार येनेति वा ॥

हनूमान् रक्षांसि तक्षति । भीमः कौरवसेनाम् । मध्वस्तामससन्ततिम् । रमणे स्थिता रथाः । अतितरां भगवति रता वा रथाः । तादृशान् कुर्वन्तीति रथ-काराः । भगवदधिष्ठानत्वाच्च भगवतो रथाकाराः ॥ १२ ॥

अथ त्रयोदशो नमोवाकः–‘न॒मः कुला॑लेभ्यः क॒र्म्मारे᳚भ्यश्च वो॒ नम॑ः’ इति । कुलालाः कुम्भकाराः कुं मृदं लालयन्तीति । लोहकाराः कर्माराः । ये लोहैः प्रतिमादि कुर्वन्ति । अरमलं कर्म तेषामिति कर्मस्वारमन्त इति वा । तत्रतत्रगतेभ्यः तत्तत्कौशलप्रदेभ्यः नारायणप्राणरुद्रेभ्यो वो नमः ॥

अन्तस्थित्वा वा, अवतीर्य वा कुं भूमिं लालयन्ति । कुत्सितयोनीन् गजेन्द्रादीनपि लालयन्ति । यादवादिकुलमलङ्कुर्वन्ति । वेदोक्तकर्मभिरर्यन्त इति कर्माराः । 'कर्मणा ज्ञानमातनोति' इति हि श्रुतिः ॥

कुं लालयन्ति कुलमलङ्कुर्वन्तीति प्राणावतारेष्वपि समम् । स्वकर्मभिरा रमयन्ति भगवन्तमिति कर्माराः ॥ १३ ॥

अथ चतुर्दशो नमोवाकः–'नम॑ः पु॒ञ्जिष्टे᳚भ्यो नि॒षादे॑भ्यश्च वो॒ नम॑ः' इति । पक्षिपुञ्जः आहारार्थमिष्टो येषां ते पुञ्जिष्टाः पक्षिव्याधाः । पूर्वपदान्त्यलोपः । 'पुञ्जिनां सङ्घवतां वयसां वेष्टयितारः पुञ्जिष्टाः । ष्टै वेष्टने' इति केचित् । नितरां सकृज्जालक्षेपेण लक्षंलक्षं मत्स्यान् सादयन्तीति निषादा मत्स्यघातिनः । तद्गतेभ्यो वो नमः । अथच जीवपुञ्ज इष्ट एषाम् । जीवहृदये च निषीदन्ति । इष्टकपिपुञ्जः । इष्टकुञ्जरपुञ्जः । इष्टतत्ववादिपुञ्जः । किम्पुरुषे निषीदति । कौरवसेनां नितरां सादयति । मायावादं च निषादयति ॥ १४ ॥

अथ पञ्चदशो नमोवाकः–'नम॑ इषु॒कृद्भ्य॑ो धन्व॒कृद्भ्य॑श्च वो॒ नम॑ः' इति । हिंसासाधनेष्विष्वादिषु न केवलम्, तत्कारिष्वपि एत एवेत्याह– नमः । इष्वाद्यायुधकृत्सु गतेभ्यो वो नमः ॥

इष्यन्त इतीषवः सस्यसमृद्धा भूमयः । धन्वानो मरुदेशाः । तदुभयकृद्भ्यो वो नमः ॥

वायोरवताराश्च सतामिषुमिष्टं कुर्वन्ति । सतामात्मानमिषुं कुर्वन्ति । 'प्रणवो धनुः शरो ह्यात्मा' इति हि श्रुतिः । तामसानां मनः धन्वानं मरुमिव निष्फलं कुर्वन्ति ॥ १५ ॥

अथ षोडशो नमोवाकः–'नमो॑ मृ॒ग॒युभ्य॑ः श्व॒निभ्य॑श्च वो॒ नम॑ः' इति । मृगान् यातीति मृगयुर्व्याधः । यातेर्मृगशब्द उपपदे कुप्रत्ययः । 'मृगय्वादयश्च' (१.१२१) इति दशपादिका । यूयमेव व्याधेषु स्थित्वा मृगयध्वे । तेभ्यो वो नमः । अभितो धावित्वा प्राणिनां गतिं निरुद्ध्य मृगयूनां सहकर्तारः श्वानः ।

तान् गले सृङ्कां बद्ध्वा ये नयन्ति ते श्वनयः । तेषु स्थित्वा यूयमेव शुनां नेतार इति वो नमः ॥

पञ्चदशभ्यः कलाभ्यः पृथक्कृत्य मृग्यत इति जीवो मृगः । तेन युता मृगयवः । 'द्वा सुपर्णा सयुजा सखाया' इति हि श्रुतिः । तत्वं मृगयन्त इति मृगास्तत्वजिज्ञासवः । तान् ज्ञानेन युवन्ति योजयन्तीति मृगयवः । श्वं विश्वं नयन्तीति श्वनयः । सात्विकानां शं वम् आनन्दं ज्ञानं च नयन्ति प्रापयन्तीति श्वनयः । श्वानं मातरिश्वानं नयतीति च भगवान् श्वनिः । बहुरूपत्वाद् बहुवचनम् । श्वयन्ति भगवन्तं प्रति गच्छन्ति, वर्धन्ते चेति श्वानः । तान् नयन्ति । सीतां मृगयमाणः लङ्कां प्रति यातीति मृगयुः । कौरवसेनामृगयुः । मायावादिमृगयुः । श्वनय इत्युक्तार्थम् ॥ १६ ॥

अथ सप्तदशो नमोवाकः–'न॒मः श्वभ्य॒ः श्वप॑तिभ्यश्च वो॒ नम॑ः' इति । नमः श्वगतेभ्यः । 'शुनि चैव श्वपाके च पण्डिताः समदर्शिनः' इति हि गीतासु । श्वनय एव श्वपतयः । ये चान्ये स्वपर्यङ्क एव शुनः स्वापयन्ति । तद्गतेभ्यश्च वो नमः ॥

अथच शमानन्दः । वातीति वा ज्ञानम् । श्वभ्यो ज्ञानानन्दस्वरूपेभ्यो नमः । श्वयन्ति सर्वत्र गच्छन्ति इति श्वानः सर्वगताः । नित्यवृद्धत्वाच्च । भगवति वर्तमानलकारोऽपि सर्वकालवचनः । अत एव पाणिनिराह– 'छन्दसि लुङ्-लङ्-लिटः' (अ.सू.३.४.६) इति । 'अन्येऽपि लकारा यथायथं भवन्ति' इति काशिका । श्वयन्ति भगवन्तमेव गच्छन्ति गमयन्ति चेति श्वानो वेदाः । तेषां पतयः । ज्ञानानन्दस्वरूपाणां जीवानां पतयश्च ते । सर्वत्र समानमेतत् ॥

इत्युभयतोनमस्कारा मन्त्राः पर्यवसिताः । प्रत्यक्षमन्त्राश्च ॥

इत्याचार्यगोविन्दस्य कृतिषु तैत्तिरीयरुद्रप्रपाठकचतुर्थानुवाकभाष्यम् ॥

—०—

अत्रोदितानि नामानि–३४	**संहत्य–७९-+३४=११३**
पदानि–१०२	**संहत्य–४०४+१०२= ५०६**

[पञ्चमोऽनुवाकः]

नमोभवायचरुद्रायच १
नमश्शर्वायचपशुपतयेच २
नमोनीलग्रीवायचशितिकण्ठायच ३
नमᳲकपर्दिनेचव्युप्तकेशायच ४
नमस्सहस्राक्षायचशतधन्वनेच ५
नमोगिरिशायचशिपिविष्टायच ६
नमोमीढुष्टमायचेषुमतेच ७
नमोह्रस्वायचवामनायच ८
नमोबृहतेचवर्षीयसेच ९
नमोवृद्धायचसँव्वृध्वनेच(१) १०
नमोऽअग्रियायचप्रथमायच ११
नमऽआशवेचाजिरायच १२
नमश्शीघ्रियायचशीभ्यायच १३
नमऽऊर्म्यायचावस्वन्यायच १४
नमस्स्रोतस्यायचद्वीप्यायच ॥ ५ ॥ १५

नमः । भवाय । च । रुद्राय । च । नमः । शर्वाय । च । पशुपतयइतिपशु+पतये । च । नमः । नीलग्रीवायेतिनील+ग्रीवाय । च । शितिकण्ठायेतिशिति+कण्ठाय । च । नमः । कपर्दिने । च । व्युप्तकेशायेतिव्युप्त+केशाय । च । नमः । सहस्राक्षायेतिसहस्र+अक्षाय । च । शतधन्वनइतिशत+धन्वने । च । नमः । गिरिशाय । च । शिपिविष्टायेतिशिपि+विष्टाय । च । नमः । मीढुष्टमायेतिमीढुः+तमाय । च । इषुमतइतीषु+मते । च । नमः । ह्रस्वाय । च । वामनाय । च । नमः । बृहते । च । वर्षीयसे । च । नमः । वृद्धाय । च । सँव्वृध्वनइतिसं+वृध्वने । च (१) । नमः । अग्रियाय । च । प्रथमाय । च । नमः । आशवे । च । अजिराय । च । नमः । शीघ्रियाय । च । शीभ्याय । च । नमः । ऊर्म्याय । च । अवस्वन्यायेत्यव+स्वन्याय । च । नमः । स्रोतस्याय । च । द्वीप्याय । च ॥ ५ ॥

(सँव्वृध्वने च पञ्चविᳪशतिश्च ।)

इति पञ्चमोऽनुवाकः

—०—

अथ पञ्चस्वनुवाकेष्वानवमान्तमुपक्रमतोनमस्काराः परोक्षमन्त्राः । तत्र पञ्चमेऽनुवाके पञ्चदशनमोवाकमेकं यजुः । पञ्चासप्ततिः पदानि ॥

अत्र केचिदाहुः–'आगामिनोः 'नमो भवाय च', 'नमो ज्येष्ठाय च' इत्यनुवाकयोरृषिर्देवता च भगवान् शम्भुरेव । छन्दो महाविराट्' इति ॥

तत्र प्रथमो नमोवाकः–'नमो भवाय च रुद्राय च' इति । अन्तर्यामितयाऽनुसन्धानं सर्वत्र समानमिति न पृथग् व्याख्यायते । अर्थविशेषमार्गणेन गुणानुसन्धानमग्ना वयम् । भवत्यनेन जगदिति भवो रुद्रः । भवो वायुः । भवो ब्रह्मा । मुख्यतस्तु सर्वसम्भवो नारायणः । सर्वत्र भवतीति च भवः । सर्वमत्र भवतीति च भवः । सदा भवत्येव न कदाचिन्न भवतीति च भवः । सर्वं सृष्टिस्थितिसंहारैर्भावयतीति भवभावनो भवः । 'सृष्टिः स्थितिश्च संहारो

भावनेत्यभिधीयते’ इति हि स्मरन्ति । मनसि भाव्यते सर्वैरिति भवः । भाति वाति चेति ज्ञानानन्दरूपत्वाद् भवः । ‘भ आनन्दे’ । ‘वा गतौ’ । भमानन्दं वाययति गमयतीति भवः । यथासम्भवं वायावपि शिवेऽपि ॥

रोदयति पापकृतः, रुजं द्रावयति पुण्यकृतामिति रुद्रः शिवः प्राणो नारायणश्च । ‘रुद्रो बहुशिरा बभ्रुः’ इति च विष्णुसहस्रनामस्वित्युक्तम् । यो भवः स्रष्टा आनन्ददश्च स एव रुद्रः संहर्ता दुःखदश्चेति सहोक्तिः ॥ १ ॥

अथ द्वितीयो नमोवाकः–‘नमः॑ श॒र्वाय॑ च पशु॒पत॑ये च’ इति । तामसानां शं रुणद्धीति शर्वः । ‘शर्वः शंरोधनाद्धरिः’ इति हि स्मरन्ति । ‘सर्वः शर्वः शिवः स्थाणुः’ इति च । रुधेष्टिलोपः वकार आदेशः । आदिष्टो वकारो भगवतो ज्ञानात्मकतां चाऽह । शं रुन्धानो वातीति वा । अक्षरसाम्याद्धि निर्ब्रुवन्ति । शृणाति संहरति जगदिति शर्वः । शृणात्यसुरान्, शृणाति भक्तानां पापमिति च शर्वः । शृणातेर्वः प्रत्ययः । ‘कॄ-गॄ-शॄ-दॄभ्यो वः’ (८.१२९) इति हि दशपादिका । शर्व हिंसायामिति च धातुपाठं पठन्ति । शरेण वाति । शरुः सन् वा वाति । शरुं शिवं वाति वा । ‘शरवे हन्तवा उ’ इति हि श्रुतिः । संसारबद्धा जीवाः पशवः । तेषां पतिः पाता । पान्ति शंसाधनाश्चेति वेदाः पशवः । तेषां च पतिः । सर्वानविशेषेण पश्यतीति पशुरिति वैयाकरणाः । सर्वत्र भगवन्तं पश्यन्तीति पशवस्तत्वज्ञानिनः । तेषां पतिः । स्पशतीति पशुरिति भोजः । स्पश बाधनस्पर्शनयोः । अत्रापि शृणाति पाति चेति विरुद्धधर्मयोः सहोक्तिः । ‘गुणाः श्रुताः सुविरुद्धाश्च देवे’ इति हि श्रुतिः ॥ २ ॥

अथ तृतीयो नमोवाकः–‘नमो॒ नील॑ग्रीवाय च शिति॒कण्ठा॑य च’ इति । एकार्थाभासयोरथापि भिन्नार्थयोः पदयोः सहोक्तिः । शितिरिति धवळो नीलो वा । ‘शितिः श्वेते च नीले च’ इति यादवप्रकाशः । नीलकण्ठ इत्यर्थे पुनरेकार्थप्रतिपादकं नामद्वयम् । तद्यथा–श्रीपतिर्लक्ष्मीपतिरिति । विषप्राशनजं नैल्यमपि यस्य कण्ठेऽलङ्करणं बभूवेति स्तुतिः । ‘यच्चकार गळे नीलं तच्च

साधोर्विभूषणम्’ इति भागवते । कण्ठैकदेशो नैल्यमितरत्र धवळकण्ठ इति चार्थभेदः । नीला ग्रीवा यस्य, शितिः कण्ठो यस्येति विग्रहे शिवः । यस्मादिति विग्रहे प्राणश्च नारायणश्च । वायुर्हि स्वयं विषं निर्मथ्य हराय ददौ । ‘वायुरस्मा उपामन्थत् पिनष्टि स्म कुनन्नमा । केशी विषस्य पात्रेण यद् रुद्रेणापिबत् सह’ (ऋ.१०.१३६.७) इति हि श्रुतिः ॥ ३ ॥

अथ चतुर्थो नमोवाकः–‘नमः॑ कप॒र्दिने॑ च॒ व्यु॑प्तकेशाय च’ इति । ऋषिषु सन्निहितः कपर्दी जटाजूटी । यतिषु व्युप्तकेशः मुण्डितकेशः । वप नीरोमकरणे । अर्धमुण्डितकेशो व्युप्तकेश इत्यपि व्याचक्षते । कपर्दा अस्याः सन्तीति कपर्दा रमा । ‘चतुष्कपर्दा युवतिः सुपेशा’ इति श्रुतिः । साऽस्य पत्नीति कपर्दी । विविधमुप्तमाभ्यामिति व्युप्तौ सृष्टिबीजावपनकर्मणि नियुक्तौ केशौ प्राणरुद्रौ, ब्रह्मरुद्रौ वा येन । प्राणावतारेषु मध्वो व्युप्तकेशः । रुद्रांशो दुर्वासाश्च । तेन व्युप्तौ कृतमुण्डनौ केशौ वायुशिवौ येन । अत्रापि विरुद्धनामनी एव सह प्रयुक्ते ॥ ४ ॥

अथ पञ्चमो नमोवाकः–‘नमः॑ सहस्रा॒क्षाय॑ च श॒तध॑न्वने च’ इति । सहस्रमक्षाणि अक्षीणि वाऽस्येति सहस्राक्षोऽनन्ताक्षः । ‘सहस्राक्षः सहस्रपात्’ । सहस्रं जीवानामक्षाणीन्द्रियाणि नियम्यान्यस्येति च सहस्राक्षो हृषीकेशः । सहस्राक्षगतत्वाच्च सहस्राक्षः । यथासम्भवं प्राणशिवावपि । शतधन्वा अनन्तायुधः । धन्वशब्दोऽयं सर्वायुधोपलक्षणः । ‘सर्वप्रहरणायुधः’ इति च । भक्तानां शं तनोतीति शत्रून् शातयतीति च शतं धनुः शार्ङ्गमस्येति च शतधन्वा । तादृशं गाण्डिवाख्यं धनुरनयोरिति प्राणशङ्करावपि ॥ ५ ॥

अथ षष्ठो नमोवाकः–‘नमो॑ गिरि॒शाय॑ च शिपिवि॒ष्टाय॑ च’ इति । ब्रह्मगिरौ शिरसि पश्चात्मा शेत इति गिरिशः । जगद्गिरणाद् गिरयः संहारकाः । तेषामीशः । गिरत्युपदिशतीति गिरिः जगद्गुरुः प्राणः । तस्मिन् शेते ।

तृतीयोऽतिशये इत्यतो वा गिरिर्गुरुः। शिपिविष्ट इति विष्णोरेव नाम। 'विष्णुः शिपिविष्टः' इति श्रुतेः। 'नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः' इति स्मरणाच्च। लोके हि गिरिश इति शिवः। शिपिविष्ट इति विष्णुः। विद्वद्रूढ्या तयोः सामानाधिकरण्यमिह कथ्यते। कथमथ शिपिविष्टः? शिपयः सूर्यरश्मय इति यास्कः। तेषु सन्निधाय जीवलोकं हर्षयन् हृषीकेशः शिपिविष्टः। स्कान्दवचनं चात्र भवति–'शैत्याच्छयनयोगाद्वा शीति वारि प्रचक्षते। तत्पानाद् रक्षणाद् वापि शिपयो रश्मयो मताः। तेषु प्रविष्टः सविता शिपिविष्टस्तदोच्यते' इति। समानमेतत् नारायणप्राणरुद्राणाम्। 'यज्ञो वै शिपिः'। सर्वयज्ञानां भोक्ता च प्रभुश्च शिपिविष्टः। 'पशवो वै शिपिः'। तेन शिपिविष्टः पशुपतिः। 'शिपिविष्टः शिवः शौरिः' इत्यभिधानम्। सर्वप्राणिष्वन्तर्यामिरूपेण विष्टः। समानं वायोरपि॥ ६॥

अथ सप्तमो नमोवाकः–'नमो॑ मी॒ढुष्ट॑माय॒ चेषु॑मते च' इति। सतामभीष्टसेचकतमाय। असतां निग्रहाय चेषुमते। मेघे भूत्वा सेचकाय। तेन जीवनप्रदाय। मिह सेचने। ईषणमिषुर्हिंसा। ईष हिंसायाम्। आदेरिकारादेश इति वैयाकरणा इत्युक्तम्। तेन इषुमते सर्वसंहारकाय नमः॥ ७॥

अथाष्टमो नमोवाकः–'नमो॑ ह्र॒स्वाय॑ च वा॒म॒नाय॑ च' इति। इतः परं रूपतोनमस्कार इत्याचक्षते। ह्रस्वः अल्पप्रमाणदेहः। तद्गताय। प्रणवगतह्रस्ववर्णप्रतिपाद्याय। वामनः सङ्कुचितावयवः। तद्गताय। आकारतः ह्रस्वो भूत्वा कृतवामनावताराय। वामं स्त्रीसौन्दर्यं नयतीति च वामनः। दुष्टेषु ह्रसितं वं ज्ञानं येनेति ह्रस्वः। जीवेषु यथायोग्यतं वं ज्ञानमममज्ञानं च नयतीति वामनः। समानं प्राणशिवयोरपि॥ ८॥

अथ नवमो नमोवाकः– 'नमो॑ बृ॒ह॒ते च॒ वर्षी॑यसे च' इति। यो वामनः स एव त्रिविक्रमतया बृहन् बभूवेति तस्मा एव बृहते, सर्वगुणबृंहिताय नमः। आकारेण बृहत्सु स्थिताय नमः। वयसा ज्ञानेन वर्षीयसे वृद्धतमाय नमः। अतिशयेन वृद्धः वर्षीयान् (अ.सू.६.४.१५७)। स किल वयसा ज्ञानेन चाधिकः। यथासम्भवं प्राणशिवावपि॥ ९॥

अथ दशमो नमोवाकः–'नमो॑ वृ॒द्धाय॑ च सँ॒वृध्व॑ने च' इति। तदेव स्फुटमाह–नमो वृद्धायेति। ज्ञानवृद्धेषु वयोवृद्धेषु च स्थिताय। सर्वगुणसमृद्धाय नमः। वृद्ध एव न पुनर्वर्धत इति वा। 'न कर्मणा वर्धते नो कनीयान्' इति श्रुतिः। यथायथं जीवगणेषु वृद्धौ प्राणशङ्करौ। भक्तान् संवर्धयतीति संवृध्वा। संवृध्वान् वा। तस्मै नमः। सम्पूर्णवृद्धिमान् वा॥ १०॥

अथैकादशो नमोवाकः–'नमो॒ अग्रि॑याय च प्र॒थ॒माय॑ च' इति। 'अग्रियाय' इति पदे परे नमःपूर्वोऽकारो लोपं नाऽपद्यते। तेन 'नमो अग्रियाय' इत्येव संहितापाठः। तथाहि तैत्तिरीयप्रातिशाख्ये–'नमःपूर्वोऽग्रेऽश्वेभ्योऽग्रियाय' (१.११.१४) इति। अग्रियः सृष्टेरग्रे य एको भवति। अग्रियमित्यत्र द्वौ प्रत्ययौ भवतः। घः प्रत्ययः घन् वा। घप्रत्यये अन्तोदात्तः–अ॒ग्रि॒यम्। घनि आद्युदात्तः– अग्रि॑यम्। अत्र आद्युदात्तत्वाद् घनेव। तथाहि–'घच्छौ च' (अ.सू.४.४.११७) इति सूत्रवृत्तौ जयादित्यः–'अग्रशब्दात् यत् घच्छौ च प्रत्यया भवन्ति तत्र भव इत्येतस्मिन् विषये। अग्रे भवम् अग्र्यम्। अ॒ग्रि॒यम्। अ॒ग्रीयम्। चकारः 'तुग्राद् घन्' (११५) इत्यस्यानुकर्षणार्थः। अग्रियम्। स्वरे विशेषः' इति। एतेन 'घच्छौ च इति घः। छान्दसमाद्युदात्तत्वम्' इति वदन् भट्टभास्करः परास्तः॥

नन्वनेन स्वरविशेषेण कमर्थविशेषं विवक्षति श्रुतिकुमारी? ऋक्संहितायां तु घप्रत्ययान्तोऽन्तोदात्त एवाग्रियशब्दः पठ्यते। तत् किमिति यजुषि घनन्तः, नित्त्वादाद्युदात्तः पठ्यत इति चिन्तनीयमिति? साधुरयमनुयोगः। शृणु

विवक्षाविशेषम्– घप्रत्ययपक्षे सृष्टेः पूर्वकालवाचिनोऽग्रशब्दस्य निघातेन सर्वसत्वाभावं दृढीकरोति । उदात्तेन प्रत्ययस्वरेण च भगवतः सर्वोच्चत्वम् । याजुषपाठपक्षे आदावुदात्तस्वरिताभ्यां प्रळयेऽपि सर्वसत्वानां नीच्चोच्चभावेन स्थितिम्, प्रचयेन च प्रत्ययस्वरेण भगवतः सर्वदा सर्वोच्चतया स्थितिमाह । तदुक्तम्–'दार्ढ्यमेवानुदात्तार्थ उदात्तस्योच्चता तथा । नीचता स्वरितस्यार्थः प्रचयस्य यथास्थितिः' इति ॥

तेनाग्रे प्रळयकाले भवन्, अग्रे सर्वोपरि भवंश्च अग्रियः । 'वासुदेवो वा इदमग्र आसीत् न ब्रह्मा नच शङ्करः', 'नारायणो वा इदमग्र आसीत्', 'आत्मैवेदमग्र आसीत्, नान्यत् किञ्चन मिषत्' इत्यादेः । अग्रे आदौ स्वयमेव वासुदेवाद्यात्मना चतुर्धा भवतीति चाग्रियः । सर्वप्रथमत्वात् सर्वोत्तमत्वादेव च प्रथमः । सर्वत्रापि प्रथमः । तारतम्यान्तगतत्वाच्च । सर्वजीवेभ्योऽग्रे भगवता सृष्टो भवतीति वायुरप्यग्रियः । सर्वजीवप्रथमत्वाच्च प्रथमः । रुद्रोऽपि इन्द्रादिभ्यः प्रथमोत्पन्नत्वादग्रियः प्रथमः । वर्णव्यत्ययेन प्रमथनाच्च प्रथम इत्युच्यते ॥ ११ ॥

अथ द्वादशो नमोवाकः–'नम॑ आ॒शवे॑ चाजि॒राय॑ च' इति । आशवः क्षिप्रकारिणः शीघ्रगामिनश्च । तत्प्रेरकाय नमः । आ समन्तादानन्दशीलश्चाऽशुः । आशुगतिष्वश्वादिषु गरुडादिषु च गतः । अश्नुते सर्वजगद् व्याप्नोतीति चाऽशुः । अशू व्याप्तौ । सर्वमश्नातीति सर्वसंहाराच्चाऽशुः । वायुरप्याशुगतिः । लङ्कां प्रत्याशुगमनाच्च । संहर्तृत्वादाशुः शिवः ॥

अजतीत्यजिरः । सर्वगतः । अन्तःस्थित्वा प्रेरणाच्च । 'अज गतिक्षेपणयोः' । क्षेपणं प्रेरणम् । किरच्प्रत्ययः । तथाहि दशपादिका–'अजिर-शिशिर-शिथिल-स्थिर-स्फिर-स्थविर-खदिराः' (८.२७) इति । अजन्ति गच्छन्त्येनमन्त इत्यजिरः परमं निधानम् । अथच न जीर्यन्त इत्यजिरा अजरा

देवाः । देवोत्तमत्वादयमजिरः । तथाहि दशपादिकावृत्तिकारः–'नञ्पूर्वस्य जीर्यतेरॄवर्णलोपो निपात्यते । जॄष् वयोहानौ । न जीर्यन्त इत्यजराः देवाः' इति । अजिरेषु गमनशीलेषु गतः । अजो भगवान् । तद्भन्तोऽजिनः । भगवद्भक्ताः । तान् रमयति चायम् । 'अजो हरौ हरे कामे विधौ छागे रघोः सुते' इति विश्वप्रकाशः । यथायथमर्थविशेषा ग्राह्याः ॥ १२ ॥

अथ त्रयोदशो नमोवाकः–नम॒ः शीघ्रि॑याय च॒ शीभ्या॑य च' इति । याने च करणे चार्थे शीघ्राद् घः प्रत्ययो भवतीति वक्तव्यम् । शीघ्रियः शीघ्रगामी शीघ्रकारी वा । शीघ्रियेषु स्थिताय नमः । 'अनेजदेकं मनसो जवीयः' इति च शीघ्रियो भगवान् । आसीन एव दूरं व्रजतीति शीघ्रियः । शयानो भवन् सर्वतो यातीति शीभ्यः । 'आसीनो दूरं व्रजति शयानो याति सर्वतः' इति हि श्रुतिः । अथ च 'शीभृ कत्थने' । प्रशंसायामित्येतत् । शीभ्यते वेदैरिति शीभ्यः । स्वदृष्टैर्मन्त्रैः स्वयमेव स्तूयत इति वा । यथासम्भवं प्राणशिवौ च ॥

'शीघ्रस्यैव शीभ्भावः, तत्र भवः शीभ्यः' इत्येके । पुनरुक्तमेतत् । 'शीभशब्द उदकप्रवाहवाची । तत्रावस्थितः शीभ्यः' इत्यन्ये । प्रायोऽत्र लोकतः समानार्थानां पदानां समन्वयः ॥ १३ ॥

अथ चतुर्दशो नमोवाकः–'नम॑ ऊ॒र्म्यर्या॑य चावस्व॒न्याय॑ च' इति । इयर्ति ऋच्छति वा ऊर्मिः । धातोः ऊ इत्ययमादेशः मिः प्रत्ययश्च । ऊर्मिषु भव ऊर्म्यः । 'भवे च्छन्दसि' (अ.सू.४.४.११०) इति यत् । नीरवं स्तिमितं जलमवस्वनम् । तत्र गतोऽवस्वन्यः । ऊर्मिमान् वा ऊर्म्यः समुद्रः । तत्र सन्निहिताय । ततोऽवमस्वनवन्ति नदीजलानि अवस्वन्यानि । तत्र सन्निहिताय च नमः ॥ १४ ॥

अथ पञ्चदशो नमोवाकः–'नम॑ः स्रोतस्या॑य च॒ द्वीप्या॑य च' इति । नदीस्रोतसि भवाय नमः । स्रोतसोर्मध्यगते द्वीपे भवाय च नमः । द्वयोरपि पार्श्वयोर्यत्राऽपो

भवन्ति स द्वीपः । ‘द्व्यन्तरुपसर्गेभ्योऽप ईत्’ (अ.सू.६.३.९७) । विशिष्य यमुनाद्वीपभवो द्वीप्यो भगवान् द्वैपायनः ॥

अथच स्रोतस्सु इन्द्रियेषु भवाय हृषीकेशाय नमः । ‘स्रोतोऽम्बुनिर्गम-द्वार इन्द्रियेऽप्सु जलस्रुतौ’ इति यादवप्रकाशः । तत्रापि द्विर्गता आपोऽत्रेति द्वीपं चक्षुः । विशिष्य तत्र सन्निहिताय नारायणाय प्राणाय रुद्राय च नम इति सुन्दरम् ॥ १५ ॥

इत्याचार्यगोविन्दस्य कृतिषु तैत्तिरीयरुद्रप्रपाठकपञ्चमानुवाकभाष्यम् ॥

—०—

अत्रोदितानि नामानि—३०
संहत्य—११३+३०=१४३
पदानि—७५
संहत्य—५०६+७५=५८१

[षष्ठोऽनुवाकः]

नमो᳚ज्ये॒ष्ठाय॑चकनि॒ष्ठाय॑च॒ १
नम॑ᳶप्पूर्व॒जाय॑चापर॒जाय॑च॒ २
नमो॑मद्ध्य॒माय॑चापग॒ल्भाय॑च॒ ३
नमो॑जघ॒न्या॑यच॒बुध्नि॑यायच॒ ४
नम॑स्सो॒भ्या॑यचप्रतिस॒र्य्या॑यच॒ ५
नमो॒याम्या॑यच॒क्षेम्या॑यच॒ ६
नम॑ऽउर्व॒र्य्या॑यच॒खल्या॑यच॒ ७
नम॒श्श्लोक्या॑यचावसा॒न्या॑यच॒ ८
नमो॒वन्या॑यच॒कक्ष्या॑यच॒ ९
नम॑श्श्र॒वाय॑चप्रतिश्र॒वाय॑च॒ (१) १०
नम॑ऽआ॒शुषे॑णायचा॒शुर॑थायच॒ ११
नम॒श्शूरा॑यचावभिन्द॒तेच॒ १२
नमो॑व॒र्म्मिणे॑चवरू॒थिने॑च॒ १३
नमो॑बि॒ल्मिने॑चकव॒चिने॑च॒ १४
नम॑श्श्रु॒ताय॑चश्रुतसे॒नाय॑च ॥ ६ ॥ १५

नम॑ः । ज्ये॒ष्ठाय॑ । च॒ । क॒नि॒ष्ठाय॑ । च॒ । नम॑ः । पू॒र्व॒जायेति॑पूर्व+जाय॑ । च॒ । अ॒प॒र॒जायेत्य॑पर+जाय॑ । च॒ । नम॑ः । म॒द्ध्य॒माय॑ । च॒ । अ॒प॒ग॒ल्भा- येत्य॑प+ग॒ल्भाय॑ । च॒ । नम॑ः । ज॒घ॒न्या॑य । च॒ । बुध्नि॑याय । च॒ । नम॑ः । सो॒भ्या॑य । च॒ । प्र॒ति॒स॒र्य्या॑येति॑प्रति+स॒र्य्या॑य । च॒ । नम॑ः । याम्या॑य । च । क्षेम्या॑य । च॒ । नम॑ः । उ॒र्व॒र्य्या॑य । च॒ । खल्या॑य । च॒ । नम॑ः । श्लोक्या॑य । च॒ । अ॒व॒सा॒न्या॑येत्य॑व+सा॒न्या॑य । च॒ । नम॑ः । वन्या॑य । च॒ । कक्ष्या॑य । च॒ । नम॑ः । श्र॒वाय॑ । च॒ । प्र॒ति॒श्र॒वायेति॑प्रति+ श्र॒वाय॑ । च॒ (१) । नम॑ः ।आ॒शुषे॒णायेत्या॒शु+से॒ना॒य । च॒ । आ॒शुर॑था॒- येत्या॒शु+ र॒था॒य॒ । च॒ । नम॑ः । शूरा॑य । च॒ । अ॒व॒भि॒न्द॒तइत्य॑व+- भि॒न्द॒ते । च॒ । नम॑ः । व॒र्म्मिणे॑ । च॒ । वरू॒थिने॑ । च॒ । नम॑ः । बि॒ल्मिने॑ । च॒ । क॒व॒चिने॑ । च॒ । नम॑ः । श्रु॒ताय॑ । च॒ । श्रु॒त॒से॒नायेति॑- श्रुत+से॒नाय॑ । च॒ ॥ ६ ॥

(प्र॒ति॒श्र॒वाय॑च॒ पञ्च॑वि ९शतिश्च)

इति षष्ठोऽनुवाकः

—०—

षष्ठे चास्मिन्ननुवाके पञ्चदशनमोवाकमेकं यजुः । पञ्चसप्ततिः पदानि । उपक्रमतोनमस्काराण्येव । सङ्गतिरपि नाम्नोर्बहुविधा भवति । क्वचित् परस्परं विरुद्धयोः । स यथा– ज्येष्ठाय च कनिष्ठाय च । क्वचित् समानार्थयोः । स यथा– वर्म्मिणे च कवचिने च । क्वचिद् यथाकथाच सम्बद्धयोः । स यथा– वन्याय च कक्ष्याय च । वर्मिणे च वरूथिने चेत्यादि ॥

तत्र प्रथमो नमोवाकः–'नमो॑ ज्ये॒ष्ठाय॑ च क॒नि॒ष्ठाय॑ च' इति । अतितमां वृद्धः ज्येष्ठः । वृद्धस्य 'ज्य' इत्ययमादेशः 'वृद्धस्य च' (अ.सू.५.३.६२) इति । प्रशस्यस्य 'ज्य च' (६१) इति स्मरणादतितमां प्रशस्यो वा ज्येष्ठः । तत्रतत्र स्थित्वा बहुष्वेकस्य वृद्धतमत्वप्रशस्यतमत्वयोरापादकाय नारायणाय प्राणाय रुद्राय च नमः ॥

एवमतितमां युवा कनिष्ठः । अतितमामल्पो वा कनिष्ठः । 'युवाल्पयोः कनन्यतरस्याम्' (अ.सू.५.३.६४) इति च । तत्तदापादकाय नमः । एवं द्वेधाऽप्यर्थानुसन्धानं भवति । स्वरप्रक्रिया तु प्रथममेवार्थं कटाक्षयति । अन्तोदात्तत्वात् । 'ज्येष्ठकनिष्ठयोर्वयसि' (१.२२) इति हि फिट्सूत्रम् ॥

अवतारेषु च क्वचिज्ज्येष्ठो भवति यथा रामो लक्ष्मणाद्यपेक्षया । क्वचित् कनिष्ठः । यथा कृष्णः बलभद्रापेक्ष्या । यथा वाऽऽदित्येषु वामनः, अजघन्यो जघन्यजः । एवं कनिष्ठोऽपि सर्वदेवोत्तमत्वात् ज्येष्ठश्च । स्वस्यैव च स्वयं ज्येष्ठो भवति कनिष्ठश्च । यथा दशस्ववतारेषु मत्स्यो ज्येष्ठः । कल्की कनिष्ठः ॥

ज्येये स्वर्गे मोक्षे वा स्थितो ज्येष्ठः । ये कनन्ति ज्ञानेन दीप्यन्ते ते कनयः स्वर्गिणो मोक्षिणो वा । तेषु स्थितः कनिष्ठः । कनी दीप्तिकान्तिगतिषु । कनीयसि नरके च नारकिषु च स्थितस्तान् नियन्तुमिति च कनिष्ठः । 'गुणाः श्रुताः सुविरुद्धाश्च देवे' इत्येतदनेनाऽह ॥

यथा वा प्राणावतारेषु ज्येष्ठो हनुमान् । कनिष्ठो मध्वः । इन्द्राद्यपेक्षया ज्येष्ठः प्राणः । भगवदपेक्षया कनिष्ठः । एवं रुद्रोऽपि ॥ १ ॥

अथ द्वितीयो नमोवाकः–'नम॑ः पू॒र्व॒जाय॑ चाप॒र॒जाय॑ च' इति । तदेव रीत्यन्तरेणोच्यते । पूर्वजातेषु गताय नमः । अपरजातेषु गताय च । पूर्वः सन्नपि जायते । अपरः सन्नपि । रामः पूर्वजः । कृष्णोऽपरजः । स्वयमेव स्वस्य पूर्वजश्चापरजश्च भवति । 'प्रणवो ह्यपरं ब्रह्म प्रणवश्च परं स्मृतः' इति हि श्रुतिः । सृष्टेः पूर्वं स्वयमेव वासुदेवाद्यात्मना जायते । पूर्वं सृष्ट्यर्थं ब्रह्मणि जातोऽभिव्यक्तः । अपरस्मिन् प्रळये रुद्रात्मना जातः ॥

प्राणो हि सर्वजीवेभ्यः पूर्वं भगवतो जायते । अथापि ब्रह्मणोऽपरजः । अवतारेषु च हनुमान् पूर्वजः । भीममध्वावपरजौ । रुद्रोऽपीन्द्रादिभ्यः पूर्वजः । ब्रह्म- वायुभ्यामपरजः ॥ २ ॥

अथ तृतीयो नमोवाकः–'नमो मध्यमाय चापगल्भाय च' इति । मध्यमे वयसि गतो मध्यमः । अपगल्भः अप्रगल्भः शिशुः । यः सद्यो गर्भादपगतः । गल्भ धार्ष्ट्ये । रलयोरभेदाद् गल्भ इति गर्भश्च । तत्तद्गताय नमः । सृष्टेः मध्येऽपि गताय नमः । स्वयं चावतारेषु मध्यम इव । बाल इव, युवेव, मध्यं वयः प्रपन्न इव । 'नमो महद्भ्यो नमो अर्भकेभ्यो नमो युवभ्यो नम आशिनेभ्यः' इति श्रुतिः । 'नमो महद्भ्योऽस्तु नमः शिशुभ्यो नमो युवभ्यो नम आवटुभ्यः' इति भागवते । अथाप्यपगतगर्भवासः । एवं मध्यमः प्राणो वायुः । स गर्भस्थं शिशुमपगमयतीत्यपगल्भः । अवतारेषु मध्यमो भीमः । कौन्तेयेषु च मध्यमः । स एवाप्रगल्भमिवाऽत्मानं दर्शयति धनुर्विद्यायामर्जुनस्य प्रागल्भ्यं प्रकटयितुम् । 'ज्येष्ठाय च कनिष्ठाय च' इति हनुमान् मध्वश्च स्तुतौ । 'पूर्वजाय चापरजाय च' इति त्रयोऽपि । अत्र पुनर्भीमो विशिष्य स्तूयते ॥

ब्रह्मवायू पूर्वजौ । इन्द्राद्या अनन्तराः । मध्यमस्तु रुद्रः । हरिणा शिवधनुर्भञ्जनेन शिवोऽपगतधाष्टर्यश्च बभूव ॥ ३ ॥

अथ चतुर्थो नमोवाकः–'नमो जघन्याय च बुध्नियाय च' इति । सृष्टौ पूर्वजो मध्यमश्चोक्तौ । अथ यः सृष्टौ जघन्यः चरमः । श्वादिः क्रिमिकीटादिर्वा । तत्र गताय । जघने भवं जघन्यं शिश्नं तत्र गताय सन्तानवृद्ध्यर्थम् । अथच बुध्ने वृक्षमूले गताय सिक्तजलेन पादपरक्षार्थम् । बुध्नशब्दाद् घन् । बुध्नियाय रुद्रगताय च । 'बुध्नो ना मूलरुद्रयोः' । बुधनेतरि जगद्गुरौ स्थिताय च । 'निर्यर्दी बुध्नान्महिषस्य वर्पसः' इत्यादिश्रुतेः । यथासम्भवं शिवश्च ॥ ४ ॥

अथ पञ्चमो नमोवाकः–'नमः सोभ्याय च प्रतिसर्याय च' इति । उभाभ्यां पुण्यपापाभ्यां सहितः सोभो भूलोकः । तत्रगताय नमः । पुण्येनामुं प्रति सरन्तीति प्रतिसर ऊर्ध्वलोकः । पापेनामुं प्रति सरन्तीति प्रतिसरोऽधोलोकश्च । तत्रगताय च नमः ॥

अथच प्रतिसरो हस्तसूत्रम्, दीक्षाबन्धः, येनाशौचादितो मुक्तो भवति । तत्रगताय नमः । भर्त्रा प्रतिबद्धः सरः मङ्गलसूत्रम् । येन महिळा सौभाग्यवती भवति । तत्रगताय नमः । प्रतिसरश्चमूपृष्ठम्, तत्रगताय नमः । समानं प्राणशिवयोः ॥

अथ चोभाभ्यां सेनाभ्यां समवेतं सोभं कुरुपाण्डवम् । तत्रगताय नमः । भगवान् कृष्णः सन् तत्रगतः । वायुर्भीमः सन् । प्रतिसरति परसेनामिति प्रतिसरो रथः । तत्रायं सारथित्वेन गतः । रथितया भीमः ॥ ५ ॥

अथ षष्ठो नमोवाकः–'नमो याम्याय च क्षेम्याय च' इति । यमगताय पापिनां शिक्षकाय नमः । मोक्षदानेन क्षेमप्रदाय क्षेमगताय नमः । तपस्विनां यामः संयमः । तद्गताय नमः । सतां यत् क्षेमं मङ्गलम्, तद्गताय नमः । लब्धस्य परिरक्षणं क्षेमम् । तद्गताय नमः । 'जानीयान्मङ्गलं क्षेमं क्षेमं लब्धार्थरक्षणम्' इत्यभिधानम् ॥ ६ ॥

अथ सप्तमो नमोवाकः–'नम उर्वर्याय च खल्याय च' इति । उर्वरा सस्याढ्या भूस्तत्रगताय । खलः सस्यरहितो देशस्तत्रगताय । उरुषु वरेषु सत्सु गताय । खलेषु दुर्जनेष्वपि गताय । समानं सर्वत्र । खलमित्युलूखलमुच्यते । तत्रगताय, मात्रा तत्र बद्धाय वा कृष्णाय ॥ ७ ॥

अथाष्टमो नमोवाकः–'नमः श्लोक्याय चावसान्याय च' इति । श्लोको यशः । यशस्विनां यशसि गताय नमः । कीर्तिकरः सन् अवसाने मरणेऽपि गताय । श्लोकाः पद्यरूपा ऋचः । तत्प्रतिपाद्याय । 'सर्वा ऋचः प्राण एव' इति श्रुतेः । सर्वैरपि पदैः, सर्वैरपि सद्भिः श्लोक्यते कीर्त्यत इति, श्लोकमर्हतीति वा श्लोक्यः । तस्मै नमः । अकारोकारमकाराणामवसाने नादे गताय, नादप्रतिपाद्याय नमः । सामवेदवेद्याय च । नादप्रधानं हि साम । 'वेदानां सामवेदोऽस्मि' इति हि भगवद्वचनम् । 'वेदानामवसानेषु वेदशिरस्सु उपनिषत्सु गताय' इत्येके । यथासम्भवं प्राणशिवयोरपि ॥ ८ ॥

अथ नवमो नमोवाकः–'नमो वन्याय च कक्ष्याय च' इति । वने महाद्रुमेषु गतो वन्यः । तस्मै नमः । 'न्यग्रोधोदुम्बरोऽश्वत्थः' इति हि सहस्रनामसु । वननीयश्च । वननीयेषु गतश्च । वं ज्ञानं नयति प्रापयत्यपनयति चेति वन्यः । 'मत्तः स्मृतिर्ज्ञानमपोहनं च' इति हि गीतासु । वीरुत्सु तृणेषु च गतः कक्ष्यो नरसिंह इत्युक्तम् । 'कक्षः शुष्कतृणे प्रोक्तः कक्षोऽरण्ये च वीरुधि' इत्यभिधानम् । 'कष हिंसायाम् । कष्यतेऽसौ गवादिभिरिति कक्षस्तृणम्' इति दशपादिकावृत्तिः । के ब्रह्मणि वायौ च क्षियति निवसति, अन्ते च क्षपयति ताविति कक्ष्यो नारायणः । केन सुखेन क्षीणाः कक्षास्तामसाः । तानपि यमयति नारायणः प्राणो रुद्रश्च ॥ ९ ॥

अथ दशमो नमोवाकः–'नमः श्रवाय च प्रतिश्रवाय च' इति । सर्वत्र सर्वैः श्रूयत इति श्रवाय पुण्यश्रवणकीर्तनाय नमः । प्रतिपदं प्रत्यक्षरं स एव श्रूयत इति प्रतिश्रवः । श्रव इति ध्वनिगतः । प्रतिश्रवः प्रतिध्वनिगतश्च ॥ १० ॥

अथैकादशो नमोवाकः–'नम आशुषेणाय चाऽशुरथाय च' इति । आशुगामिनी सेना यस्य स आशुसेनः । येय आशुसेना आशुरथा वा तेषां सेनाया रथस्य चाऽशुत्वसम्पादकतया तेषु सन्निहिताय नमः । अवग्रहपूर्वः सकारः षकारमापद्यते इति प्रातिशाख्ये स्थितम् (तै.प्रा.१.६.३) । षपूर्वत्वाच्च नस्य णः । तेन 'आशु+सेनः आशुषेणो' भवति । 'सुषामादिषु च' (अ.सू. ८.३.९८) इति सूत्रेण षत्वमिति वदन् भट्टभास्करो भ्रान्तः । तत्र यद्यपि एकारपरस्य सकारस्य मूर्धन्यादेशो विधीयते इणः परस्य–'एति सञ्ज्ञाया-मगात्' (१८३) इति गणसूत्रेण । तथापि तत् सञ्ज्ञायामेव । अत्र तु न सञ्ज्ञात्वविवक्षा । असञ्ज्ञायामप्यवग्रहात् परः सकारो मूर्धन्यतामापद्यते ॥

आशुगामिनी, अश्नुत इति सर्वव्यापिनी, अश्नातीति सर्वग्रासिनी च देवसेनाऽस्येत्याशुषेणः । आशुगामी गरुडोऽस्य रथ इति आशुरथः । वायुवाहनो वा । 'वरदो वायुवाहनः' इति च सहस्रनामसु । प्राणावतारेषु भीमश्चाऽशुषेण

आशुरथश्च । आशुभूतगणसेनो रुद्रः । आशुगामिनन्दिरथश्च । आशुः सर्वगतो नारायणः । तस्य रथस्थानीयौ च प्राणरुद्रौ ॥ ११ ॥

अथ द्वादशो नमोवाकः–'नमः शूराय चावभिन्दते च' इति । युद्धशूरश्च, शत्रू-नवभिनत्ति च । स्वभक्तद्विषो वा । शूरगतश्च । हनुमानपि । भीमोऽपि । मध्वश्च वादशूरः । अवबिभेद च मायावादम् । शिवश्च शूरोऽवभिन्दन् संहर्ता स्तूयते ॥ १२ ॥

अथ त्रयोदशो नमोवाकः–'नमो वर्म्मिणे च वरूथिने च' इति । वर्मणा कञ्चुकेन शरीरगुप्तिः । वरूथेन रथगुप्तिः । तदुभयसन्नद्धेषु स्थिताय नमः । वर्मिणि वीरे स्थिताय । गुप्तिमति रथे स्थिताय । 'वृणोति व्रियते वा वर्म आवरणम्' इति दशपादिकावृत्तिः । आवरणदेवताभिः परिवृताय नमः । नारा-यणवर्मप्रतिपाद्याय नमः । वरूथो गुप्तिः । वरूथिने मन्त्रेषु गुप्ताय नमः । यथायथं प्राणशिवावपि । विशिष्य भीमसेनो वर्मी च वरूथी च ॥ १३ ॥

अथ चतुर्दशो नमोवाकः–'नमो बिल्मिने च कवचिने च' इति । बिल्मं शिरस्त्राणम् । कवचमुरस्त्राणम् । तद्वत्सु स्थिताय नमः । समानं नारायणप्राणशिवेषु । 'वर्म उरस्त्राणम् । कवचमागुल्फावलम्बि कञ्चुकम्' इत्यपि व्याचक्षते । अत्रापि विशिष्य भीमात्मा प्राणः स्तूयते ॥ १४ ॥

अथ पञ्चदशो नमोवाकः–'नमः श्रुताय च श्रुतसेनाय च' इति । विश्रुताय सर्वशास्त्रश्रुताय नमः । श्रुतशास्त्रेषु स्थिताय नमः । विश्रुतसेनेषु क्षत्रियेषु स्थिताय नमः । विश्रुता देवसेना यस्य तस्मै । प्राणोऽपि श्रुतिगदितरूपत्रयः । 'ज्येष्ठश्च श्रेष्ठश्च' इति श्रुतिगदितमहिमा च । हनुमदवतारे कपिसेना । भीमत्वे पाण्डवसेना । मध्वत्वे विद्वत्सेना । श्रुतश्च इनेन नारायणेन सहितश्च । इने सूर्ये गतश्च सेनः । रुद्रोऽपि विश्रुतः श्रुतभूतसेनश्च । नन्ववग्रहात् परस्य सस्य षभावः उदितः । तेन श्रुतषेणायेति वक्तव्यम् । न वक्तव्यम् । अवग्रहात्

परस्यापि अवर्णपूर्वस्य न षत्वमिति प्रतिप्रसवात् । तथाहि सूत्रम्–'अवर्ण-व्यञ्जन-शकुनि-पत्नी-ऋतु-मृत्यु-मलिम्लु-बृहस्पतिपूर्वः'(तै.प्रा.६.७) इति ॥ १५ ॥

इत्याचार्यगोविन्दस्य कृतिषु तैत्तिरीयरुद्रप्रपाठकषष्ठानुवाकभाष्यम् ॥

—०—

अत्रोदितानि नामानि–३०
संहत्य–१४३+३०=१७३
पदानि–७५
संहत्य–५८१+७५=६५६

[सप्तमोऽनुवाकः]

नमो᳚दुन्दु॒भ्या॑यचाहन॒न्या॑यच॒ १
नमो᳚धृ॒ष्णवे᳚चप्रमृ॒शाय॑च॒ २
नमो᳚दू॒ताय॑च॒प्रहि॑तायच॒ ३
नमो᳚निष॒ङ्गिणे᳚चेषुधि॒मते᳚च॒ ४
नम॑स्ती॒क्ष्णेष॑वेचायु॒धिने᳚च॒ ५
नम॑स्स्वायु॒धाय॑चसु॒धन्व॑नेच॒ ६
नम॒स्स्रुत्या॑यच॒पथ्या॑यच॒ ७
नम॑ᳵक्का॒ट्या॑यचनी॒प्या॑यच॒ ८
नम॒स्सूद्या॑यचसर॒स्या॑यच॒ ९
नमो᳚ना॒द्याय॑चवैश॒न्ताय॑च॒(१) १०
नम॒ᳵक्कूप्या॑यचाव॒ट्या॑यच॒ ११
नमो॒वर्ष्या॑यचाव॒र्ष्याय॑च॒ १२
नमो᳚मे॒घ्याय॑चविद्यु॒त्या॑यच॒ १३

नम॑ऽई॒ध्रिया॑यचात॒प्या॑यच॒ १४

नमो॒वात्या॑यच॒रेष्मि॑यायच॒ १५

नमो॑वास्त॒व्या॑यचवास्तु॒पाय॑च ॥ ७ ॥ १६

नम॑ः । दु॒न्दु॒भ्या॑य । च॒ । आ॒ह॒न॒न्या॑येत्या॑+ह॒न॒न्या॑य । च॒ । नम॑ः । धृ॒ष्णवे॑ । च॒ । प्र॒मृ॒शायेति॑प्र+मृ॒शाय॑ । च॒ । नम॑ः । दू॒ताय॑ । च॒ । प्रहि॑ता॒येति॒प्र+हि॒ता॒य॒ । च॒ । नम॑ः । नि॒ष॒ङ्गिण॒इति॑नि+स॒ङ्गिने॑ । च॒ । इ॒षु॒धि॒म॒तइती॑षुधि+मते॑ । च॒ । नम॑ः । ती॒क्ष्णेष॑व॒इति॑ती॒क्ष्ण+इ॒ष॒वे॒ । च॒ । आ॒यु॒धिने॑ । च॒ । नम॑ः । स्वा॒यु॒धायेति॑सु+आ॒यु॒धाय॑ । च॒ । सु॒धन्व॑न॒-इति॑सु+धन्व॑ने । च॒ । नम॑ः । स्रु॒त्या॑य । च॒ । पथ्या॑य । च॒ । नम॑ः । का॒ट्या॑य । च । नी॒प्या॑य । च॒ । नम॑ः । सू॒द्या॑य । च॒ । स॒र॒स्या॑य । च॒ । नम॑ः । ना॒द्याय॑ । च॒ । वै॒श॒न्ताय॑ । च॒ (१) । नम॑ः । कू॒प्या॑य । च॒ । अ॒व॒ट्या॑य । च॒ । नम॑ः । वर्ष्या॑य । च॒ । अ॒व॒र्ष्याय॑ । च॒ । नम॑ः । मे॒घ्या॑य । च॒ । वि॒द्यु॒त्या॑येति॑वि+द्यु॒त्या॑य । च॒ । नम॑ः । ई॒ध्रिया॑य । च॒ । आ॒त॒प्या॑येत्या॑+त॒प्या॑य । च॒ । नम॑ः । वात्या॑य । च॒ । रेष्मि॑याय । च॒ । नम॑ः । वा॒स्त॒व्या॑य । च॒ । वा॒स्तु॒पायेति॑वास्तु+पाय॑ । च॒ ॥ ७ ॥

(वै॒श॒न्ताय॑च त्रि॒ꣳशच्च॑)

इति सप्तमोऽनुवाकः

—०—

सप्तमेऽनुवाके षोडशनमोवाकमेकं यजुः । अशीतिः पदानि । अग्निरेवर्षिः । केचिदाचक्षते–‘अस्यानुवाकस्य हेमकोश ऋषिः । श्रीरुद्रो देवता । महापङ्क्तिश्छन्दः’ इति ॥

तत्र प्रथमो नमोवाकः–‘नमो॑ दुन्दु॒भ्या॑य चाऽहन॒न्या॑य च’ इति । दुन्दुभौ गताय । आहननं वादनदण्डः । तत्रगताय च । उभयोर्भवन् तयोः संयोगेनापूर्वं श्रवणसुभगं नादं जनयति । एवं नादवेद्याय नादगताय । एवमाहनेन यत् सङ्गीतमुपजायते मृदङ्गादिषु जलतरङ्गादिषु च तत्रगताय सङ्गीतवेद्याय च । समं वीणालोलस्य वाणीपतेर्नटराजस्य च ॥ १ ॥

अथ द्वितीयो नमोवाकः–‘नमो॑ धृ॒ष्णवे॑ च प्रमृ॒शाय॑ च’ इति । दुन्दुभिराहन्यत । सहसैव चाभ्यहन्यन्त पणवानकगोमुखाः । प्रावर्तत युद्धम् । युयुधे धृष्णुर्योद्धा । धृष्णुरिति परसेनाधर्षणपटुः । स्वपक्षरक्षाकुशलश्च । तस्मिन् स्थित्वा तस्य तादृशीं शक्तिं भगवानेव ददाविति तस्मै धृष्णवे नमः । धर्षणमपि नाविवेकेन । तथाच कस्य कदा किं करणीयमिति परामर्शपटुः प्रमृश उच्यते । तच्छक्तिप्रदाय प्रमृशाय च नमः । समानं प्राणरुद्रयोः । युद्धेष्वपलायिता धृष्णुः क्षत्रियः । वेदार्थं परामृशन् प्रमृशो विप्रः । रामादिरूपेण धृष्णुः । व्यासादिरूपेण प्रमृशः । अथ प्राणावतारेषु हनुमानपि अशोकवनिकादहनदक्षो धृष्णुः । ब्रह्मास्त्रेण बद्धमात्मानं दर्शयन् भाविकार्यपरामर्शकुशलश्च । भीमो धृष्टो रण-कर्मणि । अथापि गुरुत्वं विमृशन् भीष्मद्रोणादिभिर्न युयुधे । एवं मध्वोऽपि तामसान् धर्षयित्वा निरास । सात्विकान् विमृशन्नुद्दधार ॥ २ ॥

अथ तृतीयो नमोवाकः–‘नमो॑ दू॒ताय॑ च॒ प्रहि॑ताय च’ इति । सन्देशहरो दूतः । तद्गताय नमः । देवानां दूतोऽग्निः । ‘अग्निर्देवानां दूत आसीत्’ इति शतपथब्राह्मणम् । ‘अग्निं दूतं वृणीमहे’ इति च बाह्वृच्यम् । तद्गताय नारायणाय नमः । दूतत्वेन प्रहिताय च नमः । समानं प्राणरुद्रयोः । प्रकृष्टहितश्च प्रहितः ॥

अथ शान्तिदूताय पाण्डवैः प्रहिताय कृष्णाय नमः । वायुश्च विष्णुदूतः । तेनैव च प्रहितो भूमाववतारार्थम् । विशिष्य च रामदूताय हनुमते । तेनैव लङ्कायै प्रहिताय च ॥ ३ ॥

अथ चतुर्थो नमोवाकः–‘नमो॑ नि॒षङ्गिणे॑ चेषु॒धिमते॑ च’ इति । पूर्वं निषङ्गी चेषुधिमांश्च तस्कराणां पतिरुक्तस्तृतीयेऽनुवाके । अत्र योद्धा प्रजारक्षणार्थं

निषङ्गी चेषुधिमांश्चोच्यत इति भेदः । अर्थस्तु समानः । पूर्वस्मिन्नमोवाके हनुमान् प्रस्तुतः । अत्र तु विशिष्य भीमरूपस्यानुसन्धानमिति ॥ ४ ॥

अथ पञ्चमो नमोवाकः–'नम॑स्तीक्ष्णेष॑वे चाऽऽयुधिने॑ च' इति । निशितशरेषु बहुविधप्रशस्तायुधवत्सु गताय नमः । निशितप्राणाख्यशराय नारायणाय नमः । सर्वप्रहरणायुधाय च । निशितेषुरूपाय प्राणाय । प्रशस्तगदाय च । तीक्ष्णेषुः प्रशस्तगदी च भीमोऽपि । संहारकः शिवोऽपि । मत्वर्थीय इनिरयमायुधानां बहुत्वं प्राशस्त्यं नित्ययोगं चाऽह । तथाहि स्मरन्ति–'भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने । संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः' इति ॥ ५ ॥

अथ षष्ठो नमोवाकः–'नम॑: स्वायुधाय॑ च सुधन्व॑ने च' इति । शोभन-सुदर्शनायुधाय नारायणाय । गदायुधाय प्राणाय । त्रिशूलिने रुद्राय । स्वायुधगताय च । शोभनं शार्ङ्गं धनुरस्येति सुधन्वा । 'सुधन्वा खण्डपरशुः', 'शार्ङ्गधन्वा गदाधरः' इति च । अजगवं धनुरस्येति सुधन्वा पिनाकी । विशिष्य चात्रापि भीमरूपानुसन्धानम् । 'अधिज्यमपि यत् कर्तुं शक्यते नैव गाण्डिवम् । अन्यत्र भीमपार्थाभ्यां भवतश्च जनार्दन' (वनप.१२.८०) इति द्रौपदीवाक्यं भारते ॥ ६ ॥

अथ सप्तमो नमोवाकः–'नमः स्रुत्या॑य च पथ्या॑य च' इति । इतः परमाऽनुवाकान्तं भवार्थकयत्प्रत्ययान्तानि पदानि । क्षुद्रमार्गः स्रुतिः । महामार्गः पन्थाः । तत्र च तत्र च गताय नमः । स्रु गतौ । पथे गतौ । यत् स्रवति स्यन्दते तत् स्रुतं पयआदि । तत्रगताय नमः । चिकित्सादौ हितं पथ्यम् । तत्रगताय वा ॥ ७ ॥

अथाष्टमो नमोवाकः–'नम॑: काट्या॑य च नीप्या॑य च' इति । काटोऽरण्यम् । यत्र कुत्सितमटनं भवति । 'ಕಾಡು' इति भाषायम् । जम्बालजटिलो वा प्रदेशः । तत्रगताय नमः । 'अल्पप्रवाहयोग्यः कुल्याप्रदेशः' इत्येके । 'काटो लिङ्गम् । तत्र भवः काट्यः' इत्यपरे । नीचैरापो यत्र पतन्ति स नीपो जलपातप्रदेशः । यतः पतन्तीति पातमूलप्रदेशो वा । जलपात एव वा नीपः । नीप्याय तत्रगताय नमः ॥ ८ ॥

अथ नवमो नमोवाकः–'नमः सूद्या॑य च सरस्या॑य च' इति । सूदं स्वादुजलम् । तत्रगताय नमः । 'सूदः कर्दमः' इत्यन्ये । सूदेष्वपि विशिष्य देवमन्दिरसरसि गताय नमः । सूदा आन्धसिकाः । तेषु स्थित्वा रसपाकस्य कारयित्रे नमः । अथ तैः कृतं सरसं पायसखण्डखाद्यादि । तत्रगताय नमः ॥ ९ ॥

अथ दशमो नमोवाकः–'नमो॑ नाद्याय॑ च वैशन्ताय॑ च' इति । नदीजलगतो नाद्यः । तस्मै नमः । 'पाथोनदीभ्यां ड्यण्' (अ.सू.४.४.१११) । विशन्त्यत्र स्नातुमिति वेशन्तः क्षुद्रं सरः । 'वेशन्तस्त्वल्पपल्वले' इति यादवप्रकाशः । तत्रगताय नमः । वेशं वेश्यागृहं तत्वा तत्र ताभिः प्रारब्धानुगुणमकार्यं चायमेव कारयति । 'एष उ एवासाधु कर्म कारयति' इति श्रुतिः । नगरेषु बहुविधं वेशं गृहविन्यासं च तनोति । अद्भुतं देवायतनम्, अद्भुतः सौधः, अद्भुतः प्रासादः, अद्भुतोपकार्या, अद्भुता चन्द्रशाला चेति सर्वमेतन्मनुष्याणां शिल्पकौशलं भगवदायत्तमिति । न विद्यत आद्यो यस्मादिति नाद्यः अनादिर्भगवान् । अथापि भक्तवत्सलतया बहुविधमवतारेषु वेशं तनोतीति वेशन्त एव वैशन्तः । तथाह्यभिदधति–'गृहमात्रे गणिकायाः सद्मनि वेशो भवेत्तु तालव्यः । तालव्यो मूर्धन्योऽलङ्करणे कथित आचार्यैः' इति ॥ १० ॥

अथैकादशो नमोवाकः–'नमः कूप्या॑य चावट्या॑य च' इति । कूपजलगताय नमः । अवटस्थजलगताय च नमः । अवटो गर्तः ॥ ११ ॥

अथ द्वादशो नमोवाकः–'नमो वर्ष्या॑य चावर्ष्याय॑ च' इति । वर्षजलगताय नमः । वर्षनिरपेक्षसमुद्रजलगताय नमः ॥ १२ ॥

अथ त्रयोदशो नमोवाकः–'नमो॑ मेघ्याय॑ च विद्युत्या॑य च' इति । मेघगताय नमः । विद्युति गताय नमः ॥ १३ ॥

अथ चतुर्दशो नमोवाकः–'नम॑ ईध्रिया॑य चाऽत॒प्या॑य च' इति । ईं शोभां धरतीति ईध्रं शुभ्रं निरभ्रं गगनम् । वीध्रमित्येव शुक्लाः पठन्ति । इन्धते इति वा ईध्रम् । इन्धेः क्रन्, ईभाव इकारस्य । तत्रभवाय नमः । आतपे भवाय च नमः ॥ १४ ॥

अथ पञ्चदशो नमोवाकः–'नमो॒ वात्या॑य च॒ रेष्मि॑याय च' इति । वातगतोऽयं वातं प्रेरयति । तस्मै नमः । रिष हिंसायाम् । रिषन्ति नश्यन्ति भूतान्यत्रेति रेष्मा संवर्तानिलः संवर्त एव वा । तत्रभवाय च नमः । प्राणावतारेषु वाते हनूमति भीमे मध्वे च गताय रामाय कृष्णाय व्यासाय च । रेष्म तैः कृतं युद्धं ज्ञानयुद्धं च । तत्रगताय च नमः ॥ १५ ॥

अथ षोडशो नमोवाकः–'नमो॑ वास्त॒व्या॑य च वास्तु॒पाय॑ च' इति । वास्तुभूमौ भवाय । वास्तुपुरुषपालाय वराहाय वास्तुजनकाय नमः । वास्तुमण्डलदेवतात्वेन वायू रुद्रश्च वास्तुपौ । तदेवं सर्वगतत्वमनुवाकेऽत्र निरूपितम् ॥ १६ ॥

इत्याचार्यगोविन्दस्य कृतिषु तैत्तिरीयरुद्रप्रपाठकसप्तमानुवाकभाष्यम् ॥

—०—

अत्रोदितानि नामानि–३२

संहत्य–१७३+३२=२०५

पदानि–८०

संहत्य–६५६+८०=७३६

[अष्टमोऽनुवाकः]

नम॒स्सोमा॑यचरु॒द्राय॑च॒ १
नम॑स्ता॒म्राय॑चारु॒णाय॑च॒ २
नम॑श्श॒ङ्गाय॑चपशु॒पत॑येच॒ ३
नम॑ऽउ॒ग्राय॑चभी॒माय॑च॒ ४
नमो॑ऽअग्रेव॒धाय॑चदूरेव॒धाय॑च॒ ५
नमो॑ह॒न्त्रेच॒हनी॑यसेच॒ ६
नमो॑वृ॒क्षेभ्यो॒हरि॑केशेभ्यो॒ ७
नम॑स्ता॒राय॒ ८
नम॒श्श॒म्भवे॑चमयो॒भवे॑च॒ ९
नम॑श्शङ्क॒राय॑चमयस्क॒राय॑च॒ १०
नम॑श्शि॒वाय॑चशि॒वत॑रायच॒ (१) ११
नम॒स्तीर्थ्या॑यच॒कूल्या॑यच॒ १२
नम॑ऽप्पा॒र्य्या॑यचावा॒र्य्या॑यच॒ १३
नम॑ऽप्प्र॒तर॑णायचो॒त्तर॑णायच॒ १४
नम॑ऽआता॒र्य्या॑यचाला॒द्या॑यच॒ १५

नम॒श्शष्प्या॑यच॒फेन्या॑यच॒ १६

नम॑स्सिक॒त्या॑यचप्रवा॒ह्या॑यच ॥ ८ ॥ १७

नम॑ः । सोमा॑य । च॒ । रु॒द्राय॑ । च॒ । नम॑ः । ता॒म्राय॑ । च॒ । अ॒रु॒णाय॑ । च॒ । नम॑ः । श॒ङ्गाय॑ । च॒ । प॒शु॒पत॑य॒इति॑पशु+पत॑ये । च॒ । नम॑ः । उ॒ग्राय॑ । च॒ । भी॒माय॑ । च॒ । नम॑ः । अ॒ग्रे॒व॒धायेत्य॑ग्रे+व॒धाय॑ । च॒ । दू॒रे॒व॒धायेति॑दूरे+व॒धाय॑ । च॒ । नम॑ः । ह॒न्त्रे । च॒ । हनी॑यसे । च॒ । नम॑ः । वृ॒क्षेभ्य॑ः । हरि॑केशेभ्य॒इति॒हरि॑+के॒शे॒भ्य॒ः । नम॑ः । ता॒राय॑ । नम॑ः । श॒म्भव॒इति॑शम्+भवे॑ । च॒ । म॒यो॒भव॒इति॑मयः+भवे॑ । च । नम॑ः । श॒ङ्क॒रायेति॑शम्+क॒राय॑ । च॒ । म॒य॒स्क॒रायेति॑मयः+क॒राय॑ । च॒ । नम॑ः । शि॒वाय॑ । च॒ । शि॒वत॑र॒ायेति॑शि॒व+त॒रा॒य॒ । च॒ (१) । नम॑ः । तीर्थ्या॑य । च॒ । कूल्या॑य । च॒ । नम॑ः । पा॒र्या॑य । च॒ । अ॒वा॒र्या॑य । च॒ । नम॑ः । प्र॒तर॑णा॒येति॑प्र+तर॑णाय । च॒ । उ॒त्तर॑णा॒येत्यु॑त्+तर॑णाय । च॒ । नम॑ः । आ॒ता॒र्या॑येत्या॑+ता॒र्या॑य । च॒ । आ॒ला॒द्या॑येत्या॑+ला॒द्या॑य । च॒ । नम॑ः । शष्प्या॑य । च॒ । फेन्या॑य । च॒ । नम॑ः । सिक॒त्या॑य । च॒ । प्र॒वा॒ह्या॑येति॑प्र+वा॒ह्या॑य । च॒ ॥ ८ ॥

(शि॒वत॑रायच त्रि॒९॑शच्च॑)

इत्यष्टमोऽनुवाकः

—०—

अष्टमोऽनुवाकः सप्तदशनमोवाकमेकं यजुः । अशीतिः पदानि । अग्निरेव ऋषिः । केचिदाचक्षते–'शिव ऋषिः । महानुष्टुप् छन्दः । शिव एव देवता' इति ॥

तत्र प्रथमो नमोवाकः–'नम॒ः सोमा॑य च रु॒द्राय॑ च' इति । सोम इव सोमः, सौम्यः सताम् । असतां रुद्रः । उमासहितः सोमः शम्भुः । उत्कृष्टा मा प्रमा उमा । तया सहितः सोमः पवमानः । सौम्यगुणः, सर्वजीवोत्कृष्टया मया रमया सहितः सोमो नारायणः । रुद्रपदं गदितार्थम् । शतं रुद्रपदार्था भवन्तीति

स्मर्यते–'रुद्रो बहुशिरा बभ्रुः' इति । अतः पुनःपुनरनुसन्धेयानि नामानि भवन्तीति पुनर्वचनम् । एवमन्यत्रापि ॥ १ ॥

अथ द्वितीयो नमोवाकः–'नम॑स्ता॒म्राय॑ चा॒रु॒णाय॑ च' इति । सोमान्तर्यामी स्तुतः । अथाऽदित्यगतः स्तूयते ताम्राय चारुणाय चेति । उदयकाले ताम्राय रक्ताय । ततोऽरुणाय ईषद्रक्ताय । अरुणे सूर्यसारथौ गतश्चारुणः । भास्करोऽप्यरुणः । 'अरुणः सूर्यसारथौ । अव्यक्तरागे शशिजे सन्ध्याभ्रे लोहिते रवौ' इति यादवप्रकाशः । यथायथं सर्वेऽप्यर्था ग्राह्याः ॥ २ ॥

अथ तृतीयो नमोवाकः–'नम॑ः श॒ङ्गाय॑ च पशु॒पत॑ये च' इति । शं मोक्षसुखं गमयतीति शङ्गः । तस्मै नमः । पशूनां संसारबद्धानां पालकाय च नमः । 'उतामृतत्वस्येशानो यदन्नेनातिरोहति' इति हि श्रुतिः । मुक्तामुक्तनियामक इत्येतत्तदुक्तं भवति । शमानन्दरूपं भगवन्तमानन्दं वा गच्छतीति शङ्गः शतानन्दो वायुः । शङ्गः शङ्कर इति पशुपतिरिति च स्फुटम् ॥ ३ ॥

अथ चतुर्थो नमोवाकः–'नम॑ उ॒ग्राय॑ च भी॒माय॑ च' इति । असतामायुधैरुग्रः । दर्शनेनैव भीमः । उं रुद्रं ग्रसतीति च । 'उग्रः संवत्सरो दक्षः' इति, 'भीमो भीमपराक्रमः' इति च । नखैरुग्रो हनुमान् । नादेन च । आयुधैः नादेन च भीमः । तर्कैर्मध्वः । असतां दर्शनेनैव भीमाः सर्वेऽपि । 'वायुर्भीमो भीम-नादो महौजाः' इति च भारते । भृतमत्वाच्च भीमः । मा भीर्येनेत्यभयप्रदत्वाच्च भीमः ॥ ४ ॥

अथ पञ्चमो नमोवाकः–'नमो॑ अग्रेव॒धाय॑ च दूरेव॒धाय॑ च' इति । 'नमो अग्रे–' इत्यत्र अकारो लोपं नाऽपद्यत इत्याह तैत्तिरीयप्रातिशाख्यकारः–'नमःपूर्वोऽग्रेऽश्वेभ्योऽग्रियाय' (११.१४) इति ॥

अग्रे सम्मुख एव परस्परं समवेत्य केशाकेशि बाहूबाहवि मुष्टीमुष्टि वा, अथाऽयुधैर्दण्डादण्डि मुसलामुसलि कुन्ताकुन्ति शूलाशूलि शराशरि वा

युद्धे वधो यस्य तद्गताय । वधो येन तद्गताय च । 'बाध्यबाधकतां गतः' इति ह्युक्तम् । एवं दूरत एव मन्त्रादिना कृत्याप्रयोगेण वा शब्दवेधादिना वा वधो यस्य येन च तद्गताय च नमः ॥

अथच अग्रे बन्धूनां समक्ष एव कौरवपक्षीयाणां वधो येन रथगतेन चक्षुषैव तेषामायुर्हरता कृष्णेन तस्मै नारायणाय नमः । एवं युद्धरङ्गाद् दूरे त्रैगर्तानां वधो यदनुग्रहेण तस्मै दूरेवधाय नमः । एवमग्रे प्रह्लादस्य पुरत एव हिरण्यकशिपुमवधीदित्यग्रेवधो नरसिंहः । दूरे हिरण्याक्षमवधीदिति दूरेवधो वराहः । मकारेण नादेन च वाच्यं रूपद्वयमिदम् । एवं रावणकुम्भकर्णयोरग्रेवधो रामः । उकारवाच्यं रूपमेतत् । शिशुपालदन्तवक्रौ स्वनगराद् दूरं नीत्वाऽवधीदिति दूरेवधः कृष्णः । अकारवाच्यं रूपमेतत् । एवं प्रणवप्रतिपाद्यं विशिष्य सन्न्यासिभिरुपास्यं रूपचतुष्टयमुदितम् । एवं कांश्चिदग्रे स्थित्वा स्वयमेव हन्ति भगवान् । कांश्चित् पारोक्ष्येण परैर्घातयति ॥

अथ कर्णादीनां पुरत एव दुःशासनमवधीदित्यग्रेवधो भीमः । दूरे सरसि दुर्योधनवधाद् दूरेवधश्च । शिवश्चाश्वत्थामा पाण्डवानामग्रे बहूनां तत्पक्षीयाणां वीराणां वधादग्रेवधः । दूरे निशायुद्धे शिबिरदाहेन सुप्तानां हननाद् दूरेवध इति ॥ ५ ॥

अथ षष्ठो नमोवाकः—'नमो॑ ह॒न्त्रे च॒ हनी॑यसे च' इति । योयः पुरुषं वा पशुं वा हन्ति तद्गताय नमः । अथच प्रळये सर्वहन्त्रे नमः । 'मया हतांस्त्वं जहि', 'मयैवैते निहताः पूर्वमेव' इति हि भगवद्वचनम् । शिवो हन्ति । प्राणो हन्ति । नारायणो हन्ति । अहं हन्मि अयमहन्नित्यादि स्वातन्त्र्ये भ्रममात्रम् । अत एव स्वातन्त्र्येणातिशयेन हन्ता हनीयान् । 'तुश्छन्दसि' (अ.सू.५.३.५९) इति त्रन्तात् हन्तृशब्दात् छान्दस ईयसुन् प्रत्ययः । 'तुरिष्ठेमेयस्सु' (अ.सू.६.४.१५४) इति ईयसुनि परे तृचो लोपः । कामं हन्ति, अविद्यां हन्ति, अन्ते संसारमेव च हन्ति । एवं सर्वदोषहानेन मोक्षदानाद्धनीयान् । राक्षसान् हन्ति

हनुमान् । कौरवान् हन्ति भीमः । मायावादं हन्ति मध्वः । अन्येऽप्यघ्नन् । अयं तु त्रिरूपो हनीयानिति ॥ ६ ॥

अथ सप्तमो नमोवाकश्चकाररहितः—'नमो॑ वृ॒क्षेभ्यो॒ हरि॑केशेभ्यः' इति । नेदं नामद्वयम् । किन्त्वेकं विशेषणमिति चकाराभावः । द्वितीयानुवाके चैतत् पठ्यते । अर्थविशेषानुसन्धानाय पुनरुक्तिः । वृक्षेभ्यः संसारच्छेत्तृभ्य हरिकेशेभ्यः । सूर्यनारायणहयग्रीवनरसिंहेभ्यो नमः । हरेः सूर्यस्य केशाख्येषु रश्मिषु सन्निहित इति हरिकेशः सूर्यनारायणः । हरेरश्वस्येव केशा अस्येति हरिकेशो हयग्रीवः । हरेः सिंहस्येव केशा अस्येति हरिकेशो नरसिंहः । अन्यत् पूर्वोक्तवदनुसन्धेयम् । हरिः, को ब्रह्मा, ईशः शिवः इति त्रिरूपेभ्यो नमः । वृक्षो देहस्तत्र गतेभ्यो बहुरूपेभ्यः नीलकेशेभ्यश्च ॥ ७ ॥

अथाष्टमो नमोवाक एकनामा—'नम॑स्ता॒राय॑' इति । अद्वितीयमिदं नामेति द्योतनाय न द्वितीयं नाम पपाठ । संसारात् तारयतीति तारः । ओङ्कारप्रतिपाद्यः । 'अशोकस्तारणस्तारः' इति च । तदनुज्ञया मोक्षदत्वात् प्राणोऽपि । 'विष्णुर्हि दाता मोक्षस्य वायुश्च तदनुज्ञया' इति स्मरणात् । पापात् तारयतीति वा तारः । वाराणस्यां मृतानां तारकं रामनामोपदिशतीति शम्भुरपि तारः ॥ ८ ॥

अथ नवमो नमोवाकः—'नमः॑ श॒म्भवे॑ च मयो॒भवे॑ च' इति । ध्यानादिजमन्तःसुखं शम् । स्वरूपसुखं च । विषयजं बाह्यसुखं मयः । तदुभयसुखात्मकत्वात् शं भवति मयो भवतीति शम्भुर्मयोभुः । 'श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च । अधिष्ठाय मनश्चायं विषयानुपसेवते' इति गीतासु । 'डुप्रकरणे मितद्र्वादिभ्य उपसङ्ख्यानम्' इति वार्तिकम् (अ.सू. ३.२.१८०) । तेन मितं द्रवति मितद्रुः । शम्भुः । मयोभुः । क्वचिदसञ्ज्ञात्वविवक्षायां स्वयम्भुरपि । केचित् 'मयोभूः' इति पठन्ति । तदा 'मयोभुवे' इति

श्रुतिपाठः । शं भवत्यस्मादित्यादि च व्याचक्षते । शं भावयतीत्यादि चान्ये । 'दुःखशमनं शम् । मयः सुखम्' इति केचित् । 'ऐहिकामुष्मिकत्वाभ्यां भेदः' इति च । 'स्वयम्भूः शम्भुरादित्यः' इति च ॥ ९ ॥

अथ दशमो नमोवाकः–'नमः शङ्कराय च मयस्कराय च' इति स्वभक्तानां शं मयश्च करोति । भट्टभास्करस्तु 'सर्वप्राणिभ्यः शं सुखं ताच्छील्येन करोतीति शङ्करः । 'कृञो हेतुताच्छील्यानुलोम्येषु' (अ.सू.३.२.२०) इति टः । यद्वा 'शमि धातोः सञ्ज्ञायाम्' (अ.सू.३.२.१४) इत्यच् । शङ्करदेवो हि तच्छीलस्तत्सञ्ज्ञश्च' इत्याह ॥ १० ॥

अथैकादशो नमोवाकः–'नमः॑ शि॒वाय॑ च शि॒वत॑राय च' इति । शिवाय ज्ञानानन्दस्वरूपाय नमः । जीवा अपि ज्ञानानन्दमयाः । अयं त्वतिशयेन शिव इति शिवतरः । 'सर्वः शर्वः शिवः स्थाणुः' इति च । निरतिशयानन्त-ज्ञानानन्दमयो नारायणः । जीवेषु शिवतरः प्राणः । तदनु रुद्रः । शिवाः ज्ञानानन्दरूपा जीवास्तरन्त्यनेनाज्ञानमनानन्दं चेति शिवतरः । शिवोऽपि तरत्यनेन भगवतेति च ॥ ११ ॥

अथ द्वादशो नमोवाकः–'नम॒स्तीर्थ्या॑य च॒ कूल्या॑य च' इति । तीर्थेषु पुण्यजलेषु भवति पावित्र्यहेतुः सन्निति तीर्थ्यः । 'स एव द्रवरूपेण गङ्गाम्भो नात्र संशयः' इति हि स्मरन्ति । तीर्थेषु शास्त्रेषु च गतः प्रतिपाद्यतया । तस्मै नमः । तीर्थकूलेषु निर्मितमन्दिरगतश्चायम् । अथ च कूले सैन्यपृष्ठे गताय नमः । शास्त्रगतः अविद्यां निरस्यति । सैन्यपृष्ठगतः शत्रून् निरस्यति । 'कूलं तटे सैन्यपृष्ठे' इत्यभिधानम् ॥ १२ ॥

अथ त्रयोदशो नमोवाकः–'नमः॑ पा॒र्या॑य चावा॒र्या॑य च' इति । नदीसमुद्रादीनां पारमपरतीरम् । अवारमर्वाक्तीरम् । न केवलं तीर्थे, पारावारयोरपि स्थित्वा सीमानं निर्माति । अथच संसारसागरस्य पारमपरतीरं मुक्तिस्थानम्, तत्र गताय नमः । अवारमर्वाक्तीरं संसृतिस्थानम् । तत्र गताय

च नमः । मुक्तिदाता संसृतिदाता च भगवानेवेत्येतत् । 'उतामृतत्वस्येशानो यदन्नेनातिरोहति' इति च ॥ १३ ॥

अथ चतुर्दशो नमोवाकः–'नमः॑ प्र॒तर॑णाय चो॒त्तर॑णाय च' इति । प्रतरन्त्येतदिति प्रतरणं जलम् । उत्तरणं नौः । प्रतरणमाकाशादिकम् । उत्तरणं विमानादिकम् । तत्रतत्र स्थित्वा तत्तच्छक्तिप्रदाय नमः । कर्मणा प्रतारयति पापेभ्यः । ज्ञानेनोत्तारयति च । तस्मै नमः ॥ १४ ॥

अथ पञ्चदशो नमोवाकः–'नम॑ आता॒र्या॑य चाऽऽला॒द्या॑य च' इति । आवर्तनेन पुनःपुनः संसारे तरति प्लवत इति आतारो नित्यसंसारी । सम्प्रति संसारगश्च । तत्रगताय तन्नियन्त्रे नमः । अमुक्तनियामकायेत्येतत् । आसंसारान्तम् अलं पर्याप्तं कर्मफलमदन्तीत्यालादा मुक्ताः । तेषु गताय तन्नियामकाय च नमः । 'मुक्तानां परमा गतिः' इति च । तरणीयमा तार्यतेऽनेनेति चाऽतार्यः । अदनीयं च आ समन्तात् अलमाद्यमनेन । आलान्ति आद्यमनेनेति वा । आद्यं चतुर्मुखमालाति स्वीकरोति सृष्टिकर्मणीति वा । आद्यमदनीयं जगत् सर्वमालाति प्रळय इति वा ॥ १५ ॥

अथ षोडशो नमोवाकः–'नमः॒ शष्प्या॑य च॒ फेन्या॑य च' इति । प्रशस्यते छेदेऽपि पुनरवशिष्यते पाति च पातकेभ्य इति शष्पं पवित्रं तृणं दर्भादि । तत्पावित्र्यसम्पादकतया तत्रगताय नमः । शिष्यते गवादिभिरिति शष्पं बालतृणमिति वैयाकरणाः । धातोरुपधाया अत्वं पश्च प्रत्ययो निपात्यत इति । स्यात् तदपि । बालतृणच्छन्ना श्यामला कोमला च सती चक्षुःस्पर्शनसुखदा क्षोणी क्षौमावृतेव मनो हरति । नायं शष्पमहिमा । किन्तु तत्रगतस्य भगवतो महिमेत्यर्थः । नदीतीरे शष्पगतः । नदीमध्ये फेनगतः । समुद्रतीरे च । फेनं ह्यब्धिकफमाहुः । 'स्फायत इति फेनः बुद्बुदसङ्घातः' इति दशपादिकावृत्ति-कारः । पयसः फेनेषु दधिमथनजेषु फेनेषु च गताय । येन नवनीतं भवति । अथ

शष्पाः ये शष्पन्ति । अल्पसत्त्वास्तृणप्रायाः । ते फेना ये फेनन्ति । फेनकल्पा अल्पायुषः । तेषु चायं गतः ॥ १६ ॥

अथ सप्तदशो नमोवाकः—‘नम॑ः सिक॒त्या॑य च प्रवा॒ह्या॑य च’ इति । नदीसमुद्रतीरगतसिकतासु नदीप्रवाहेषु चायमेव गत इति ध्येयो भवति । सर्वत्र स्थितो भगवानेव सर्वं नियमयति । तदनु प्राणशङ्करौ च । अथ च सिकता वालुकामयी भूमिः । यत्र न किमपि प्ररोहति । एवं सिकताकल्पा व्यर्थजीवनाः सिकताः । ये प्रकृष्टं जीवनं निर्वहन्ति ते प्रवाहाः । तत्रतत्र चायं गतस्तत्तत् प्रेरयति । यथास्वभावं हि जीवनं भवति ॥ १७ ॥

इत्याचार्यगोविन्दस्य कृतिषु तैत्तिरीयरुद्रप्रपाठकाष्टमानुवाकभाष्यम् ॥

—०—

अत्रोदितानि नामानि—३२

संहत्य—२०५+३२ =२३७

पदानि—८० । संहत्य—७३६+८०=८१६

[नवमोऽनुवाकः]

नम॑ऽइरि॒ण्या॑यचप्रप॒थ्या॑यच॒ १

नम॑ᳵक्कि ँ॒शि॒ला॑यच॒क्षय॑णायच॒ २

नम॑ᳵक्कप॒र्द्दिनै॑चपु॒ल॒स्तयै॑च॒ ३

नमो॒गोष्ठ्या॑यच॒गृह्या॑यच॒ ४

नम॒स्तल्प्या॑यच॒गेह्या॑यच॒ ५

नम॑ᳵक्का॒ट्या॑यचगह्व॒रेष्ठाय॑च॒ ६

नमो॒ह्रद॒य्या॑यचनिवे॒ष्प्या॑यच॒ ७

नम॑ᳵप्पा ँ॒स॒व्या॑यचरज॒स्या॑यच॒ ८

नम॒श्शुष्क्या॑यचहरि॒त्या॑यच॒ ९

नमो॒लोप्या॑यचोल॒प्या॑यच॒ (१) १०

नम॑ऽऊ॒र्व्या॑यचसू॒र्म्या॑यच॒ ११

नम॑ᳵप्प॒ण्र्या॑यचपर्णश॒द्या॑यच॒ १२

नमो॒पगु॒रमा॑णायचाभिघ्न॒तेच॒ १३

नम॑ऽआक्खिद॒तेच॑प्रक्खिद॒तेच॒ १४

नमो॑व॒ꣳक्किरि॒केभ्यो॑दे॒वाना॒ꣳहृद॑येभ्यो॒ १५

नमो॑विक्षीण॒केभ्यो॒* १६

नमो॑विचिन्व॒त्केभ्यो॒* १७

नम॑ऽआनिर्ह॒तेभ्यो॒* १८

नम॑ऽआमीव॒त्केभ्यः॑* ॥ ९ ॥ १९

नमः॑ । इ॒रि॒ण्या॑य । च॒ । प्र॒प॒त्थ्या॑येति॒प्र+प॒त्थ्या॑य । च॒ । नमः॑ । कि॒ꣳशि॒लाय॑ । च॒ । क्षय॑णाय । च॒ । नमः॑ । क॒प॒र्द्दिने॑ । च॒ । पु॒ल॒स्तये॑ । च॒ । नमः॑ । गोष्ठ्या॒येति॒गो+स्थ्या॒य॒ । च॒ । गृह्या॑य । च॒ । नमः॑ । तल्प्या॑य । च॒ । गेह्या॑य । च॒ । नमः॑ । का॒ट्या॑य । च॒ । ग॒ह्व॒रेष्ठा-येति॑गह्वरे+स्थाय॑ । च॒ । नमः॑ । हृ॒द॒य्या॑य । च॒ । नि॒वे॒ष्प्या॑ये-ति॑नि+वे॒ष्प्या॑य । च॒ । नमः॑ । पा॒ꣳस॒व्या॑य । च॒ । र॒ज॒स्या॑य । च॒ । नमः॑ । शुष्क्या॑य । च॒ । ह॒रि॒त्या॑य । च॒ । नमः॑ । लोप्या॑य । च॒ । उ॒ल॒प्या॑य । च॒ (१) । नमः॑ । ऊ॒र्व्या॑य । च॒ । सू॒र्म्या॑य । च॒ । नमः॑ । प॒र्ण्या॑य । च॒ । प॒र्ण्ण॒श॒द्या॑येति॑पर्ण्ण+श॒द्या॑य । च॒ । नमः॑ । अ॒प॒गु॒र-मा॑णा॒येत्य॑प+गु॒रमा॑णाय । च॒ । अ॒भि॒घ्न॒तइत्य॑भि+घ्न॒ते । च॒ । नमः॑ । आ॒क्खि॒द॒तइत्या॑+खि॒द॒ते । च॒ । प्र॒क्खि॒द॒तइति॑प्र+खि॒द॒ते । च॒ । नमः॑ । व॒ः । कि॒रि॒केभ्यः॑ । दे॒वाना॑म् । हृद॑येभ्यः । नमः॑ । वि॒क्षी॒ण॒केभ्य॒ इति॑वि+क्षी॒ण॒केभ्यः॑ । नमः॑ । वि॒चि॒न्व॒त्केभ्य॒इति॑वि+चि॒न्व॒त्केभ्यः॑ । नमः॑ । आ॒नि॒र्ह॒तेभ्य॒इत्या॑निः+ह॒तेभ्यः॑ । नमः॑ । आ॒मी॒व॒त्केभ्य॒इत्या॑+मी॒व॒त्केभ्यः॑ ॥ ९ ॥

(उ॒ल॒प्या॑यच॒ त्रय॑स्त्रिꣳशच्च)

इति नवमोऽनुवाकः

—०—

नवमेऽनुवाके एकान्नविंशतिनमोवाकमेकं यजुः । त्रीणि चाशीतिश्च पदानि । अग्निरेवर्षिः । केचिदाचक्षते–'अष्टमानुवाकादारभ्य, अस्मिन्ननुवाके 'नम

आस्खिदते च प्रक्खिदते च' इत्यन्तमेको मन्त्रः । पूर्वोक्ता एव ऋष्यादयः । अथ 'नमो वः किरिकेभ्यः' इत्यारभ्याऽऽनुवाकान्तमेको मन्त्रः । अस्य मन्त्रस्य ऋषिर्देवता च भगवान् शम्भुरेव । जगती षट्पदा च्छन्दः' इति ॥

तत्र प्रथमो नमोवाकः–'नम॑ इ॒रि॒ण्या॑य च प्र॒प॒त्थ्या॑य च' इति । इरिणमूषरम् । यत्र न जीवजातं प्रायश्चरति । तत्रायं नित्यं भवतीतीरिण्यः । प्रकृष्टाः प्रहता वा पन्थानः प्रपथाः । भूयिष्ठनरवाहनादिसञ्चारा राजमार्गाः । तत्रायं गत इति प्रपथ्यः । अथचेरिणं ज्ञानशून्यं जडम् । 'इरिणं तूषरे शून्ये' इत्यभिदधति । तत्रगताय नमः । चेतनेष्वपि ननु ज्ञानहीनं वर्तते तरुगुल्मादिकम् । किं तेन? मानुषेष्वपि क्वचित् तथाविधाः स्युः । योग्यताविरहः शून्यपदार्थो विवक्षित इति न कोऽपि दोषः । प्रकृष्टे ज्ञानमार्गे पतन्तीति प्रपथाश्चेतनाः । तेषु च गतोऽयम् । चेतनाचेतनात्मकनिखिलजगन्नियन्त्रे नम इत्युक्तं भवति ॥ १ ॥

अथ द्वितीयो नमोवाकः–'नमः॑ कि॒ꣳशि॒लाय॑ च क्षय॑णाय च' इति । कुत्सितशिलः विषमशिलाशकलैर्निम्नोन्नतो दुःसञ्चारः पर्वतीयो भूभागः, यत्र मृगाः सरीसृपाश्च वसन्ति । तत्रायं भवति । क्षयणः ग्रामनगरादिः । यत्र मनुष्या वसन्ति च चरन्ति च । क्षि निवासगत्योः । तत्राप्ययं भवति । तात्स्थ्यात् ताच्छब्द्यम् । 'किमियं शिला आहो मरतकादिरिति यत्र संशयो भवति स प्रदेशविशेषः किंशिलः' इति केचित् । अथच कुत्सितशीला असन्तः किंशिलाः । निन्द्यतातिशये ह्रस्वः । तेषु गतोऽयं किंशिलः । येषां मनसि सदा भगवान् वसति, ये च क्षपितदोषाः सन्तस्ते क्षयणाः । तेषु चायं भवति । अयमेव प्रवर्तयत्यसतोऽसति पथि, सतश्च सत्पथे । जगत् क्षयं नयतीति च क्षयणः । यकारो ज्ञानवचनः । णश्च निर्वृतिवाचकः । तयोः क्षितिरयं क्षयणः ॥ २ ॥

अथ तृतीयो नमोवाकः–'नमः॑ क॒प॒र्द्दिने॑ च पु॒ल॒स्तये॑ च' इति । कपर्दी शिवः । तद्गतौ प्राणनारायणौ च कपर्दिनौ । अथ सामान्यतः सर्वोऽपि जटाजूटः कपर्द

उच्यते । कपर्दिनो बद्धजटाजूटास्तपस्विनः, तेषु स्थिताय नमः । दत्तकपिलव्यासादिरूपेषु नारायणोऽपि कपर्दी । विशिष्य पुलस्त्यगः । यतः पौलस्त्यो बभूव । 'पुलस्तयः कुन्तलाः । तद्वते नमः । मत्वर्थीयो लुप्यते' इत्यपि व्याचक्षते । क्वचित् कपर्दवान् क्वचित् कुन्तलवान् भक्तानां दर्शनं ददातीति भावः । सूर्यगतरूपेण सर्वेषां पुरस्तिष्ठतीति च पुलस्तिः । यः प्रसन्नो भक्तानां पुरस्तिष्ठति ध्रुवस्येव गजेन्द्रस्येव स पुलस्तिः । निरुक्तत्वात् साधुः । तथाह्याहुः–'वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ । धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्' इति । सर्वस्यापि पुरि देहे अस्तीति पुरस्तिरेव पुलस्तिरिति च । पुंसु लसति वा पौरुषात्मना । पुनाना लसन्ती ततिरस्येति वा । पुनानो लसन्नानन्दरूपो वा । 'तीत्यानन्दः समुद्दिष्टो येति ज्ञानमुदीरितम्' इति ह्यभिदधति । तेन पूर्णानन्दः पुलस्तिः । पूर्णानन्दज्ञानः पुलस्त्यः ॥ ३ ॥

अथ चतुर्थो नमोवाकः–'नमो॒ गोष्ठ्या॑य च॒ गृह्या॑य च' इति । गावस्तिष्ठन्त्यत्रेति गोस्थानं गोष्ठम् । षपूर्वस्थकारः ठकारमापद्यते–'थश्च ठम्' (तै.प्रा.७.१४) इति । गोशब्दादुत्तरस्य स्थशब्दसकारस्य मूर्धन्यादेशो भवतीति पाणिनिः– 'अम्ब-आम्ब-गो–' (अ.सू.८.३.९७) इत्यादिना । गोष्ठेष्वयं भवति गवन्तर्गतः । 'सूर्योऽग्निर्ब्राह्मणा गावो वैष्णवः खं मरुज्जलम् । भूरात्मा सर्वभूतानि भद्र पूजापदानि मे' इति भागवते । गोषु वेदेषु स्थितः गोष्ठः । वेदाध्ययननिरतो ब्रह्मचारी । तत्रगताय नमः । गृह्याय च गृहे भवाय गृहस्थगताय नमः ॥ ४ ॥

अथ पञ्चमो नमोवाकः–'नम॒स्तल्प्या॑य च॒ गेह्या॑य च' इति । यस्तल्पे शयानो भवति रुग्णो वा वृद्धो वा स भगवदधिष्ठानमिति शुश्रूषितव्यो भवति । यो वा नित्यं नक्तं शेते, युवा वा जायया साकं वामदेवयज्ञनिरतस्तत्रापि भगवाननुसन्धेयः । 'तल्पं शय्याट्टजायासु' इति यादवप्रकाशः । स दिवा

गृहकर्मनिरतो गेहे भवतीति गेह्यः । बहिश्चलितुमप्रभवन् वा यो गृहे भवति । तत्रापि भगवानाराधनीयः । भगवानपि षोडशस्त्रीसहस्रेशस्तल्पगतो बभूव । ताभिः सह गेहे प्रासादे विजहार च । अथ वायुरपि भीमः सन् स्वभार्याभि-स्तल्पगतो बभूव । उरीकृतगार्हस्थ्यस्ताभिः राजगृहप्रासादे विजहार च ॥ ५ ॥

अथ षष्ठो नमोवाकः–'नमः॑ का॒ट्या॑य च गह्व॒रेष्ठाय॑ च' इति । 'नम काट्याय' (७.८) इत्यरण्यगतत्वं पूर्वमुक्तम् । अर्थविशेषानुसन्धानाय पुनर्वचनम् । संसारे कुत्सितमटन् काटः नित्यसंसारी तमोयोग्यश्च । तत्र भवन् काट्यः । तस्मै नमः । गह्वरे मुक्तजीवे स्थित इति गह्वरेष्ठः । तस्मै नमः । 'गुहाहितं गह्वरेष्ठं पुराणम्' इति हि कठश्रुतिः । 'गह्वरे मुक्तजीवे स्थितम्' इति भाष्यम् । 'गहनेषु वरत्वाद् गह्वरो मुक्तजीवः । तस्मिन्नपि मुक्तनियामकत्वेन स्थितम्' इति वामनपण्डिताचार्यः । दुर्गमारण्ये च गिरिगह्वरे च तिष्ठतीति स्थूलं दर्शनम् । पुनरुक्तं च । काटः कूप इत्येके । तदपि 'कूप्याय' इत्यनेन पुनरुक्तम् ॥ ६ ॥

अथ सप्तमो नमोवाकः–'नमो॑ ह्रद॒य्या॑य च निवे॒ष्प्या॑य च' इति । ह्रदे भवो ह्रदय्यः । ह्रदशब्दस्य भवार्थे यति प्रत्यये परतः छान्दसोऽयमादेश इति वार्तिकम्–'ह्रदय्या आप उपसङ्ख्यानम्' (अ.सू.६.१.८३) इति । आप इति न वक्तव्यम् । ह्रदय्यस्योपसङ्ख्यानमिति पर्याप्तम् । 'अगाधजला ह्रदाः' इति यादवप्रकाशः । ह्रदेषु भवाय ह्रदय्याय नमः । निवेष्पमपां गर्भ इति दण्डनाथनारायणः । नौ विशेः षश्च पन्प्रत्ययश्च इति भोजः । निविशन्त्यत्रेति निवेष्पे जलगर्भे गताय नमः । निविशति पत्रेषु मणिरिवेति निवेष्पं नीहार-कण इत्येके । तत्र भवाय नमः । अगाधजलेषु य आवर्तः स निवेष्प इत्यन्ये । तत्रगताय च नमः । अथ च शतकोटिह्रदगताय तत्र जलगर्भे कृतशयनाय भीमाय नमः ॥ ७ ॥

अथाष्टमो नमोवाकः–'नमः॑ पा॒ꣳस॒व्या॑य च र॒ज॒स्या॑य च' इति । जलाशयतीरगतपांसुषु भवाय नमः । पांसवः सूक्ष्मरेणवः । विशेषतो महतां

पादपांसुषु गताय । 'पुनन्तु मां ब्राह्मणपादपांसवः' इति हि स्मरन्ति । लोकरूपाः पांसवोऽस्य पादे सन्तीति च पांसव्यः । 'समूळ्ढमस्य पांसुरे' इति हि श्रुतिः । स्थूलरेणवो रजांसि तत्रगताय नमः । एवं रजोगुणे भवन् जगत् ससर्ज । एवं पुष्परजस्सु भवन् मधु ससर्ज । पुष्पवतीरजस्सु भवन् गर्भं ससर्ज ॥ ८ ॥

अथ नवमो नमोवाकः–'नमः शुष्क्याय च हरित्याय च' इति । शुष्केषु काष्ठादिषु भवाय । हरितेषु रसार्द्रेषु पत्रादिषु गताय च नमः । शुष्का भगवज्ज्ञानशून्याः । शुष्कपण्डिताश्च । तेषु गताय । ये मनसा हरिं गताः, हरौ तातास्ते हरिताः । तेषु गताय च नमः । हरिरिति वायुश्च । हरमिताश्च हरिता उच्यन्ते ॥ ९ ॥

अथ दशमो नमोवाकः–'नमो लोप्याय चोलप्याय च' इति । यत्र सर्वं लुप्यते न किमपि रोहति स लोपः शिलाप्रचुरः प्रदेश उच्यते । तत्रगताय नमः । लतागुल्मादिरुलपः । तद्वान् प्रदेश उलप्यः । तत्रगताय च नमः । अथच उलपो दर्भः । पावित्र्यसम्पादकतया तत्रगताय नमः । 'उलपो दर्भ ऊर्ध्वमूलः' इति यादवप्रकाशः । यः सर्वं धर्मपथं लुम्पति लोपयति वा स लोपः । सर्वलोपकस्तमःप्रकृतिः । भगवानेव तत्र स्थित्वा तं तथा प्रेरयतीति लोप्यः । लुप्लृ छेदने । ये च सर्वत उत्तमं हरिं लपन्ति, ये च जीवेभ्य उत्तमं वायुं लपन्ति त उलपाः । उम् उग्रं रुद्रं च ये लपन्ति तेऽप्युलपाः । तत्रगताय तेषां ज्ञानमार्गे प्रेरकाय च नमः ॥ १० ॥

अथैकादशो नमोवाकः–'नम ऊर्व्याय च सूर्म्याय च' इति । उर्व्यां पृथिव्यामतिशयेन भव ऊर्व्यः । अतिशायने दीर्घः । 'आधिक्येऽधिकम्' इति सूत्रात् । शोभनोर्मिमिति समुद्रे नदीजले वा भवः सूर्म्यः । स्थले जले च गताय नमः । अथ सूर्मश्चुल्ली । पाकसम्पादकत्वेन तत्रगताय नमः । अथच सूर्मी लोहप्रतिमा । तत्र सन्निधाय पूजां स्वीकुर्वते नमः ॥ ११ ॥

अथ द्वादशो नमोवाकः–'नमः पर्ण्याय च पर्णशद्याय च' इति । हरिद्वर्णपर्णगताय नमः । शीर्णानि पर्णानि पर्णशदानि । पतितशुष्कशीर्णपर्णगताय नमः । अथच पर्णाः परानन्दा मुक्तियोग्या मुक्ता वा तेषु गताय । ये च पर्णशदाः शीर्णपरानन्दास्तामसास्तेषु च गताय । एवमन्यत्रापि गुह्य आध्यात्मिकोऽर्थोऽनुसन्धेयः । दिङ्मात्रमत्र किञ्चित् प्रदर्शितम् ॥ १२ ॥

अथ त्रयोदशो नमोवाकः–'नमोऽपगुरमाणाय चाभिघ्नते च' इति । अपगुरमाणाय असुरान् हन्तुमुद्यताय, शिशुपालं हन्तुं धृतचक्राय नमः । शत्रून् हन्तुं य उद्यतायुधदोर्दण्डास्तेषु गताय नमः । गुरी उद्यमने । आयुधं विसृज्य शिशुपालमभिघ्नते नमः । एवं देवासुराणां सङ्ग्रामे असुरानभिघ्नते नमः । एवं गदामुद्यच्छमानाय भीमाय नमः । गदया दुर्योधनमभिघ्नते नमः । शिवोऽपि प्रळये सर्वजीवानभिघ्नन्नपगुरमाणो भवति ॥ १३ ॥

अथ चतुर्दशो नमोवाकः–'नम आक्खिदते च प्रक्खिदते च' इति । उपसर्गपूर्वे खि इत्यक्षरे पूर्व आगमो भवतीति प्रातिशाख्ये स्थितम्–'उपसर्ग-पाथएषः-अति-आति-धाम-परम-भूते-पूर्वेषु छ-खि-भुजेषु च' (तै.प्रा.२.२.८) इति । खेदयन् खिदन्नुच्यते । स्वातन्त्र्ये व्यत्ययः । क्वचिदीषत् खेदयति । आङ् ईषदर्थे । ततः खेदं परिहरति मुक्तिदानेन । कांश्चित् तमसि सर्वात्मना खेदयन् प्रक्खिदन् भवति ॥ १४ ॥

गतः परोक्षवादः । इतः परं पञ्च प्रत्यक्षनमोवाका भवन्ति । केचिदाचक्षते–'इतः परं ये पञ्च नमोवाका तेषामृषिर्देवता च शम्भुरेव । षट्पदा जगती छन्दः' इति । वस्तुतो निगदत्वान्न च्छन्दश्चिन्ता । पूर्ववत् अग्निरेवर्षिः । तत्र प्रथमो नमोवाकः–'नमो वः किरिकेभ्यो देवाना॒ हृदयेभ्यः' इति । किरन्ति वितरन्ति सर्वाभीष्टम्, किरन्ति हिंसन्ति प्रळये जगदिति वा, कुर्वन्ति सृजन्ति जगदिति वा किरिकाः । सृष्ट्यर्थं ब्रह्मगताय, संहारार्थं शिवगतायाभीष्टदाय त्रिरूपाय नारायणाय नमः । 'ब्रह्मणि ब्रह्मरूपोऽसौ शिवरूपी शिवे स्थितः' इति हि स्मरन्ति । देवानां हृदयेभ्यः प्रियेभ्यः । अथच देवानां हृदयानीव

अग्निवाय्वादित्याः । तेषु गतेभ्यो वो नमः । एवं भूर्भुवःस्वर्गतः त्रिस्थानो भगवान् स्तूयते ॥ १५ ॥

अथ द्वितीयः प्रत्यक्षनमोवाकः–'नमो॑ विख्षीण॒केभ्यः॑' इति । भक्तानां दुःखं दुरितं वा विक्षिण्वन्तीति विक्षीणकाः । 'देवानां हृदयेभ्यः' इति वर्तते । अक्षीणानन्दा विक्षीणकाः । अक्षीणानन्दप्रदा वा । क्षयरहिता वा विक्षीणकाः । तेभ्यो वो युष्मभ्यं नमः ॥ १६ ॥

अथ तृतीयो नमोवाकः–'नमो॑ विचिन्व॒त्केभ्यः॑' इति । 'नमो विचिन्वत्केभ्यो देवानां हृदयेभ्यः' इति समग्रो मन्त्रः । विचयनं पृथक्करणम् । पुण्यपापादिकृतः विचित्य विभिन्नं फलं ददतीति तादृग्भ्यो नारायणप्राणरुद्रेभ्यो वो युष्मभ्यं नमः ॥ १७ ॥

अथ चतुर्थो नमोवाकः–'नम॑ आनिर्ह॒तेभ्यः॑' इति । नमो आनिर्हतेभ्यो देवानां हृदयेभ्यः । आ समन्तान्निःशेषं हतं पातकं येभ्यस्तेभ्यो वो नमः ॥ १८ ॥

अथ चरमो नमोवाकः–'नम॑ आमीव॒त्केभ्यः॑' इति । नम आमीवत्केभ्यो देवानां हृदयेभ्यः । आ समन्तात् मीवति स्थूलभावं गरिमाणं प्राप्नोतीति मीवत् परिपूर्णं कं सुखं येषां तेभ्यो वो नमः । मीव स्थौल्ये ॥ १९ ॥

इत्याचार्यगोविन्दस्य कृतिषु तैत्तिरीयरुद्रप्रपाठकनवमानुवाकभाष्यम् ॥

—०—

अत्रोदितानि नामानि–३३

संहत्य–२३७ +३३ =२७०

पदानि–८३ । संहत्य–८१६+८३=८९९

[दशमोऽनुवाकः]

द्रापे॒ऽअन्ध॑सस्पते॒दरि॑द्र॒न्नील॑लोहित ।
ए॒षाम्पुरु॑षाणामे॒षाम्प॑शू॒नाम्माभेर्म्मारो॒मोऽए॑षा॒ङ्किञ्च॒नाम॑मत्
॥ १ ॥

द्रापे॑ । अन्ध॑सः । प॒ते॒ । दरि॑द्रत् । नील॑लोहि॒तेति॒नील॑+लो॒हि॒त॒ ॥ ए॒षाम् । पुरु॑षाणाम् । ए॒षाम् । प॒शू॒नाम् । मा । भेः । मा । अ॒रः । मोइति॑ । ए॒षा॒म् । किम् । च॒न । आ॒म॒म॒त् ॥ १ ॥

अस्मिन्ननुवाक ऋग्रूपा द्वादश मन्त्राः पठ्यन्ते । द्वे शते एकान्नत्रिंशच्च पदानि । अध्यायर्षिरग्निरेवर्षिः । पुलह ऋषिरित्येके । प्रथममन्त्रे सप्ताष्टाक्षरौ प्रथमद्वितीयचरणौ । तेन पूर्वार्धे निचृदनुष्टुप्छन्दः । 'इयादिपूरणः' इति न्यायेन 'द्रापे' इत्यस्य 'दुरापे' इतीव त्र्यक्षरतयोच्चारणेन केवला वाऽनुष्टुप् । 'एषां पुरुषाणामेषां पशूनाम्' इति तृतीयः पाद एकादशाक्षर इति निचृज्जगती । 'पशु+उनाम्' इतीव प्रकृतिप्रत्यययोर्विश्लेषेण केवला वा जगती । 'मा भेः–' इत्यादौ चतुर्थचरणे स्फुटं जगती । तेन आस्तारपङ्क्तिश्छन्दः । तथाहि पिङ्गलनागः–'आस्तारपङ्क्तिः परतः' (३.३९) इति । 'जागतौ पादौ परतः परस्तात् स्याताम्, आदौ च गायत्रौ चेदास्तारपङ्क्तिः' इति यादवप्रकाशः । अयमुत्तरश्च मन्त्रः प्रत्यक्षप्रार्थनात्मकः ॥

अथ मन्त्रार्थः । द्रापयतीति द्रापिः । द्रा कुत्सितायां गतौ । 'कुत्सिता गतिः पलायनं निद्रा च' इति क्षीरस्वामी । तामसानां तमोरूपां कुत्सितां गतिं

प्रापयति । केषाश्चिन्नरकादिरूपाम्, आसुरीष्वेव योनिषु जननादिरूपाम्, तिर्यक्षु स्थावरेषु च जननादिरूपां वा । मनुष्यलोकेऽपि कष्टमयीं दुःखाज्ञानबहुलां प्रापयति । अथच निद्रां प्रापयति । कल्पावसाने च प्रत्यहं चेति निद्रापिरेव द्रापिरुच्यते । अथच भक्तानामाह्वानं श्रुत्वा तेषां सकाशं द्रुतमाप्नोतीति च द्रापिरुच्यते । अन्ध इत्यन्नम् । अन्धसः सोमाख्यस्य, भक्तिज्ञानाख्यस्य चाऽन्तरस्यान्नस्य पते पालयितः । छन्दसि षष्ठीविसर्जनीयस्य सकारादेशो भवति पतिशब्दे परे इति पाणिनिः–'षष्ठ्याः पतिपुत्रपृष्ठपार-पदपयस्पोषेषु' (अ.सू.८.३.५३) इति । 'पत्नीवे-पती-पते-पतये-पतिः-पतिम्परः' (तै.प्रा.८.२६) इति प्रातिशाख्यम् । एवमादिषु परेषु अकारपूर्वो विसर्जनीयः सकारमापद्यत इत्यर्थः । दरिद्रातीति दरिद्रत् । दरिद्रा दुर्गतौ । अकिञ्चनः, अभिमानराहित्यात् । दोषदारिद्र्याच्च दरिद्रः । दरिद्रयतीत्यर्थे वा णिलुक् । 'स्वातन्त्र्यस्नेहयोरन्तर्नीतणिच्' इति स्मरणात् । एकान् ज्ञानदरिद्रान् करोत्यपरान् धनदरिद्रान् । अगाधत्वान्नीलः । ज्ञानिषु नीला प्रभावळिर्भवति । नीलं नभः । नील उदधिः । सृष्ट्यर्थं लोहितः । प्रळये नीलः । तमसा गूढः । सृष्टौ लोकहितो लोहितः । पृथिव्यां नीलः । अग्नौ लोहितः । नीलेषु नीलः । लोहितेषु लोहितः । कण्ठे नीलोऽन्यत्र लोहितः शिव इति वदन्ति । नरनार्यात्मकत्वादर्धं नीलमर्धं लोहितमित्यन्ये । नितरां लीनं नीलं निरस्तम्, लोहितं जननार्थं शोणितसम्बन्धरूपं कालुष्यमस्येति नीललोहित इति च । 'एषामस्मदीयानां पुरुषाणां पुत्रादीनाम्, पशूनां च गवादीनाम्' इति बाह्यः प्रातीतिकोऽर्थः । पुरुषाणां ज्ञानिनां ज्ञानार्थिनाम्, पशूनां ज्ञानसाधनानां वेदानां चेत्यान्तरः । 'पान्ति शंसाधनाश्चेति वेदाः पशव ईरिताः' इति च स्मरन्ति । 'यजमानस्य पशून् पाहि' इति प्रथमत एव प्रार्थितं च । द्वितीयार्थे षष्ठी । विद्यारतान् वेदादिविद्याश्च मा भेः मा भैषीः । णिलुक् । मा बीभषः । मृत्युर्भूत्वा भीषको मा भूः । नाशको मा भूः । ञिभी भये । ज्ञानमयं हि जीवनं प्रकाशते । प्रभवति चोर्ध्वगमनाय । उक्तं हि–'मग्नस्य हि परेऽज्ञाने किं न

दुःखतरं भवेत्' इति । मा अरः, मा मयि विमुखो भूत्वा दूरं गमः । प्रसन्नः सन् सदा मयि सन्निहितो भवेत्यर्थः । गत्यर्थादियर्तेर्लुङि मध्यमपुरुषैकवचने आरः इति रूपम् । माङ्योगेनाटो लोपे 'अरः' इति । अन्तर्भावितण्यर्थो वा । मा अरः मा अर्पिप इति । एषामध्ययने मा काञ्चिदार्तिं प्रापिप इत्यर्थः । 'एषां मध्ये किञ्चन एकमपि वस्तु मा अरः मा नश्यतु' इति पुरुषव्यत्ययेनापि व्याच-क्षते । अथ चैतान् मा अरः, णिलुकि सतः पथो न गमय, न च्यावयेत्यर्थः । अथचैषां किञ्चापि मो मैव आममत् । उश्चार्थे वा, मो मा च । आममत् आमिमत् आमययुक्तं भूत् । 'अम रोगे',चुरादिः । आमयति । लुङि आमि-मदिति रूपम् । इकारस्याकारोऽतिशयार्थश्छान्दसः । तेनाऽममदिति रूपम् । अत्र तृतीयम् 'एषाम्' इति पदमन्वादेशत्वात् सर्वानुदात्तम् । 'इदमोऽ-न्वादेशेऽशनुदात्तस्तृतीयादौ' (अ.सू.२.४.३२) इति हि पाणिनिः ॥ १ ॥

यातेॆरुद्रशि॒वात॒नूश्शि॒वावि॒श्वाह॑भेषजी ।
शि॒वारु॒द्रस्य॑भेष॒जीतया॑नोमृडजी॒वसे᳚ ॥ २ ॥

या । ते॒ । रु॒द्र॒ । शि॒वा । त॒नूः । शि॒वा । वि॒श्वाह॑भेष॒जीति॑वि॒श्वाह॑+भे॒ष॒जी॒ ॥ शि॒वा । रु॒द्रस्य॑ । भे॒ष॒जी । तया॑ । न॒ः । मृ॒ड॒ । जी॒वसे॑ ॥

द्वितीय आनुष्टुभो मन्त्रः । अग्निरेवर्षिः । स्कन्द इत्येके । शमित्यानन्दः । वमिति ज्ञानम् । शिवा ज्ञानानन्दमयी । रुद्र रुजां द्रावक तव तनूः । अत एव शिवा माङ्गलिकी । शुभदा । विश्वानि च तान्यहानि विश्वाहाः । 'राजाहःसखिभ्य-ष्टच्' (अ.सू.५.४.९१) । विश्वेष्वप्यहस्सु सर्वदा संसाररुजां भेषजभूता । छान्दसः ङीप्–'केवल-मामक-भागधेय-पाप-अपर-समान-आर्यकृत-सुम-ङ्गल-भेषजाच्च' (अ.सू.४.१.३०) इति स्मरणात् । शिवा सुखदा शान्ता वा । शिवो वेदः । वेदप्रतिपाद्यत्वाद् वा शिवा । रुद्रपदनिर्वचनं स्मारयन्नाह–संसाराख्यां रुजं द्रावयतो रुद्रस्य तवेयं भेषजी तनूरिति । तस्मादपि शिवा । जीवसे जीवितुं स्वस्थजीवनाय तया नो मृड रक्ष । 'मृड सुखने' इति पठन्ति ।

'मृड रक्षणे' इति च वक्तव्यम् । 'तुमर्थे से-सेन्-असे–' (अ.सू.३.४.९) इत्यसेप्रत्ययः । 'जीवसे' इत्यसे । 'जीवसे' इत्यत्र असेन् इति विशेषः ॥ २ ॥

इमाꣳरुद्रायतवसेकपर्दिनेख्षयद्वीरायप्रभरामहेमतिम् ।
यथानश्शमसद्द्विपदेचतुष्पदेविश्वम्पुष्टङ्ग्रामेऽअस्मि(१)न्ननातुरम्
॥ ३ ॥

इमाम् । रुद्राय । तवसे । कपर्दिने । ख्षयद्वीरायेतिख्षयत्+वीराय । प्रेति । भरामहे । मतिम् ॥ यथा । नः । शम् । असत् । द्विपदइतिद्वि+-पदे । चतुष्पदइतिचतुः+पदे । विश्वम् । पुष्टम् । ग्रामे । अस्मिन् (१) । अनातुरमित्यना+तुरम् ॥

तृतीयस्य तुरीयस्य च मन्त्रस्य माण्डव्य ऋषिरित्याचक्षते । अग्निरिति स्थितम् । ऋग्द्वयं संहत्यैको मन्त्र इत्यप्येके । द्वयोरपि जगती छन्दः । इमां रुद्रायेति मन्त्रे तृतीयः पादस्त्रयोदशाक्षर इति भुरिग् जगती । बाह्वृच्ये तु केवलजगतीत्वेनैव पठ्यते ।'नः' इत्यस्य लोपेन । आदौ च 'इमाम्' इति स्थाने 'इमाः' इति, 'मतिम्' इति स्थाने 'मतीः' इति– 'इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरामहे मतीः । यथा शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम्' (ऋ.सं.१.१४४.१) इति । कुत्सश्चर्षिस्तत्र । परोक्षप्रार्थनोऽयं मन्त्रः ॥

अथ मन्त्रार्थः– वयमिमामस्मदीयां मतिं रुद्राय नारायणाय प्राणाय शङ्कराय च प्रभरामहे । प्रकर्षेण धारयामः । प्र हरामहे प्रकर्षेण उपहराम इति वा । 'हृग्रहोर्भश्छन्दसि हस्येति वक्तव्यम्' इति हि वार्तिकम् (अ.सू.८.२.३५) । तमेव मनसा पूजयामः, तमेव ध्यायाम इत्यर्थः । अथ मतिरिति स्तुतिनाम । इमां स्तुतिमुपहरामः समर्पयाम इति वा । कीदृशाय रुद्राय? तवसे बलवते । सर्वरक्षणदक्षता बलम् । तवसे महते सर्वोत्तमाय वा । कपर्दिने धृतजटाजूटाय कपिलव्यासादिरूपेषु । प्राणोऽपि मुद्गलदेहगः कपर्दी नाळायनीपतिः । रुद्रः स्फुटं कपर्दी । येये कपर्दिनस्तापसास्तेषु स्थिताय च । क्षयद्वीरायेत्यस्मिन्न-

नुवाके त्रिः पठ्यते । आध्यात्मिकादित्रिविधशत्रुनाशनत्वेन ध्यानाय, अर्थ-विशेषानुसन्धानाय च । क्षियन्ति निवसन्ति वीरा बाहुबलेन विक्रान्ता अस्मिन्निति क्षियद्वीर एव क्षयद्वीरः । क्षि निवासे । अथच क्षयन्ति नश्यन्ति वीराः असुरा बाह्यान्तःशत्रवोऽनेनेति क्षयद्वीरः । क्षि क्षये । अथ प्रभरणं विशिनष्टि द्वितीयार्धेन–यथा न इति । यथा लोके नोऽस्मदीयाय द्विपदे मनुष्याय चतुष्पदे पशुगणाय च शं सुखमसत् स्यात् । अस्तेर्लेटि 'लेटोऽडाटौ' (अ.सू.३.४.९४) इत्यडागमः । यथाऽस्मिन् ग्रामे, स्वदेशो भुवनत्रयम्, जगति विश्वं जीवजातं भोगभाग्येन पुष्टम्, अनातुरं निरुपद्रवं च यथाऽसत् तथा मतिं प्रभरामह इति । अथच नः द्विपदे अन्तेवासिगणाय । 'आ मा यन्तु ब्रह्मचारिणः' इति श्रवणात् । तत्पालनाय क्षीरादिदातृतया चतुष्पदे च । चतुष्पादिति विशिष्य गवाश्वमुच्यते । 'द्विपदे' इति पक्षिजातं च । अथच द्विपदे आत्मान्तरात्मेति द्विरूपाय भगवते, तत्प्रसादाय । विश्वात्मना वासुदेवाद्यात्मना च चतुष्पदे । 'सोऽयमात्मा चतुष्पात्' इति श्रवणात् । वेदार्थज्ञानजं शं सुखं यथा नः स्यात् । अथ चेतनाचेतनगतत्वेन द्विपात् । अन्तर्बहिःस्थितत्वेन च । जरायुजाण्डजोद्भिज्जस्वेदजभेदेन चतुर्विधेषु गतत्वाच्च चतुष्पात् । समानमेतत् प्राणस्य च शिवस्य च । अथचास्मिन् ग्रामे सङ्ग्रामे ज्ञानयुद्धे च विश्वं ज्ञानिवृन्दं यथा विजयेन सुखपूर्णमज्ञानिनिरासेन निरामयं च स्यात् तथा भगवति मतिमिमां प्रभरामह इति ॥ ३ ॥

मृडानोरुद्रोतनोमयस्कृधिख्षयद्वीरायनमसाविधेमते ।
यच्छञ्चयोश्चमनुरायजेपितातदश्यामतवरुद्रप्रणीतौ ॥ ४ ॥

मृड । नः । रुद्र । उत । नः । मयः । कृधि । ख्षयद्वीरायेतिख्षयत्+वीराय । नमसा । विधेम । ते ॥ यत् । शम् । च । योः । च । मनुः । आयजइत्या+यजे । पिता । तत् । अश्याम । तव । रुद्र । प्रणीतावितिप्र+नीतौ ॥

तुरीयेण जागतेन स्वमतिभरणेन साक्षात्कृतं प्रार्थयते । अत्र प्रथमः पादो यद्यपि एकादशाक्षरः । ततः ‘रुद्र+उत’ इति विश्लेषेण द्वादशाक्षरता । एवं चतुर्थचरणे ‘तदशियाम’ इति विश्लेषेण छन्दःपूर्तिः । उक्तं हि पिङ्गलनागेन– ‘इयादिपूरणः’ (३.२) इति । ‘अन्येऽपि वर्णविलोपिनः सन्धयस्तानपि व्यूहेत्’ इति यादवप्रकाशः । अथच रुद्रप्रीणनार्थं त्रिष्टुभाऽऽरम्भः, त्रिष्टुभैव चोपसंहारः । बह्वृचास्तु किञ्चित्पाठभेदेन कौत्समिमं मन्त्रं पठन्ति–‘मृ॒ळा नो॑ रुद्रो॒त नो॒ मय॑स्कृधि क्ष॒यद्वी॑राय॒ नम॑सा विधेम ते । यच्छं च॒ योश्च॒ मनु॑राये॒जे पि॒ता तद॑श्याम॒ तव॑ रुद्र॒ प्रणी॑तिषु’ (ऋ.सं.१.११४.२) इति ॥

अथ मन्त्रार्थः– हे रुद्र नो मृड रक्ष । सुखयेति व्याचक्षते । तत् ‘मयस्कृधि’ इति पुनरुक्तं भवति । ऐहिकं पारत्रिकमिति सुखं द्विविधमिति द्विरुक्तिरित्यगतिका गतिः । ‘मृड रक्षे’ इति धातुपाठानधिगममूलश्चायं विवरणक्लेशः । ‘मृडा’ इति सांहितं दैर्घ्यं मोक्षदानेन निरवधिकं रक्षणमाह । सङ्गृहीतानि च तानि पदानि यानि दीर्घान्तानि संहितायाम्, विभागे च ह्रस्वान्तानि– ‘अवा सचस्वा नुदा मृडा–’ (३.९) इत्यादिना तैत्तिरीयप्रातिशाख्ये । तमिमं पदमालापाठक्लेशं निविवारयिषुः पाणिनिश्चतुरं सञ्जग्राह–‘द्व्यचोऽतस्तिङः’ (अ.सू.६.३.१३५) इति । उत अपिच मयः नित्यसुखं च कृधि कुरु । क्षियन्ति निवसन्ति ज्ञानबलेन वीरा विक्रान्ता यस्मिन् स क्षियद्वीरः । अथ च क्षयन्तः नश्यन्तः वीराः कामाद्या अन्तःशत्रवः यस्मात् तस्मै ते त्वदनुग्रहाय त्वां नमसा कायेन वाचा च विधेम परिचरेम । सूर्यस्थस्तपतीति पिता, जगत्पालनाच्च । मनुर्ज्ञान-रूपो नारायणः । ‘विश्वकर्मा मनुस्त्वष्टा’ इति स्मरणात् । प्राणश्च मनुः । ‘यद् वै मनुरवदत् तद् भेषजम्’ इति हि श्रुतिः । ‘ते वायवे मनवे बाधिताय’ इति च । मन्वन्तरस्थत्वाच्च मनुः । मनोनेतृत्वेन शिवश्च मनुः । यत् शं केवलं सुखम्, सुषुप्तिध्यानयोः, यश्च योः, यु मिश्रणे, दुःखमिश्रं सुखम्, जाग्रत्स्वप्नयोः, तदुभयमपि मनुः पिता आयजे आयजते अनुगृह्णाति, तत् सर्वं हे रुद्र, नारायण, प्राण, शङ्कर, तव प्रणीतौ प्रणयेऽनुग्रहे सति अश्याम अनुभवेम,

भगवत्प्रसाद इति दुःखमपि सुखमिव । अथच हे रुद्र शङ्कर, तव प्रणये सत्येवाश्याम । यदि भवान् कुप्यति तर्हि प्राणनारायणयोरपि प्रणयेन वञ्चिता भवेम । अथ ‘शंयोः’ इत्येकं पदम् । ‘नरा वा शंसम्’ इतिवत् । चकारः पिता मनुश्चेत्यन्वेति । पिता नारायणः । ‘यो नः पिता जनिता’ इति श्रुतेः । मनुरुपदेष्टा गुरुर्वायुश्च यद्यदायजते अनुगृह्णाति सुखं वा दुःखं वा तद् वयं शंयोजकस्य भगवतः प्रसाद इत्यश्यामेति । अश भोजने ॥ ४ ॥

मानो॑म॒हान्तं॑मु॒तमानो॑ऽअर्भ॒कम्मान॒ऽउक्ष॑न्तमु॒तमान॑ऽउक्षि॒तम् ।
मानो॑वधीᳶप्पि॒त॒रम्मोतमा॒तरं॑म्प्रि॒यामानं॑स्त॒नुवो॑(२)रुद्ररीरिषः
॥ ५ ॥

मा । न॒ः । म॒हान्तं॑म् । उ॒त । मा । न॒ः । अ॒र्भ॒कम् । मा । न॒ः ।
उक्ष॑न्तम् । उ॒त । मा । न॒ः । उ॒क्षि॒तम् ॥ मा । न॒ः । व॒धी॒ः । पि॒तरं॑म् ।
मा । उ॒त । मा॒तरं॑म् । प्रि॒याः । मा । न॒ः । त॒नुवं॑ः(२) । रु॒द्र॒ । री॒रि॒ष॒ः ॥

मानो महान्तमिति पञ्चमस्यापि मन्त्रस्य जगती च्छन्दः । अग्निरेवर्षिः । ‘देवरात ऋषिः । नन्दिचररूपो रुद्रो देवता’ इत्येके । अयमपि मन्त्रो बाह्वृच्ये पठ्यते चतुर्थपादे किञ्चिद् व्यत्यासेन–‘मोत मा॒त॒रं मा नं॑ः प्रि॒यास्त॒न्वो॑ रुद्र रीरिषः’ (ऋ.सं.१.११४.७) इति । महान्तं वयसा ज्ञानेन च वृद्धं नः अस्मत्कुले मा वधीः मा हिंसीः । हन हिंसागत्योः । लुङि वधादेशः । मा नो अर्भकं बालं वयसा ज्ञानेन च वधीः । महतो नाशे दातुरभावाद् विद्या नश्यति । अर्भकनाशे ग्रहीतुरभावात् । उक्षन्तं सेचनसमर्थम्, युवानमिति यावत् । यो वृद्धबालयोः संयोजकस्तन्तुवाही । नाप्युक्षितं गर्भस्थं शिशुम् । पितरं मातरमुत मातरं च मा वधीः । पितरं द्युलोकं मातरं भूमिं च अवृष्ट्यादिना मा वधीः । अस्मदीयाः साधनहेतुत्वेन प्रियास्तनूश्च भाविजन्मसु भविष्यन्तीः हे रुद्र मा रीरिषः । रिष हिंसायाम् । दुःखाज्ञानादिदानमेव हिंसा । अत्र, उत्तरमन्त्रेषु च विशिष्य नारसिंहवपुर्भगवान् स्तूयते ॥ ५ ॥

मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः ।
वीरान्मानोरुद्रभामितोवधीर्हविष्मन्तोनमसाविधेमते ॥ ६ ॥

मा । नः । तोके । तनये । मा । नः । आयुषि । मा । नः । गोषु । मा । नः । अश्वेषु । रीरिषः ॥ वीरान् । मा । नः । रुद्र । भामितः । वधीः । हविष्मन्तः । नमसा । विधेम । ते ॥

'मा नस्तोके' इति पूर्वार्धे जगती । उत्तरार्धे त्रिष्टुप् । तेन विराड्जगती । 'ऋषिर्भगवान् । छन्दो जगती । देवोऽपि भगवानेव' इत्येके । बह्वृचास्त्वेवं पठन्ति–'मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः । वीरान् मा नो रुद्र भामितो वधीर्हविष्मन्तः सदमित्त्वा हवामहे' (ऋ.सं.१.११४.८) इति । हे रुद्रान्तर्गत नरसिंह, नस्तोके सन्ततिमात्रे, विशिष्य च तनये पुत्रे विषये मा रीरिषः रोगादिना, अज्ञानादिना वा । आयुषि विषये च । दीर्घायुष्मतो नः कुरु । 'जिजीविषेच्छतं समाः', 'शतं जीवेम शरदः सुवीराः' इत्यादेः । 'चतुष्पदे शं स्यात्' इत्युक्तं स्फुटमाह– 'मा नो गोषु मा नो अश्वेषु रीरिषः' इति । वेदविद्याश्च गावः । अश्वा इति प्रातिभज्ञानानि स्फुरणानि । येन आशु वेदेषु सञ्चरन्ति । ज्ञातेनाज्ञातेन वा प्रमादतो वा जनितेनापराधेन भामितः क्रुद्धः सन् वीरान् विद्वत्तमान् मा वधीः । हविष्मन्तः यज्ञेषु हविषा प्रीणयन्तः, मानसे यज्ञे भवदाह्वानं नामभिः कुर्वन्तः, नमसा नमस्कारेण स्तुत्या च ते त्वां परिचरेम ॥ ६ ॥

आरात्तेगोघ्नऽउतपूरुषघ्नेरव्षयद्वीरायसुम्नमस्मेतेऽअस्तु ।
रव्षाचनोऽअधिचदेवब्रूह्यधाचनश्शर्म्मयच्छद्विबर्हाः ॥ ७ ॥

आरात् । ते । गोघ्नइतिगो+घ्ने । उत । पूरुषघ्नइतिपूरुष+घ्ने । रव्षयद्वीरा-येतिरव्षयत्+वीराय । सुम्नम् । अस्मेइति । ते । अस्तु ॥ रव्ष । च । नः । अधीति । च । देव । ब्रूहि । अध । च । नः । शर्म्म । यच्छ । द्विबर्हाइतिद्वि+बर्हाः ॥

'आरात् ते' इति मन्त्रे द्वितीयः पादो द्वादशाक्षरः । अन्ये त्रैष्टुभाः । तेन भुरिक् त्रिष्टुप् छन्दः । अग्निरेवर्षिः । 'ऋषिरत्रिः । त्रिष्टुप् छन्दः' इत्येके । अयमिह बह्वृचानां पाठः–आरे ते गोघ्नमुत पूरुषघ्नं क्षयद्वीर सुम्नमस्मे ते अस्तु । मृळा च नो अधि च ब्रूहि देवाधा च नः शर्म यच्छ द्विबर्हाः' (ऋ.सं. १.११४.१०) इति । गोघ्न इत्यादि चतुर्थी षष्ठ्यर्थे । 'षष्ठ्यर्थे चतुर्थी वक्तव्या' इति वार्तिकम् (अ.सू.२. ३.६२) । गा हन्तीति गोहा । एवं पूरुषहा । 'बहुलं छन्दसि' (अ.सू.३. २.८८) । गोघ्ने गोहन्तुः, पूरुषघ्ने उत पुरुषहन्तुश्च क्षयद्वीराय, वीरशब्दः पुत्रवचनः, पुत्रहन्तुश्चेत्यधिभूतम् । गोघ्ने वेदहन्तुः, अध्येतृपुरुषहन्तुः, क्षयद्वीराय विक्रान्तस्य गुरोश्च हन्तुरित्यधिविद्यम् । असतां तामसानां ज्ञानपरम्परानाशेनाज्ञानप्रदस्येत्येतत् । ते तव यत् उग्रं रूपं तदारात् अस्मत्तः दूरे अस्तु । यत्ते सुम्नं सुखकरं शान्तं रूपं तदस्मे अस्मासु विषयेऽस्तु । तव शान्तेन रूपेण नः रक्षा च सदा रक्ष । अतिशयार्थे संहितायां दैर्घ्यम् । 'अवा सचस्वा नुदा मृडा वर्धा शिक्षा रक्षा–' (तै.प्रा.३.९) इत्यादि संहितायां दीर्घाक्षरस्य प्रतृण्णे ह्रस्वत्वविधायकं वचनम् । हे देव, नस्तत्वं ब्रूहि गुरावाविष्टः सन् । अधि उक्तमधिगमय च । अधि सर्वाधिकं तत्वं ब्रूहीति वा । अधा च अत एव च तत्वाधिगमात् नः शर्म यच्छ । अधा इति 'निपातस्य च' (अ.सू. ६.३.१३६) इति दीर्घ आदेशोऽवधारणार्थे । यस्त्वं द्विबर्हाः द्वयोर्द्यावापृथिव्योर्बर्हयिता वर्धयिता । द्वयोर्ज्ञानकर्मणोः ज्ञानभक्त्योर्वा वर्धयिता । ज्ञानानन्दयोर्वा ॥ ७ ॥

स्तुहि(३)श्रुतङ्गर्त्तसदँय्युवानम्मृगन्नभीममुपहत्नुमुग्रम् ।
मृडाजरित्रेरुद्रस्तवानोऽअन्यन्तेऽअस्मन्निवपन्तुसेनाः ॥ ८ ॥

स्तुहि(३) । श्रुतम् । गर्त्तसदमितिगर्त्त+सदम् । युवानम् । मृगम् । न । भीमम् । उपहत्नुम् । उग्रम् ॥ मृड । जरित्रे । रुद्र । स्तवानः । अन्यम् । ते । अस्मत् । नीति । वपन्तु । सेनाः ॥ ८ ॥

'स्तुहि श्रुतम्' इति तृतीयपादे दशाक्षरेति निचृत् त्रिष्टुप् । प्रतनास्तु केवलां त्रिष्टुभमाचक्षते–'रुदुर स्तवानः' इति विश्लेषेण । 'अस्य मन्त्रस्य वैयाघ्र ऋषिः' इत्येके । बह्वृचानामयं गार्त्समदो मन्त्रः । उत्तरार्धे चायं पाठभेदः– 'मृ॒ळा ज॑रि॒त्रे रु॑द्र॒ स्तवा॑नो॒ऽन्यं ते॑ अ॒स्मन्नि व॑पन्तु॒ सेनाः॑' (ऋ.सं. २.३३.११) इति ॥

अथ मन्त्रार्थः– स्तुहीत्यात्मानमेवाह, हे मनः, स्तुहि नरसिंहं सर्ववेदैः श्रुतं प्रसिद्धम्, गर्तसदं हृदयगुहायां सीदन्तम्, नित्ययुवानम्, भीमं मृगं न सिंहमिव उपहननशीलमुग्ररूपम् । अथ भगवन्तमेव साक्षात् स्तौति– हे रुद्र, रुजां द्रावक रुद्रान्तर्यामिन् नरसिंह, स्तवानः, णिलुक्, मां स्तावयमानः, मया स्तूयमान इत्येतत् । त्वमेव मय्यन्तःस्थित्वाऽऽत्मानं स्तौषीत्यर्थः । 'न ऋते त्वत् क्रियते किञ्चनाऽरे महामर्कं मघवन् चित्रमर्च' इति श्रुतेः । जरित्रे जरितारं स्तोतारं मां मृड रक्ष । ते सेनाः मृत्युदूताः अस्मत्तः अन्यमासुरं जनं निवपन्तु निघ्नन्तु । प्राणेऽप्येवमनुसन्धेयम् । अथ शिवः– हे रुद्र, श्रुतं गर्तसदं युवानं नरसिंहं स्तुहि, णिलुक्, अस्माभिः स्तावय । अन्यत् समानम् ॥ ८ ॥

परि॑णोरु॒द्रस्य॑हे॒तिर्वृ॑णक्तु॒परि॑त्वे॒षस्य॑दु॒र्म्म॒तिर॑घा॒योः ।
अव॑स्थि॒राम॒घव॑द्भ्यस्तनुष्व॒मीढ्व॑स्तो॒काय॒तन॑यायमृडय ॥ ९ ॥

परीति॑ । न॒ः । रु॒द्रस्य॑ । हे॒तिः । वृ॒ण॒क्तु॒ । परीति॑ । त्वे॒षस्य॑ । दु॒र्म्म॒तिरिति॑दुः+म॒तिः । अ॒घा॒योरित्य॑घ+योः ॥ अवेति॑ । स्थि॒रा । म॒घव॑द्भ्य॒इति॒म॒घव॑त्+भ्य॒ः । त॒नु॒ष्व॒ । मीढ्वः॑ । तो॒काय॑ । तन॑याय । मृ॒ड॒य॒ ॥ ९ ॥

'परि णो रुद्रस्य' इति मन्त्रस्य चतुर्थः पादो द्वादशाक्षर इति भुरिक् त्रिष्टुप् । अग्निरेवर्षिः । 'ऋषिर्देवता च रुद्र एव । छन्दस्त्रिष्टुप्' इत्येके । बह्वृचा-

स्त्वेवं पठन्ति–'परि॑ णो हे॒ती रु॒द्रस्य॑ वृज्या॒ः परि॑ त्वे॒षस्य॑ दु॒र्म॒तिर्म॒ही गा॑त् । अव॑ स्थि॒रा म॒घव॑द्भ्यस्तनुष्व॒ मीढ्व॑स्तो॒काय॒ तन॑याय मृळ' (ऋ.२.२३.१४) इति ॥

'परि णः' इति उपसर्गात् परस्य नस् इत्यस्य नकारस्य णकारादेशः । तथाहि पाणिनिः स्मरति–'उपसर्गाद् बहुलम्' (अ.सू.८.४.२८) इति । प्रातिशाख्ये च–'पारी-परि-परी-प्रपूर्वः' (तै.प्रा.७.४) इति । नात्र नसो विधिः । केवलं नकारो णकारतामापद्यत इत्येव । रुद्रस्य नरसिंहस्य हेतिः सुदर्शनादिः नोऽस्मान् परिवृणक्तु परितो वर्जयतु । 'वृजी वर्जने' रुधादिः । रुद्रस्य प्राणस्य हेतिर्गदा, शिवस्य हेतिः शूलं च नः परिवृणक्तु । अघमिच्छतीत्यघयुः । अघयुरेव संहितायामघायुः । अघशब्दः व्यञ्जनपरः संहितायां दीर्घः पद-काले ह्रस्वतामापद्यत इति प्रातिशाख्यवचनम्–'देवा-शीका-सुम्ना-श्वा-ऋता-वयुना-हृदया-अघा-उक्था-शुद्धा' (तै.प्रा.३.२) इति । केषा-मघमिच्छति? परेषाम्, नाऽत्मनः । तथाहि वार्तिकम्–'छन्दसि परेच्छा-यामिति वक्तव्यम्' (अ.सू.३.१.८) इति । एवमघशब्दादिच्छार्थे क्यचि तस्य पुनरात्वं च पाणिनिराह–'अश्वाघस्याऽत्' (अ.सू.७.४.३७) इति । अघायोः पापिनामासुराणामघं दुःखं दुरितं वा इच्छतः, त्वेषस्य तेषां दुराचारेण क्रोधदीप्तस्य, त्विष दीप्तौ, देवस्य या दुर्मतिः दुरितजननी मतिः, दुरितपथ एवैनं गमयित्वा तमः पातयामीति मतिः, साऽप्यस्मान् परिवृणक्तु । मा वयं पातकिनो भूम । सुचरितमेनमुद्धरामीति त्वत्सुमतिविषया भवेमेति भावः । अथच मघवद्भ्यः यजमानेभ्यः त्वदाराधकेभ्यो नः, अस्मदर्थे तव यानि स्थिरा स्थिराणि दुष्टदमने निर्दयानि आयुधानि धनूंषि वा, तानि अव तनुष्व अवततान् कुरु । अपनयेत्येतत् । तैरायुधैरस्मान् मा हिंसीः । हे मीढ्वः अभिलषितार्थसेचक, नारायण, प्राण, शङ्कर, अस्मै तोकाय क्षुद्राय ते तनयाय, द्वितीयार्थे चतुर्थी, तवेमं प्रेमपाकं मृडय रक्षय ॥ ९ ॥

मीढु॑ष्टम॒शिव॑तमशि॒वोन॑स्सु॒मना॑भव ।
प॒र॒मेवृ॒ख्षऽआयु॑धन्नि॒धाय॒कृत्ति॒ं॑वसा॑न॒ऽआच॑र॒
पिना॑क॒(४)म्बिभ्र॒दाग॑हि ॥ १० ॥

मीढु॑ष्ट॒मेति॒मीढुः॑+त॒म॒ । शिव॑त॒मेति॒शिव॑+त॒म॒ । शि॒वः । न॒ः । सु॒मना॒इति॑सु+मनाः॑ । भ॒व॒ ॥ प॒र॒मे । वृ॒ख्षे । आयु॑धम् । नि॒धायेति॑नि+धाय॑ । कृत्ति॑म् । वसा॑नः । एति॑ । च॒र॒ । पिना॑कम् (४) । बिभ्र॑त् । एति॑ । ग॒हि॒ ॥

'मीढुष्टम–' इति दशामो मन्त्रः । चतुर्भिरष्टकैर्जागतेन चैकेन पञ्चपदा त्रिष्टुब् भवति । अत्र तृतीयचरण एकादशाक्षरः । आद्यावष्टाक्षरौ । अन्त्यौ पुनरष्टाक्षराविति एकाक्षरन्यूना पञ्चपदा निचृत् त्रिष्टुप् । मध्यमः पादोऽभिवृद्ध इति यवमध्या च । अपरे त्वेतां यवमध्यां महाबृहतीमाहुः । यदाह कात्यायनः– 'चत्वारोऽष्टका जागतश्च महाबृहती' इति । अग्निरेवर्षिः । 'वैराज ऋषिः' इत्येके ॥

अथ मन्त्रार्थः– भक्तानामभीष्टवर्षकतम, अतितमां कल्याणकारिन्, अस्माकं विषये शिवः शान्तः सुमनाः प्रीतियुक्तमनाश्च भव । परमे वृश्चति छिनत्ति भक्तानामार्तिमिति वृक्षे मूलरूप एव आयुधजातं निधाय । 'वृक्ष इव स्तब्धो दिवि तिष्ठत्येकः' इति हि श्रुतिः । अथवा वृश्चति संसारभयमिति वृक्षे हस्ते अभयाख्यमायुधं निधाय । अभयहस्तेन मां सान्त्वयन् दर्शनं देहीत्यर्थः । कथमभयमायुधम्? यथा शङ्खः, यथा पद्मम् । यदादाय युध्यन्ते तदायुधम् । यत् हस्तगतं दृष्ट्वैव शत्रवः पलायन्ते तदायुधम् । अभयमुद्रया च संसारभयमेव भीतं पलायते । 'परमे उच्छ्रिते वटकर्णिकारादौ त्वदीये वृक्षे आयुधं त्रिशूलादिकं निधाय' इति तु बालिशं व्याख्यानम् । किं रुद्रोऽपि पाण्डवा इव अज्ञातवासाय प्रातिष्ठत? अथ कृत्तिं वसानः अस्मच्चक्षुर्गोचरत्वचं दधानः । अन्यथा

ज्ञानानन्दमयमैश्वरं ते रूपं कथं पश्येम? तद्दर्शनयोग्यं दिव्यं चक्षुस्त्वमेव दत्वा त्वां नो दर्शयेत्यर्थः । आचर आगच्छ । अथच अन्येषामायुधानां मूलरूपे निधानेऽपि पिनाकं बिभ्रदागच्छेति विरोधाभासः । अस्मासु पिहितं नाकं सुखं बिभ्रत्, तदाविष्कुर्वन् मोक्षदः सन्नागहि । त्वद्दर्शनेन यथा नः स्वरूपानन्दः विवृतपिधानः स्यात् तथा कुर्विति । 'पिनाकं केवलं ज्याबाणरहितं दण्डमात्रं भूषणार्थं हस्ते बिभ्रत्' इति तु हास्यास्पदं व्याख्यानम् । न ज्या, न बाणाः । किं केवलेन पिनाकेन क्रीडनकेनेव भक्तैः सह चिक्रीडिषयाऽगच्छति? यः सर्वाण्यायुधानि वृक्षे निधायाऽगतः स किं पिनाकं वृक्षे निधातुं विसस्मार? अथ रुद्रपरतायाम्–अस्मद्रक्षार्थमभयं दधानः, तथा ये तत्वज्ञानपरिपन्थिनस्तेषां निरासार्थं पिनाकं कोदण्डं त्रिशूलं वा दधान आगहि– इति चार्थः । 'पिनाकः शिवकोदण्डे पांसुवृष्टित्रिशूलयोः' इति चाभिदधति ॥ १० ॥

विकि॑रिद॒विलो॑हित॒नम॑स्तेऽअस्तुभगवः ।
यास्तै॑स॒हस्र॑ꣳहे॒तयो॒न्यम॒स्मन्निव॑पन्तु॒ताः ॥ ११ ॥

विकि॑रि॒दे॒ति॒वि+कि॒रि॒द॒ । विलो॑हि॒ते॒ति॒वि+लो॒हि॒त॒ । नम॑ः । ते॒ । अ॒स्तु॒ । भ॒ग॒व॒इति॑भग+व॒ः ॥ याः । ते॒ । स॒हस्र॑म् । हे॒तय॑ः । अ॒न्यम् । अ॒स्मत् । नीति॑ । व॒प॒न्तु॒ । ताः ॥

'विकिरिद–' इत्येकादशो मन्त्रः स्फुटमानुष्टुभः । अत्र पुनरिदं चिन्तनीयं भवति स्वरवादिनाम् । साम्प्रदायिकाः तृतीयं तुरीयं च चरणं सन्धाय पठन्ति 'हेतयोऽन्यमस्मत्' इति । यद्यपि प्रातिशाख्ये तावदेतत् पठ्यते–रुद्रप्रथमो-पोत्तमयोरनुवाकयोरेकारपूर्व ओकारपूर्वो वा अकारो न लोपमापद्यते (तै.प्रा.११.३) इति । तेन– 'हेतयो अन्यमस्मन्निवपन्तु' इति पठनीयमिति प्राप्तम् । तथाऽपि हेतय इति पदपूर्वोऽकारो लोपमापद्यत इति प्रतिप्रसवात्

‘हेतयोऽन्यम्’ इत्येव युक्तः सांहितः पाठः । तथाहि [१]प्रातिशाख्यसूत्रम्– ‘गाहमानो-जायमानो-हेतयो–’ (तै.प्रा.१२.८) इत्यादि । ‘अस्य मन्त्रस्य पुलस्त्य ऋषिः’ इति केचित् ॥

अथ मन्त्रार्थः– भक्तानामपेक्षितं विकिरन्विकिरन् ददातीति विकिरिदः । बाणान् विकीर्य शत्रून् द्यतीति विकिरिदः । ‘विविधं किरन्ति हिंसन्तीति विकिरयः पापव्याधयः तेषां दाता खण्डयिता’ इति केचित् । ‘कीर्यन्त इति किरयो धनानि विशेषेण ददातीति विकिरदः’ इत्यन्ये । क्रोधेन ज्वलन् विलोहितः । विगतलौहित्यश्च । शुभ्रवर्ण इत्यर्थः । ‘ध्येयः पञ्चमुखो रुद्रः स्फटिकामलकान्तिमान्’ इति स्मरणात् । हे भगवन्, नमोऽस्तु ते । ‘ज्ञान-शक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः’ इति हि स्मरन्ति । विष्णोरन्यत्र भगवच्छब्दार्थमन्यथाऽऽहुः–‘उत्पत्तिं च विनाशं च भूतानामागतिं गतिम् । वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति’ इति । यास्ते हेतयोऽसङ्ख्याः । ‘द्व्याद्यनन्तान्तबाहुकः’ इति तन्त्रसारे । ‘सर्व-प्रहरणायुधः’ इति विष्णुसहस्रनामसु । ता अस्मत्तोऽन्यं निवपन्तु पीडयन्तु । मा वयं भगवन्निग्रहस्थानं भूमेति ॥ ११ ॥

स॒हस्रा॑णिसहस्र॒धाबा॑हु॒वोस्तव॑हे॒तय॑ः ।
तासा॒मीशा॑नोभगवꣳप्परा॒चीना॒मुखा॑कृधि　　॥ १२ ॥

स॒हस्रा॑णि । स॒ह॒स्र॒धेति॑सहस्र+धा । बा॒हु॒वोः । तव॑ । हे॒तय॑ः ॥ तासा॑म् । ईशा॑नः । भ॒ग॒व॒इति॑भग+व॒ः । प॒रा॒चीना॑ । मुखा॑ । कृ॒धि॒ ॥ १० ॥

(अ॒स्मिꣳस्त॒नुव॑ः स्तु॒हि॒ पिना॑क॒मेका॒न्नत्रि॒ꣳशच्च॑)

इति दशमोऽनुवाकः

—०—

१. तथाच समग्रं सूत्रम्– **‘गाहमानो-जायमानो-हेतयो-मन्यमानो-वनस्पतिभ्यः-पते-स्रिधः-तपसः-स्वधावो-भामितो-अग्नय-आयो-अध्वर्यो-क्रतोपूर्वः’** इति ।

‘सहस्राणि सहस्रधा–’ इति द्वादशो मन्त्रः पुनरानुष्टुभः । ‘नारदः कण्वो वा ऋषिः’ इति केचित् । ‘राजोपद्रवशान्तौ विनियोगः’ इति च । तव सहस्राण्यसङ्ख्या हेतयः सहस्रविधा असङ्ख्यप्रकाराः । बाहुवोरिति बाहुषु । द्विवचनमतन्त्रम् । भगवन्, भूतभव्यस्येशानस्त्वं तासां हेतीनां मुखान्यस्मत्तः पराचीनानि पराङ्मुखानि कुरु ॥ १२ ॥

इत्याचार्यगोविन्दस्य कृतिषु तैत्तिरीयरुद्रप्रपाठकदशमानुवाकभाष्यम् ॥

—०—

पदानि–२२९ संहत्य–८९९+२२९=११२८

[एकादशोऽनुवाकः]

सहस्राणिसहस्रशोयेरुद्राऽअधिभूम्याम् ।
तेषांसहस्रयोजनेवधन्वानितन्मसि ॥ १ ॥

सहस्राणि । सहस्रशइतिसहस्र+शः । ये । रुद्राः । अधीति । भूम्याम् ॥
तेषाम् । सहस्रयोजनइतिसहस्र+योजने । अवेति । धन्वानि । तन्मसि ॥

अस्मिन्ननुवाके दश ऋचो भवन्ति अनुष्टुब्बद्धाः । ततस्त्रीणि यजूंषि । शतं षट् च पदानि । ‘तत्राऽदौ चतुर्णां मन्त्राणां दुर्वासा ऋषिः । अवशिष्टानां षण्णां देवलः । सर्वेषां रुद्रो देवता’ इत्याचक्षते । अग्निरेवानुवाकर्षिः । नारायणप्राणशङ्करा देवता इति तु तत्ववादिन इत्युक्तम् । ‘तेषां सहस्रयोजने–’ इत्युत्तरार्धं दशस्वपि समानम् ॥

तत्र प्रथमो मन्त्रः– सहस्राणि सहस्रशः, असङ्ख्या इति यावत् । ये रुद्र-पार्षदाः । तथाहि भागवते–

भूतस्य भार्या भूता या तस्या एकादश स्मृताः ।
रैवतोजो भवो भीमो वाम उग्रो वृषाकपिः ।
अजैकपादहिर्बुध्निर्विरूपाक्षो महानिति ॥

सुरूपाऽसूत भूतस्य भार्या रुद्रांश्च कोटिशः ।
रुद्रपार्षदांश्चान्यान् घोरान् प्रेतविनायकान्’ (६.६.१७–८) इति ॥

प्रेतविनायकप्रमुखान् भूतपिशाचादीन् । ये रुद्राः सामूह्येन रुद्रपदोक्ता रुद्रपार्षदाः । रोदयन्तीति निर्वचनसामान्यात् । भूम्यामधिश्रिताः । तेषां धन्वानि

धनूंषि सहस्रयोजनदूरे देशे अवतन्मसि अवततज्यानि कुर्मः । सायुधास्ते सुदूरमपसर्पन्त्वित्यर्थः । अवतन्मः इत्यत्र मसः सकारान्तस्य इकारोऽन्तो भवति ‘तन्मसि’ इति । तथाहि पाणिनिः–‘इदन्तो मसि’ (अ.सू.७.१.४६) इतीति पुरस्तादुक्तम् । सहस्रमिति बहुत्ववचनः । ‘ಸಾವಿರಾರು’ इति भाषायाम् । दशस्वपि मन्त्रेषु ‘अवतन्मसि’ इत्यनुवर्तनादेते अवतानमन्त्रा उच्यन्ते । अनुवाकश्चावतानानुवाक इति । अत्र द्वितीयचरणे ‘भूमियाम्’ इति, तुरीये ‘योजने+अव’ इति च विश्लेषेण केवलाऽनुष्टुप् ॥ १ ॥

अस्मिन्महत्यर्ण्णवेन्तरिख्षेभवाऽअधि* ॥ २ ॥

अस्मिन् । महति । अर्ण्णवे । अन्तरिख्षे । भवाः । अधि ॥

अथ द्वितीयोऽवतानमन्त्रः– अस्मिन् महत्यर्णव इति । अत्र, ‘अस्मिन् महति अर्णवे+अन्तरिक्षे’ इति विश्लेषेणाक्षरपूर्तिः । अस्मिन् महति अर्णवे जलाधारे अन्तरिक्षे अधिश्रिता भवा रुद्राः । भवति भूमौ वृष्टिरेभिरिति । अन्तरिक्षात् पतितेन हि जलेन भूमौ नदीकूपतटाकादीनि पूर्यन्ते । अर्णवे,अन्तरिक्षे च अधि उपरि ये भवन्तीति वा । ‘तेषां सहस्रयोजनेऽवधन्वानि तन्मसि’ इति वर्तते । उक्तं चैतत्–‘अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः । ये भूता अन्तरिक्षस्था ये भूता दिवि संस्थिताः’ इति ॥ २ ॥

नीलग्रीवाश्शितिकण्ठाश्शर्वाऽअधःख्षमाचराः* ॥ ३ ॥

नीलग्रीवाइतिनील+ग्रीवाः । शितिकण्ठाइतिशिति+कण्ठाः । शर्वाः । अधः । ख्षमाचराः ॥

अथ तृतीयः– नीलग्रीवाः शितिकण्ठाः शर्वा इति । नीलग्रीवाः शितिकण्ठा इति प्रधानरुद्रसारूप्यमाह । नैते रुद्रइव पीतविषाः । अथापि जन्मत एव एकतो नीलकण्ठाः । अपरतः शितिकण्ठाः श्वेतकण्ठा इति । क्षमाया अधः पाताळे

चरन्तीति अधःक्षमाचराः । शंरोधनात् शर्वाः । अन्तरिक्षगता वृष्ट्यादिना भावयन्ति चेति भवा उक्ताः । पाताळचराः केवलं भूमिगतानां शं रुन्धन्तीति शर्वाः । शर्वन्तीति वा शर्वाः । शर्व सर्व हिंसायाम् । तेषां सहस्रयोजने– ॥ ३ ॥

नील॑ग्रीवाश्शिति॒कण्ठा॒दिव॑ꣳरु॒द्राऽउप॑श्रिताः* ॥ ४ ॥

नील॑ग्रीवा॒इति॒नील॑+ग्री॒वा॒ः । शि॒ति॒कण्ठा॒इति॑शिति+कण्ठाः॑ । दिव॑म् । रु॒द्राः । उप॑श्रिता॒इत्युप॑+श्रि॒ता॒ः ॥

अथ चतुर्थः– नीलग्रीवाः शितिकण्ठा दिवमिति । पातळे दिवि च वर्तमाना उभयेऽप्याकारतः समानाः नीलग्रीवाः शितिकण्ठाः । उपरि दिवमाश्रिताः । दिवि गता रोदयन्तीति रुद्राः । तेषां सहस्रयोजने– ॥ ४ ॥

येवृ॒क्षेषु॑स॒स्पिञ्ज॑रा॒नील॑ग्रीवा॒विलो॑हिताः* ॥ ५ ॥

ये । वृ॒क्षेषु॑ । स॒स्पिञ्ज॑राः । नील॑ग्रीवा॒इति॒नील॑+ग्री॒वा॒ः । विलो॑हिता॒इति॒ वि+लो॒हि॒ता॒ः ॥

अथ पञ्चमः–ये वृक्षेषु । ये वृक्षाणामुपरि स्थिताः । वृक्षारूढान् क्वचिद् रक्षन्ति । क्वचित् पातयन्ति । तेषु केचित् सस्पिञ्जराः । शष्पाणि बालतृणानीव पिञ्जरा नीलसितश्यामाः । त्रयाणां मेलनेन हरितवर्णः सम्पद्यते । तादृशवर्णाः । सवर्णेषु पर्णेषु निलीय स्थिताः । केचिन्नीलग्रीवाः । सस्पिञ्जरा एव कण्ठे नीला वा । केचिद् विलोहिताः विशेषेण लोहितवर्णाः । पुष्पफलादिषु स्थिताः । अथच लोहितोपलक्षितसप्तधातुमयस्थूलरूपरहिताः । अत एवादृश्याः सन्तः पीडयन्ति । तेषां सहस्रयोजने– ॥ ५ ॥

येभू॒ताना॒मधि॑पतयोविशि॒खास॑ꣳक्कप॒र्द्दिनः॑* ॥ ६ ॥

ये । भू॒ताना॑म् । अधि॑पतय॒इत्यधि॑+प॒त॒य॒ः । वि॒शि॒खास॒इति॑वि+- शि॒खास॑ः । क॒प॒र्द्दिन॑ः ॥

अथ षष्ठः– ये भूतानामिति । अत्र प्रथमः पादो नवाक्षर इति भुरिगनुष्टुप् । ये भूतानामन्तर्धाय पीडकानाम अधिपतयः । तेषां केचिद् विशिखाः । मुण्डितमुण्डाः । केचित् कपर्द्दिनः जटाजूटधराः । तेषां सहस्रयोजने– ॥ ६ ॥

येऽअन्ने॑षुवि॒विद्ध्य॑न्ति॒पात्रे॑षु॒पिब॑तो॒जना॑न्* ॥ ७ ॥

ये । अन्ने॑षु । वि॒विद्ध्य॒न्तीति॑वि+विद्ध्य॑न्ति । पात्रे॑षु । पिब॑तः । जना॑न् ॥

अथ सप्तमः–ये अन्नेषु । ये रुद्रपार्षदा अन्नेषु स्थित्वा विविधं पीडयन्त्य-पचनादिना । पानीयपात्रेषु स्थित्वा पिबतो जनान् पीडयन्ति शैत्यादिना । तेषां सहस्रयोजने– ॥ ७ ॥

येप॒थाम्प॑थि॒रख्ष॑यऽऐलबृ॒दाय॒व्युध॑ः* ॥ ८ ॥

ये । प॒थाम् । प॒थि॒रख्ष॑य॒इति॑पथि+रख्ष॑यः । ऐ॒ल॒बृ॒दाः । य॒व्युध॑ः ॥

अथाष्टमः– ये पथाम् । अत्र द्वितीयचरणे ‘यवियुधः’ विश्लेषेणाष्टाक्षरता । अधिपतय इति वर्तते । लौकिके वैदिके वा मार्गे प्रवर्तमानान् निरोद्धुं पुरो गमयितुं च समर्थाः पथामधिपतयः । अत एव ते पथिरक्षयः । पथो रक्षन्तीति विग्रहः । ‘रक्ष पालने’ इत्यतः छान्दस इन्–‘छन्दसि वनसनरक्षिमथाम्’ (अ.सू.३.२.२७) इति । इच्छया लान्त्येनामिति इला अन्नम् । बहुविध-स्यान्नस्य समुदाय ऐलम् । इला वा भूः । तत्र भवमैलमन्नम् । इं कामं लान्तीति इलाः कामुकाः, फलापेक्षया कर्मसु प्रवृत्ताः । तेषां वृन्दमैलम् । तदन्नं बृहद् ददति, तस्य च फलप्रेप्सोः कामितं बृहद् ददतीति ऐलबृदाः । ‘ब कामने’ इति धातोर्वा बृदाः कामितदाः । युवन्तीति यावः । योशब्दोऽयम् । यु मिश्रणे । स्वयमश्रद्दधतोऽपि वैदिकेषु मिलित्वा परिस्थातुमिच्छन्ति, अन्ततः वैदिकमार्गभञ्जनाय, ते यावः । योभिः सह युध्यन्त इति यव्युधः । तेषां सहस्रयोजने– ॥ ८ ॥

येतीर्थानि(१)प्रचरन्तिसृकावन्तोनिषङ्गिणः* ॥ ९ ॥

ये। तीर्थानि(१)। प्रचरन्तीतिप्र+चरन्ति। सृकावन्तइतिसृका+वन्तः। निषङ्गिणइतिनि+सङ्गिनः॥

अथ नवमः– ये तीर्थानि । ये गङ्गादितीर्थानि तत्पावित्र्यरक्षणाय प्रचरन्ति । सृकः सृगः भिण्डिपालाख्य आयुधविशेषः। सृगवन्त एव सृकावन्तः। सृङ्का वा सृका। सृकावन्तः पाशहस्ताः। निषङ्गिणः खड्गहस्ताः। तूणीरवन्तः। अर्थाद् धनुर्धराः। नह्यधन्वानस्तूणीरवन्तो भवन्ति। तेषां सहस्रयोजने– ॥ ९ ॥

यऽएतावन्तश्चभूयाꣳसश्चदिशोरुद्रावितस्थिरे ।
तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥ १० ॥

ये । एतावन्तः । च । भूयाꣳसः । च । दिशः । रुद्राः । वितस्थिरइतिवि+तस्थिरे ॥ तेषाम् । सहस्रयोजनइतिसहस्र+योजने । अवेति । धन्वानि । तन्मसि ॥

अथ दशमः–य एतावन्तश्च । अत्र प्रथमपादो दशाक्षर इति पङ्क्तिगर्भा स्वराडनुष्टुप्। उत्तरार्धस्य सर्वत्रानुवृत्तिसूचनायैव आद्यन्तयोः पाठः। केचिदिमं मन्त्रद्वयमाहुः । पूर्वार्द्धं दशमो मन्त्रः, उत्तरार्द्धमेकादश इति । ततस्त्रीणि यजूंषीति तत्पक्षे चतुर्दशमन्त्रोऽयमनुवाकः । न स्वरसमेतत् । एतावन्तो येऽत्रोक्ता येऽनुक्ताश्च भूयांसो रुद्रा दिशो व्याप्य तस्थुः। तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ १० ॥

नमोरुद्रेभ्योयेपृथिव्यां* येन्तरिख्षे* येदिवि* येषामन्नं* वातो* वर्षमिषवस्तेभ्योदशप्राचीर्दशदख्षिणादशप्रती-चीर्दशोदीचीर्दशोर्ध्वास्तेभ्योनमस्तेनोमृडयन्तुतेयन्द्विष्मो-यश्च(२)नोद्वेष्टितँव्वोजम्भेदधामि ॥ ११–१३ ॥

हरिः ओ३म् ॥ ॥ ११ ॥

नमः। रुद्रेभ्यः। ये। पृथिव्याम्। ये। अन्तरिख्षे। ये। दिवि। येषाम्। अन्नम्। वातः। वर्षम्। इषवः। तेभ्यः। दश। प्राचीः। दश। दख्षिणा। दश। प्रतीचीः। दश। उदीचीः। दश। ऊर्ध्वाः। तेभ्यः। नमः। ते। नः। मृडयन्तु। ते। यम्। द्विष्मः। यः। च(२)। नः। द्वेष्टि। तम्। वः। जम्भे। दधामि॥ ११ ॥ हरिः ओ३म्॥

(तीर्थानियश्चषट्च)

इत्येकादशोऽनुवाकः

॥ इति तैत्तिरीयसंहितायां चतुर्थखण्डे पञ्चमः प्रपाठकः ॥

—०—

अवसिता दश ऋङ्मन्त्राः। अथान्ते यजुषा प्रार्थयते– नमो रुद्रेभ्य इत्यादिना। 'अस्य यजुषः रुद्र एवर्षिः। अनुष्टुप् छन्दः। रुद्र एव देवता' इति केचित्। अत्र त्रीणि यजूंषि सम्भूयैकं यजुर्बभूव। तद् यथा–

नमो रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि ॥

नमो रुद्रेभ्यो येऽन्तरिक्षे येषां वात इषवस्तेभ्यो दश – इत्यादि।

नमो रुद्रेभ्यो ये दिवि येषां वर्षमिषवस्तेभ्यो दश– इत्यादि।

ये पृथिव्यां रुद्रपार्षदाः तेषामन्नमेव इषव आयुधानि। जिह्वाचापलं जनयित्वा, अविहिततामसान्नभक्षणे चापथ्यान्नभक्षणे च मनः प्रवर्त्य, क्वचिदनशनेन, क्वचिदन्नार्थमन्नस्य वा चौर्यं कारयित्वा तेनैवाऽयुधेन निघ्नन्ति । अन्नमित्यदनीयसामान्यम्। 'त्रेधा वा इदमन्नं विहितमशनं पानं खादः' इति श्रुतिः। अथच चोष्यं लेह्यं पेयं खाद्यमिति चतुर्विधमन्नमाचक्षते ॥

येऽन्तरिक्षे रुद्रपार्षदास्तेषां वात इषवः । वातप्रकोपेनैवाऽयुधेन, चण्डमारुतेन वा, प्राणरोधेन वा ते घ्नन्ति ॥

ये दिवि रुद्रपार्षदास्तेषां वर्षमिषवः । अतिवृष्ट्याऽनावृष्ट्या वा जलप्रवाहे पातयित्वा वा नदीतटाकादिषु मज्जयित्वा वा घ्नन्ति ॥

तेभ्यस्त्रिप्रकारेभ्योऽपि रुद्रपार्षदेभ्यो नमः । तैस्तत्तत्कर्म कारयितृभ्यो रुद्रप्राण-नारायणेभ्यो नमः । कथं नमस्क्रियते– दश अङ्गुलीः प्राच्यग्राः कृत्वा, एवं दशाङ्गुलीर्दक्षिणाग्राः, दश प्रतीच्यग्राः, दशोदीच्यग्राः, दश चोर्ध्वाग्राः, एवं पञ्चभिरञ्जलिभिस्तेभ्यो रुद्रेभ्यो नमोऽस्तु । 'दश वा अञ्जलेरङ्गुलयो दिशिदिश्येवैभ्य एतदञ्जलिं करोति' इति श्रुतिः । ते रुद्रा नो मृडयन्तु रक्षन्तु सुखयन्तु वा । एवं प्रसादितरुद्रतत्पार्षदास्ते वयं यमन्तःशत्रुमविद्याकाम-क्रोधादिकम्, बाह्यं वा देवद्विषं जनं द्विष्मः, यश्च नो विनाऽपि कारणं देवोपा-सका आस्तिका इत्येव द्वेष्टि तं वो जम्भे दंष्ट्राकराळे मुखे दधाम्यर्पयामि । अत्र 'द्विष्मः' इति, 'नः' इति चाऽत्मनि बहुवचनम् । जम्भयन्ति नाशयन्तीति जम्भाः पाश्वर्दन्ताः । जभि नाशने । अत्र चैकवचनेन जम्भयुक्तं मुखमुच्यते । यत्रयत्र ते भवन्ति तत्रतत्र गत्वा तान् खादङ्खादं नाशयतेत्यर्थः ॥ ११ ॥

तमिमं शतरुद्रीय इत्याचक्षते । शतमसङ्ख्याता रुद्रा अस्मिन् प्रपाठके प्रतिपाद्यन्त इति । प्रधानश्च रुद्र एकादशात्मक इति तन्मन्त्रोऽपि एका-दशानुवाकः । नारायणोऽप्यनन्तात्मा, एकादशेन्द्रियगत एकादशात्मा च । इन्द्रियगणमानी जीवमानी प्राणोऽपि तथा ॥

अथ होमविधिः । 'अजक्षीरेण जुहोति । आग्नेयी वा एषा यदजा' (तै.सं.५.४.३) । अर्कपर्णमयी जुहूर्भवति । 'अर्कपर्णेन जुहोति' इति च । ऐशान्याः समीपवर्तित्वादुदीची रुद्रस्य दिगुच्यते । तेनोदङ्मुखस्तिष्ठन् चरमेष्टकायां जुहुयात् । त्रेधा विभज्य मन्त्रं जुहुयात् । 'नमस्ते रुद्र मन्यवे'

इत्यारभ्य 'सभापतिभ्यश्च वो नमः' इति तृतीयानुवाके यदुपान्त्यं यजुस्तत्पर्यन्तं प्रथमो भागः । अष्टसप्ततिर्नामानि । 'नमो अश्वेभ्योऽश्वपतिभ्यश्च वो नमः' इति तृतीयानुवाकस्यान्तिमं यजुरारभ्य 'नमः पार्याय चावार्याय च' इत्यष्टमे यद् त्रयोदशं यजुस्तदन्तो द्वितीयो विभागः । शतं द्विपञ्चाशच्च नामानि । 'नमः प्रतरणाय चोत्तरणाय च' इति त्रयोदशं यजुरारभ्य, एकादशे यो दशमो मन्त्रः 'एतावन्तश्च भूयांसश्च' इति तदन्तस्तृतीयो भागः । तदन्ते 'नमो रुद्रेभ्यः' इति त्रिभिर्यजुर्भिस्तिस्र आहुतयः । एते प्रत्यारोहमन्त्राः ॥

आदौ लोकत्रयगतभगवत्प्रीणनाय तिस्र आहुतयोऽजायाः क्षीरेण सस्वाहा-कारम् । प्रथमायामाहुतौ जानुदघ्नं स्रुग्धारणम् । अथ द्वितीयायां नाभिदघ्नम् । तृतीयायामास्यदघ्नम् । अनुक्रमेण परिभ्रमणं कृत्वैव होतव्यम् । उत्तरास्तिस्र आहुतयो यजमानं वाचयित्वा होतव्याः । एवं षडाहुतयो भवन्ति । ताभिः षड्तुगतो भगवान् प्रीयते ॥

प्रयोगान्तरं चाऽह बोधायनः– 'अर्कपर्णस्य पुटमन्तरवस्राविणं कृत्वोदङ्मुख-स्तिष्ठन् मुखदघ्ने धारयन्....'नमस्ते रुद्र मन्यवे' इत्यन्तमनुवाकं निगद्य, द्वितीयं तृतीयं चतुर्थस्य यत्राभिजानाति 'नमः क्षत्तृभ्यः' इति ततः स्वाहा-करोति । ततः प्राङावृत्य नाभिदघ्ने धारयन् 'सङ्ग्रहीतृभ्यश्च वः' इति प्रतिपाद्या-वशिष्टमनुवाकस्य निगद्य पञ्चमं षष्ठं सप्तमस्य च यत्राभिजानाति 'नमो वर्ष्याय च' इति ततः स्वाहाकरोति । ततो दक्षिणाऽऽवृत्य जानुदघ्ने धारयन् 'अवर्ष्याय च' इति प्रतिपाद्यावशिष्टमनुवाकस्य निगद्याष्टमं नवमं दशमं च, एकादशस्य च यत्राभिजानाति 'य एतावन्तश्च' इति ततः स्वाहाकरोति । ततः प्रत्यङ्ङावृत्य गुल्फदघ्ने धारयन् 'नमो रुद्रेभ्यो ये पृथिव्याम्' इति हुत्वैतद् यजमानं वाचयति । नाभिदघ्ने धारयन् 'नमो रुद्रेभ्यो येऽन्तरिक्षे' इति हुत्वैतद्यजमानं वाचयति । ग्रीवादघ्ने धारयन् 'नमो रुद्रेभ्यो ये दिवि' इति हुत्वा यजमानं वाचयति' (बो.श्रौ. सू.१०.४८) इत्यादि ॥

इदमाचार्यगोविन्दः प्रमृष्टं शब्दतोऽर्थतः ।
वितेने विमलं भाष्यं शतरुद्रीयगं शुभम् ॥

रुद्रं नारायणं देवं रुद्रं प्राणं त्रिरूपिणम् ।
रुद्रं कपालिनं शम्भुं शतरुद्रीयगं नुमः ॥

त्रयोऽर्थाः सर्ववेदेषु त्रयोऽर्थाः शतरुद्रिये ।
तदेतदपि भाष्येऽस्मिन् लेशतः सम्प्रदर्शितम् ॥

शिवाय त्र्यक्षाय त्रिदिवपतिमुख्यामरपुषे
शिवाश्लेषप्रीणद्धवलभसितस्निग्धवपुषे ।
त्रिलोकीरक्षायै त्रिपुरहर नानायुधजुषे
नमस्तुभ्यं दिव्यस्तुतिभृतनमोवाकयजुषे ॥

पान्त्वस्मान् पवमानपादनळिनप्रान्तेप्सवः पांसवः
साधूनां भवपाशपाटनविधौ पर्यायपर्युत्सुकाः ।
ये वाणीमुखमण्डनाय तिलकायन्ते चिरं ते सतां
श्रीवत्साङ्करतिप्रदानपटवः पापाटवीपावकाः ॥

वन्दे क्षीराब्धिजातावदनवनरुहास्वादने चञ्चरीकं
यस्य प्राणो विरिञ्चः प्रसव उत सतां धाम हृत्पुण्डरीकम् ।
पौत्रो दक्षाध्वरारिस्तमथ भजदघद्रावणे जागरूकं
वेदानां वावदूकं सरसिजनयनं यत् परं तत्वमेकम् ॥

निर्दयरक्षोवक्षो मर्दयमर्दय दयाम्बुधे बुधेन ।
भवभर्जन दुरितार्जनदुर्जनतर्जन विश्वसर्जन विभो ॥

किङ्करः शङ्करो यस्य किङ्करः किं करोम्यहम् ।
किङ्करः पवमानोऽपि नोऽपि ते सन्तु शङ्कराः ॥

इत्याचार्यगोविन्दस्य कृतिषु तैत्तिरीयरुद्रप्रपाठकभाष्यं सम्पूर्णम् ॥

—०—

पदानि—१०६ संहत्य—११२८+१०६=१२३४

पारायणानुगुणः तैत्तिरीयरुद्रप्रपाठकपाठः

ह॒रि॒ः ओ४म् ॥

नम॑स्तेरुद्रम॒न्यव॑उ॒तोत॒ऽइष॑वे॒नमः॑ ।
नम॑स्तेऽअस्तु॒धन्व॑नेबा॒हुभ्या॑मु॒तते॒नमः॑ ॥ १ ॥

यात॒ऽइषु॑श्शि॒वत॑माशि॒वम्ब॒भूव॑ते॒धनुः॑ ।
शि॒वाश॑र॒व्या॑यात॒वतया॑नोरुद्रमृडय ॥ २ ॥

यातै॑रुद्रशि॒वात॒नूरघो॒रापा॑पकाशिनी ।
तया॑नस्त॒नुवा॒शन्त॑मया॒गिरि॑शन्ता॒भिचा॑काशीहि ॥ ३ ॥

यामिषु॑ङ्गिरिशन्त॒हस्ते॒(१)बिभ॒र्ष्यस्त॑वे ।
शि॒वाङ्गि॑रित्र॒ताङ्कु॑रु॒माहि॑ꣳसीः॒पुरु॑ष॒ञ्जग॑त् ॥ ४ ॥

शि॒वे॒नवच॑सात्वा॒गिरि॒शाच्छा॑वदामसि ।
यथा॑न॒स्सर्व॒मिज्जग॑दय॒क्ष्मꣳसु॒मना॒ऽअस॑त् ॥ ५ ॥

अद्ध्य॑वोचदधिव॒क्ताप्र॑थ॒मोदैव्यो॑भि॒षक् ।
अहीꣳश्च॒सर्वा᳚ञ्ज॒म्भय॒न्थ्सर्वा᳚श्चयातुधा॒न्यः॑ ॥ ६ ॥

अ॒सौयस्ता॒म्रोऽअ॑रु॒णऽउ॒तब॒भ्रुस्सु॑म॒ङ्गलः॑ ।
येचे॒माꣳरु॒द्राऽअ॒भितो॑दि॒क्षु(२)श्रि॒तास्स॑हस्र॒शोवै॑षा॒ꣳ
हेड॑ऽईमहे ॥ ७ ॥

असौयोवसर्प्पतिनीलग्ग्रीवोविलोहितः ।
उतैनंङ्गोपाऽअदृशन्नदृशन्नुदहार्य्यः ।
उतैनँव्विश्वाभूतानिसदृष्टोमृडयातिनः ॥ ८ ॥

नमोऽअस्तुनीलग्ग्रीवायसहस्राख्षायमीढुषे ।
अथोयेऽअस्यसत्वानोहन्तेभ्योकरन्नमः ॥ ९ ॥

प्रमुञ्चधन्वनस्त्वमुभयोरार्त्नियोर्ज्याम् ।
याश्चतेहस्तऽइषवः(३)पराताभगवोवप ॥ १० ॥

अवतत्यधनुस्त्वꣳसहस्राख्षशतेषुधे ।
निशीर्य्यशल्यानाम्मुखाशिवोनस्सुमनाभव ॥ ११ ॥

विज्यन्धनुᳵक्कपर्दिनोविशल्योबाणवाँउत ।
अनेशन्नस्येषवऽआभुरस्यनिषङ्गथिः ॥ १२ ॥

यातेहेतिर्म्मीढुष्टमहस्तेबभूवतेधनुः ।
तयास्मान्विश्वतस्त्वमयख्ष्मयापरिब्भुज ॥ १३ ॥

नमस्तेऽअस्त्वायुधायानाततायधृष्णवे ।
उभाभ्या(४)मुततेनमोबाहुभ्यान्तवधन्वने ॥ १४ ॥

परितेधन्वनोहेतिरस्मान्वृणक्तुविश्वतः ।
अथोयऽइषुधिस्तवारेऽअस्मन्निधेहितम् ॥ १ ॥ ॥ १५ ॥

इति प्रथमोऽनुवाकः

—०—

नमोहिरण्यबाहवेसेनान्येदिशाञ्चपतयेनमोनमोवृख्षेभ्योहरि-
केशेभ्यᳵप्पशूनाम्पतयेनमोनमस्सस्पिञ्जरायत्विषीमतेपथीना-

म्पतयेनमोनमोबभ्लुशायविव्याधिनेन्नानाम्पतयेनमोनमो-
हरिकेशायोपवीतिनेपुष्टानाम्पतयेनमोनमोभवस्यहेत्यै-
जगताम्पतयेनमोनमोरुद्रायाततविनेख्षेत्राणाम्पतयेनमो
नमस्सूतायाहन्त्यायवनानाम्पतयेनमोनमो(१)रोहितायस्थ-
पतयेवृख्षाणाम्पतयेनमोनमोमन्त्रिणेवाणिजायकख्षा-
णाम्पतयेनमोनमोभुवन्तयेवारिवस्कृतायौषधीनाम्पतयेनमो
नमऽउच्चैर्घोषायाक्रन्दयतेपत्तीनाम्पतयेनमोनमᳵक्कृथ्स्नवीताय
धावतेसत्वनाम्पतयेनमः ॥ २ ॥

इति द्वितीयोऽनुवाकः

—०—

नमस्सहमानायनिव्याधिनऽआव्याधिनीनाम्पतयेनमोनमᳵ
क्ककुभायनिषङ्गिणेस्तेनानाम्पतयेनमोनमोनिषङ्गिणऽइषुधि-
मतेतस्कराणाम्पतयेनमोनमोवञ्चतेपरिवञ्चतेस्तायूनाम्पतये
नमोनमोनिचेरवेपरिचरायारण्यानाम्पतयेनमोनमस्सृका-
विभ्योजिघांꣳसद्भ्योमुष्णताम्पतयेनमोनमोसिमद्भ्योनक्त-
ञ्चरद्भ्यᳵप्प्रकृन्तानाम्पतयेनमोनमऽउष्णीषिणेगिरिचराय
कुलुञ्चानाम्पतयेनमोनमऽ(१)इषुमद्भ्योधन्वाविभ्यश्चवो-
नमोनमऽआतन्वानेभ्यᳵप्प्रतिदधानेभ्यश्चवोनमोनमऽआय-
च्छद्भ्योविसृजद्भ्यश्चवोनमोनमोस्यद्भ्योविद्ध्यद्भ्यश्च
वोनमोनमऽआसीनेभ्यश्शयानेभ्यश्चवोनमोनमस्स्वपद्भ्यो-

जाग्र॑द्भ्यश्चवो॒नमो॒नम॒स्तिष्ठ॑द्भ्यो॒धाव॑द्भ्यश्चवो॒नमो॒
नम॑स्स॒भाभ्य॑स्स॒भाप॑तिभ्यश्चवो॒नमो॒नमो॒ऽअश्वे॒भ्योऽश्व॑-
पतिभ्य(२)श्चवो॒नमः ॥ ३ ॥

इति तृतीयोऽनुवाकः

—०—

नम॑ऽआव्या॒धिनी᳚भ्योवि॒विध्य॑न्तीभ्यश्चवो॒नमो॒नम॒ऽउग॑णा-
भ्यस्तृꣳह॒तीभ्य॑श्चवो॒नमो॒नमो॑गृ॒त्सेभ्यो॑गृ॒त्सप॑तिभ्यश्चवो॒नमो॒
नमो॒व्राते᳚भ्यो॒व्रात॑पतिभ्यश्चवो॒नमो॒नमो॑ग॒णेभ्यो॑ग॒णप॑तिभ्यश्च
वो॒नमो॒नमो॒विरू॑पेभ्योवि॒श्वरू॑पेभ्यश्चवो॒नमो॒नमो॑म॒हद्भ्य॑ᳵ
ख्षुल्ल॒केभ्य॑श्चवो॒नमो॒नमो॑र॒थिभ्यो॑ऽर॒थेभ्य॑श्चवो॒नमो॒नमो॒रथे᳚भ्यो
(१)रथ॑पतिभ्यश्चवो॒नमो॒नम॒स्सेना᳚भ्यस्सेना॒निभ्य॑श्चवो॒नमो॒
नम॑ᳵख्ष॒त्तृभ्य॑स्सङ्ग्रही॒तृभ्य॑श्चवो॒नमो॒नम॒स्तख्ष॑भ्योरथका॒रेभ्य॑श्च
वो॒नमो॒नम॒ᳵक्कुला॑लेभ्यᳵक्क॒र्म्मारे᳚भ्यश्चवो॒नमो॒नम॑ᳶप्पु॒ञ्जिष्टे᳚भ्यो-
नि॒षादे᳚भ्यश्चवो॒नमो॒नम॑ऽइषु॒कृद्भ्यो॑धन्व॒कृद्भ्य॑श्चवो॒नमो॒
नमो॑मृग॒युभ्य॑श्श्व॒निभ्य॑श्चवो॒नमो॒नम॒श्श्वभ्य॒श्श्वप॑तिभ्यश्च
(२)वो॒नम॑ः ॥ ४ ॥

इति चतुर्थोऽनुवाकः

—०—

नमो॑भ॒वाय॑चरु॒द्राय॑च॒नम॑श्श॒र्वाय॑चपशु॒पत॑येच॒नमो॒नील॑ग्रीवा-
यचशिति॒कण्ठा॑यच॒नम॑ᳵक्कप॒र्द्दिने॑च॒व्यु॑प्तकेशायच॒नम॑स्स-
हस्रा॒ख्षाय॑चश॒तध॑न्वनेच॒नमो॑गिरि॒शाय॑चशिपिवि॒ष्टाय॑च

नमो॑मी॒ढुष्ट॑माय॒चेषु॑मते॒चनमो᳚ह्र॒स्वाय॑चवाम॒नाय॑च॒नमो॑बृह॒तेच॒
वर्षी॑यसे॒चनमो॑वृ॒द्धाय॑चसँ॒वृध्व॑ने॒च(१)नमो॒ऽअग्रि॑यायच-
प्रथ॒माय॑च॒नम॑ऽआ॒शवे॑चाजि॒राय॑च॒नम॒श्शीघ्रि॑यायच॒शीभ्या॑य-
च॒नम॑ऽऊ॒र्म्म्या॑यचावस्व॒न्या॑यच॒नम॑स्स्रोत॒स्या॑यच॒द्वीप्या॑यच
॥ ५ ॥

इति पञ्चमोऽनुवाकः

—०—

नमो᳚ज्ये॒ष्ठाय॑चकनि॒ष्ठाय॑च॒नम॑ᳶप्पूर्व॒जाय॑चापर॒जाय॑च॒नमो॑मद्ध्य॒-
माय॑चापग॒ल्भाय॑च॒नमो॑जघ॒न्या॑यच॒बुध्नि॑यायच॒नम॑स्सो॒भ्या॑य
चप्रतिस॒र्य्या॑यच॒नमो॒याम्या॑यच॒ख्षेम्या॑यच॒नम॑ऽउर्व॒र्य्या॑यच॒-
खल्या॑यच॒नम॒श्श्लोक्या॑यचावसा॒न्या॑यच॒नमो॒वन्या॑यच॒क-
ख्ष्या॑यच॒नम॑श्श्र॒वाय॑चप्रतिश्र॒वाय॑च(१)नम॑ऽआ॒शुषे॑णाय
चा॒शुर॑थायच॒नम॒श्शूरा॑यचावभिन्द॒तेच॒नमो॑व॒र्म्मिणे॑च
वरू॒थिने॑च॒नमो॑बि॒ल्मिने॑चकव॒चिने॑च॒नम॑श्श्रु॒ताय॑चश्रुत-
से॒नाय॑च ॥ ६ ॥

इति षष्ठोऽनुवाकः

—०—

नमो॑दुन्दु॒भ्या॑यचाहन॒न्या॑यच॒नमो॑धृ॒ष्णवे॑चप्रमृ॒शाय॑च॒
नमो॑दू॒ताय॑च॒प्रहि॑तायच॒नमो॑निष॒ङ्गिणे॑चेषुधि॒मते॑च॒नम॑स्ती॒-
ख्ष्णेष॑वेचायु॒धिने॑च॒नम॑स्स्वायु॒धाय॑चसु॒धन्व॑नेच॒नम॒स्स्रु-
त्या॑यच॒पथ्या॑यच॒नम॑ᳵक्का॒ट्या॑यचनी॒प्या॑यच॒नम॒स्सूद्या॑यच

सरस्यायचनमोनाद्यायचवैशन्तायच(१)नमᳵक्कूप्यायचावट्याय
चनमोवर्ष्यायचावर्ष्यायचनमोमेघ्यायचविद्युत्यायचनमऽ-
ईध्रियायचातप्यायचनमोवात्यायचरेष्मियायचनमोवास्तव्याय
चवास्तुपायच ॥ ७ ॥

इति सप्तमोऽनुवाकः

—०—

नमस्सोमायचरुद्रायचनमस्ताम्रायचारुणायचनमश्शङ्गाय
चपशुपतयेचनमऽउग्रायचभीमायचनमोऽअग्रेवधायचदूरे-
वधायचनमोहन्त्रेचहनीयसेचनमोवृक्षेभ्योहरिकेशेभ्यो
नमस्तारायनमश्शम्भवेचमयोभवेचनमश्शङ्करायचमय
स्करायचनमश्शिवायचशिवतरायच(१)नमस्तीर्त्थ्यायच-
कूल्यायचनमᳶप्पार्य्यायचावार्य्यायचनमᳶप्रतरणायचोत्त-
रणायचनमऽआतार्य्यायचालाद्यायचनमश्शष्प्यायचफेन्या
यचनमस्सिकत्यायचप्रवाह्यायच ॥ ८ ॥

इत्यष्टमोऽनुवाकः

—०—

नमऽइरिण्यायचप्रपथ्यायचनमᳵक्किꣳशिलायचक्षयणायच
नमᳵक्कपर्दिनेचपुलस्तयेचनमोगोष्ठ्यायचगृह्यायचनम-
स्तल्प्यायचगेह्यायचनमᳵक्काट्यायचगह्वरेष्ठायचनमोह्रदय्याय-
चनिवेष्प्यायचनमᳶप्पाꣳसव्यायचरजस्यायचनमश्शुष्क्यायच-
हरित्यायचनमोलोप्यायचोलप्यायच(१)नमऽऊर्व्यायच

सूर्म्म्यायचनमᳶप्पर्ण्ण्यायचपर्ण्णशद्यायचनमोपगुरमाणायचा-
भिघ्नतेचनमऽआक्खिदतेचप्रक्खिदतेचनमोवᳵक्किरिकेभ्यो
देवानाꣳहृदयेभ्योनमोविक्षीणकेभ्यो✻नमोविचिन्वत्केभ्यो✻
नमऽआनिर्हतेभ्यो✻नमऽआमीवत्केभ्यः✻ ॥ ९ ॥

इति नवमोऽनुवाकः

—०—

द्रापेऽअन्धसस्पतेदरिद्रन्नीललोहित ।
एषाम्पुरुषाणामेषाम्पशूनाम्माभेर्म्मारोमोऽएषाङ्किञ्चनाममत्
॥ १ ॥

यातेरुद्रशिवातनूश्शिवाविश्वाहभेषजी ।
शिवारुद्रस्यभेषजीतयानोमृडजीवसे ॥ २ ॥

इमाꣳरुद्रायतवसेकपर्द्दिनेक्षयद्वीरायप्रभरामहेमतिम् ।
यथानश्शमसद्द्विपदेचतुष्पदेविश्वम्पुष्टङ्ग्रामेऽअस्मि(१)न्ननातुरम्
॥ ३ ॥

मृडानोरुद्रोतनोमयस्कृधिक्षयद्वीरायनमसाविधेमते ।
यच्छश्चयोश्चमनुरायजेपितातदश्यामतवरुद्रप्रणीतौ ॥ ४ ॥

मानोमहान्तमुतमानोऽअर्भकम्मानऽउक्षन्तमुतमानऽउक्षितम् ।
मानोवधीःपितरम्मोतमातरम्प्रियामानस्तनुवो(२)रुद्ररीरिषः ॥
॥ ५ ॥

मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः ।
वीरान्मानोरुद्रभामितोवधीर्हविष्मन्तोनमसाविधेमते ॥ ६ ॥

आरात्तेगोघ्नऽउतपूरुषघ्नेख्षयद्वीरायसुम्नमस्मेतेऽअस्तु ।
रख्षाचनोऽअधिचदेवब्रूह्यधाचनश्शर्म्मयच्छद्विबर्हाः ॥ ७ ॥

स्तुहि(३)श्रुतङ्गर्त्तसदँय्युवानम्मृगन्नभीममुपहत्नुमुग्रम् ।
मृडाजरित्रेरुद्रस्तवानोऽअन्यन्तेऽअस्मन्निवपन्तुसेनाः ॥ ८ ॥

परिणोरुद्रस्यहेतिर्वृणक्तुपरित्वेषस्यदुर्म्मतिरघायोः ।
अवस्थिरामघवद्भ्यस्तनुष्वमीढ्वस्तोकायतनयायमृडय ॥ ९ ॥

मीढुष्टमशिवतमशिवोनस्सुमनाभव ।
परमेवृख्षऽआयुधन्निधायकृत्तिँव्वसानऽआचर
पिनाक(४)म्बिभ्रदागहि ॥ १० ॥

विकिरिदविलोहितनमस्तेऽअस्तुभगवः ।
यास्तेसहस्रꣳहेतयोन्यमस्मन्निवपन्तुताः ॥ ११ ॥

सहस्राणिसहस्रधाबाहुवोस्तवहेतयः ।
तासामीशानोभगवःपराचीनामुखाकृधि ॥ १२ ॥

इति दशमोऽनुवाकः

—०—

सहस्राणिसहस्रशोयेरुद्राऽअधिभूम्याम् ।
तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥ १ ॥

अस्मिन्महत्यर्ण्णवेन्तरिख्षेभवाऽअधि* ॥ २ ॥

नीलग्रीवाश्शितिकण्ठाश्शर्वाऽअधᳵख्षमाचराः* ॥ ३ ॥

नीलग्रीवाश्शितिकण्ठादिवꣳरुद्राऽउपश्रिताः* ॥ ४ ॥

येवृख्षेषुसस्पिञ्जरानीलग्रीवाविलोहिताः* ॥ ५ ॥

येभूतानामधिपतयोविशिखासᳵकपर्दिनः* ॥ ६ ॥

येऽअन्नेषुविविद्ध्यन्तिपात्रेषुपिबतोजनान्* ॥ ७ ॥

येपथाम्पथिरख्षयऽऐलबृदायव्युधः* ॥ ८ ॥

येतीर्थानि(१)प्रचरन्तिसृकावन्तोनिषङ्गिणः* ॥ ९ ॥

यऽएतावन्तश्चभूयाꣳसश्चदिशोरुद्रावितस्थिरे ।
तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥ १० ॥

नमोरुद्रेभ्योयेपृथिव्यां* येन्तरिख्षे* येदिवि* येषामन्नं*
वातो*वर्षमिषवस्तेभ्योदशप्राचीर्दशदख्षिणादशप्रती-
चीर्दशोदीचीर्दशोर्ध्वास्तेभ्योनमस्तेनोमृडयन्तुतेयन्द्वि-
ष्मोयश्च(२)नोद्वेष्टितँव्वोजम्भेदधामि ॥ ११–१३ ॥
हरिः ओ३म् ॥ ११ ॥

इत्येकादशोऽनुवाकः

—०—

इति तैत्तिरीयसंहितायां चतुर्थकाण्डे पञ्चमो
रुद्रप्रपाठकः (रुद्रप्रश्नः) समाप्तः

—०—

शतरुद्रियम्

(काण्वसंहितापाठानुसारि)

ह॒रि॒ः ओ३म्

नम॑स्ते रुद्र म॒न्यव॑ उ॒तो त॒ इष॑वे॒ नम॑ः ।
बा॒हुभ्या॑मु॒त ते॒ नम॑ः ॥ १ ॥ १

या ते॑ रुद्र शि॒वा त॒नूरघो॒राऽपा॑पकाशिनी ।
तया॑ नस्त॒न्वा॒ शन्त॑मया॒ गिरि॑शन्ता॒भिचा॑कशीहि ॥ २ ॥ २

ओ३म् ॥ वाजिवक्त्रं नमस्कृत्य व्याख्यास्ये शतरुद्रियम् ।
याज्ञवल्क्यतपस्तुष्टहरिणा सम्प्रकीर्तितम् ॥

व्याख्यातं शतरुद्रियं तैत्तिरीयम् । अथ काण्वं किञ्चिदिव व्याख्यास्यामः, यत्रार्थभेदः । काण्वे शतरुद्रियेऽष्टावनुवाकाः । अष्टमूर्तेः शिवस्य प्रीणनार्थाः । आद्योऽनुवाकः षोळशमन्त्रः । चरमोऽष्टादशमन्त्रः । षोळशकलो हि पुरुषः । सप्तदशी चित्प्रकृतिः । अष्टादशः परमपुरुषो नारायणः । मध्यमाः षळनुवाकाः पञ्चमन्त्राः । पञ्चात्मानौ हि नारायणप्राणौ । पञ्चमुखः शिवः ॥

काण्वसंहितायां चत्वारिंशदध्यायाः । चत्वारिंशश्चरमोऽध्यायोऽप्यष्टादशमन्त्रः, याज्ञीयमन्त्रो नामेशावास्योपनिषत् । यज्ञनारायणस्तुतिः । पञ्चत्रिंशेऽध्याये षोळशमन्त्रः प्रथमोऽनुवाकः पुरुषसूक्तं नाम पुरुषोत्तमस्य नारायणस्य स्तुतिः । समग्रः सप्तदशोऽध्यायः चतुःषष्टिमन्त्रः शतरुद्रियं नाम रुद्रनारायणस्तुतिः ॥ समग्रस्य वाजसनेयस्य सूर्यनारायण ऋषिः । तदुक्तम्–'वाजिरूपेण सूर्येण प्रोक्तं वाजसनेयकम्' इति । अथ ब्रह्मा च गरुडश्च । ततः सूर्यः । तदनु याज्ञवल्क्यः । ततः काण्वशाखायाः कण्वऋषिः । सर्व एते शतरुद्रियाध्यायर्षयश्च । प्रथममन्त्रस्य गायत्री च्छन्दः ॥ १ ॥ पूर्वार्धेऽनुष्टुप् । उत्तरार्धे बृहती । संहत्य स्वराडनुष्टुबित्याहुः ॥ २ ॥

यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे ।
शिवां गिरित्र तां कुरु मा हिꣳसीः पुरुषं जगत् ॥ ३ ॥ ३

शिवेन वचसा त्वा गिरिशाच्छा वदामसि ।
यथा नः सर्वमिज्जगदयक्ष्मꣳसुमना असत् ॥ ४ ॥ ४

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहीꣳश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योऽधराचीः
परासुव ॥ ५ ॥ ५

असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः ।
ये चैनꣳ रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषाꣳ
हेळ ईमहे ॥ ६ ॥ ६

पूर्वार्धं उष्णिक्। उत्तरार्धेऽनुष्टुप्। तेन विराडनुष्टुप् ॥ ३ ॥ केवलाऽनुष्टुप् ॥ ४ ॥ या अधराचीः अधोगमनशीला यातुधान्यः, ताः सर्वा दुष्टशक्तीः परासुव दूरीकुरु । पञ्चपादाः पङ्क्तय इत उत्तरास्तिस्रः ॥ ५ ॥ एनं मण्डलाधिष्ठानमादित्यम् । एषां रश्मिगतानां भगवद्रूपाणामवहेळः भुवं प्रत्यवतरणमीमहे मन्त्रवचनैः स्तुत्याऽभिनन्दामः । काण्वा अपि बह्वृचा इवाज्-मध्यस्थौ डढौ ळळ्हौ इति पठन्ति । तैत्तिरीया माध्यन्दिनाश्च डढावित्येव । तथाहि वाजसनेयप्रातिशाख्ये कात्यायनः–**'डढौ ळळ्हावेकेषाम्'** (४.१४६) इति । एकेषामिति काण्वानामित्यर्थः । केचित् 'ळळ्हौ' इति पठन्ति । ळढावेकाक्षरतामापन्नौ, असंयुक्ताविवोच्चारणीयाविति तु वास्तवम् । संयुक्तत्वे 'दृळ्हच्युतः' इत्यत्र 'दृ' इत्यस्य गुरुत्वमापद्येत । लिपिर्यथाकथाच भवति । उच्चारणं तु गुरुमुखादवगन्तव्यम् ॥ ६ ॥

असौ योऽवसर्प्पति नीलग्रीवो विलोहितः ।
उतैनं गोपा अदृशन्नदृशन्नुदहार्य्यः स दृष्टो मृळयाति नः ॥ ७ ॥ ७

नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीळ्हुषे ।
अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः ॥ ८ ॥ ८

प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् ।
याश्च ते हस्त इषवः परा ता भगवो वप ॥ ९ ॥ ९

विज्यं धनुः कपर्दिनो विशल्यो बाणवाँ३ उत ।
अनेशन्नस्य या इषव आभुरस्य निषङ्गधिः ॥ १० ॥ १०

परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः ।
अथो य इषुधिस्तवारे अस्मन्निधेहि तम् ॥ ११ ॥ ११

या ते हेतिर्म्मीळ्हुष्टम हस्ते बभूव ते धनुः ।
तयाऽस्मान्विश्वतस्त्वमयक्ष्मया परिभुज ॥ १२ ॥ १२

अवतत्य धनुष्ट्वꣳ सहस्राक्ष शतेषुधे ।
निशीर्य्य शल्यानां मुखा शिवो नः सुमना भव ॥ १३ ॥ १३

दृशेर्लुङि अदर्शन्निति रूपम् । गुणाभावे अदृशन्, पश्यन्तीत्येतत् ॥ ७ ॥ इतः सप्तानुष्टुभः । **'मीळ्हुषे'** इति ढस्याऽदेश इत्युक्तम् ॥ ८–९ ॥ **'बाणवाँ३ उत'** इति त्रिमात्रमनुस्वारं पठन्ति काण्वाः । द्विमात्रं माध्यन्दिनाः–**'बाणवां२ उत'** इति । निषङ्गथिरेव निषङ्गधिः । तृतीयोऽतिशये । **'अधा ते–'** इति यथा । भुरिगनुष्टुप् ॥ १०–१२ ॥ धनुष्ट्वम् । **'षात् तथौ मूर्धन्यम्'** (वा.प्रा.३–७९) इति तस्य टः ॥ १३ ॥

नमस्त आयुधायानातताय धृष्णवे ।
उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ॥ १४ ॥ १४

मा नो महान्तमुत मा नो अर्भकं
मा न उक्षन्तमुत मा न उक्षितम् ।
मा नो वधीः पितरं मोत मातरं
मा नः प्रियास्तन्वो रुद्र रीरिषः ॥ १५ ॥ १५

मा नस्तोके तनये मा न आयुषि
मा नो गोषु मा नो अश्वेषु रीरिषः ।
मा नो वीरान् रुद्र भामिनो वधी-
र्हविष्मन्तः सदमित्त्वा हवामहे ॥ १६ ॥ १६

इति प्रथमोऽनुवाकः

—०—

नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमः । नमः शष्पिञ्जराय त्विषीमते पथीनां पतये नमो नमो हरिकेशायोपवीतिने पुष्टानां पतये नमः ॥
॥ १ ॥ १७

'**नमस्त आयुधाय–**' इति निचृदनुष्टुप् ॥ १४ ॥ इतो द्वे जगत्यौ । षोळशी निचृज्जगती । भामिनः क्रोधयुक्तानपि । अजितकामक्रोधादिकानपि करुणया मा वधीः ॥ १५–१६ ॥ शष्पिञ्जरः । आनन्दरूपः प्रणेता भगवान् शषः । 'षकारः प्राण आत्मा' इति श्रुतेः । स यस्य हृदयपञ्जरे । शषपञ्जर एव शष्पिञ्जरः प्राणश्च शङ्करश्च । तयोः हृदयपञ्जरे प्रेरयन् शेते इति शष्पिञ्जरो नारायणः ॥ १७ ॥

नमो बभ्रुशायाऽव्याधिनेऽन्नानां पतये नमो नमो भवस्य हेत्यै जगतां पतये नमः । नमो रुद्रायाऽततायिने क्षेत्राणां पतये नमो नमः सूतायाहन्त्यै वनानां पतये नमः ॥ २ ॥ १८

नमो रोहिताय स्थपतये वृक्षाणां पतये नमो नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमः । नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो नम उच्चैर्घोषायाऽक्रन्दयते पत्तीनां पतये नमः
॥ ३ ॥ १९

नमः कृत्स्नायताय धावते सत्वनां पतये नमो नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमः । नमः ककुभाय निषङ्गिणे स्तेनानां पतये नमो नमो निचेरवे परिचरायारण्यानां पतये नमः ॥ ४ ॥ २०

नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमः । नमः सृकायिभ्यो जिघांऽसद्भ्यो मुष्णतां पतये नमो नमोऽसिमद्भ्यो नक्त-ञ्चरद्भ्यो विकृन्तानां पतये नमः ॥ ५ ॥ २१

इति द्वितीयोऽनुवाकः

—०—

बभ्रावग्नौ शेत इति बभ्रुशः नारायणः प्राणः शिवश्च । आविध्यतीत्याव्याधी । आततं जगदयतेऽन्तर्नियन्तुमित्याततायी । बहिराततश्चान्तरयते च । आततायिषु स्थित्वा तैः पापं कर्म कारयति । आततेन करतळेनायत इत्यात-तायी हनुमान् । आततेन धनुषा भीमः । आततेन तत्ववादेन मध्वः । आततेन धनुषा पार्थमेतीत्याततायी किरातरूपः शिवः । न हन्तीत्यहन्तिः, तस्यै । स्त्रीरूपाय हरये नमः । अर्धनारीनरात्मकत्वात् प्राणशिवावपि ॥ १८–१९ ॥ कृत्स्ने जगत्यायतो विततः । कृत्स्नमायतमधीनं यस्य ॥ २० ॥ सृकं वायुमेतीति

नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो नम इषुमद्भ्यो धन्वायिभ्यश्च वो नमः । नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो नम आयच्छद्भ्योऽस्यद्भ्यश्च वो नमः ॥ १ ॥ २२

नमो विसृजद्भ्यो विद्ध्यद्भ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमः । नमः शयानेभ्य आसीनेभ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमः ॥ २ ॥ २३

नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो नमः । नम आव्याधिनीभ्यो विविद्ध्यन्तीभ्यश्च वो नमो नम उगणाभ्यस्तृꣳहतीभ्यश्च वो नमः ॥ ३ ॥ २४

नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमः । नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यो विश्वरूपेभ्यश्च वो नमः ॥ ४ ॥ २५

नम सेनाभ्यः सेनानिभ्यश्च वो नमो नमो रथिभ्यो अरथेभ्यश्च वो नमः । नमः क्षतृभ्यः सङ्गृहीतृभ्यश्च वो नमो नमो महद्भ्यो अर्भकेभ्यश्च वो नमः ॥ ५ ॥ २६

इति तृतीयोऽनुवाकः

—०—

सृकायी नारायणः । सृकेनाऽयुधेन सह याति शत्रुहननार्थम् । सृकेन वज्रायुधेन सह एतीति सृकायी इन्द्रः । नियन्तुं तद्वतः सृकायी । विविधं कर्तनात् सतां पापस्य असतां पुण्यस्य च निकृन्ता देवाः ॥ २१ ॥ धन्वना धनुषा सह यन्तीति धन्वायिनः ॥ २२–२५ ॥ रथिभ्यो अरथेभ्यश्च । 'रथिभ्यः' इत्यतः परोऽकारो

नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्म्मारेभ्यश्च वो नमः । नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमो नमः श्वनिभ्यो मृगयुभ्यश्च वो नमः ॥१ ॥ २७

नम श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च । नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च ॥ ॥ २ ॥ २८

नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च । नमो गिरिशयाय च शिपिविष्टाय च नमो मीळ्हुष्टमाय चेषुमते च ॥ ३ ॥ २९

न लुप्यते वाजसनेयिनाम् । तथाहि कात्यायनः– **'हेडः-आपः-गुवः-अपाग्ने-धीरासः-देवासः-उरः-रक्षाणः-मो-वैश्वानरः-वृषभः-वचः-प्राणः-उदानः-अङ्गे-इमा-मे-वृष्णः-दशमास्यः-अन्धः-आवित्तः-अरिष्टो-अर्जुनः-प्रत्याश्रावः-स्विष्टः-घासे-प्रणीतः-तेभ्यो नमो अस्तु-दूरे-नो अद्य-यज्ञे-सधस्थे-सो अध्वराय-इन्द्रे-हिरण्यपर्णः-द्वारः-देवः-अब्दः-रथिभ्यः-महद्भ्यः-संसदः'** (वा.प्रा.४.८५) इति । हेडो हेळो भवति काण्वानाम् । एतानि चत्वारिंशत् पदानि प्रकृत्या स्युरित्यर्थः । एतेनैव **'महद्भ्यो अर्भकेभ्यः'** इति च व्याख्यातम् । क्षपयन्तीति क्षपयितार एव क्षतारः, मध्याक्षरलोपेन क्षयात् तरन्त्येभिरिति वा क्षतारो नारायणप्राणशिवाः । सङ्गृहीतृभ्यः इति पाठे ग्रहीतैव गृहीता । स यथा–**'आशिष्ठो दृढिष्ठः** । यथा वा **'विष्णु सृजिष्णु ग्रसिष्णु विवन्दे'** ॥ २६ ॥ पुञ्जिनः पुञ्जीभूय वर्तमाना गणदेवता वसवो विश्वे रुद्रा आदित्या मरुत इति । तेष्वयं तिष्ठति बहुरूपः । 'पुञ्जिष्टेभ्यः' इत्येव क्वचित् । गणदेवानां पुञ्ज इष्ट एषामिति ॥ २७–२९ ॥

नमो॑ ह्र॒स्वाय॑ च वाम॒नाय॑ च॒ नमो॑ बृह॒ते च॒ वर्षी॑यसे च । नमो॑
वृ॒द्धाय॑ च स॒वृधे॑ च॒ नमोऽग्र्या॑य च प्रथ॒माय॑ च ॥४ ॥ ३०

नम॑ आ॒शवे॑ चाजि॒राय॑ च॒ नम॒ः शीघ्र्या॑य च॒ शीभ्या॑य च ।
नम॒ ऊर्म्म्या॑य चावस्व॒न्या॑य च॒ नमो॑ नादे॒याय॑ च॒ द्वीप्या॑य च ॥ ३१
॥ ५ ॥

इति चतुर्थोऽनुवाकः

—०—

नमो॑ ज्ये॒ष्ठाय॑ च कनि॒ष्ठाय॑ च॒ नम॑ः पूर्व॒जाय॑ चापर॒जाय॑ च॒ ।
नमो॑ मद्ध्य॒माय॑ चापग॒ल्भाय॑ च॒ नमो॑ जघ॒न्या॑य च बुध्न्या॑य च ॥
॥ १ ॥ ३२

नम॒ः सोभ्या॑य च प्रतिस॒र्य्या॒य च॒ नमो॒ याम्या॑य च॒ क्षेम्या॑य च ।
नम॒ः श्लोक्या॑य चावसा॒न्या॑य च॒ नम॑ उर्व॒र्य्या॑य च॒ खल्या॑य च ॥
॥ २ ॥ ३३

नमो॒ वन्या॑य च॒ कक्ष्या॑य च॒ नम॑ः श्र॒वाय॑ च प्रतिश्र॒वाय॑ च । नम॑
आ॒शुषे॑णाय चा॒ऽशुर॑थाय च॒ नम॒ः शूरा॑य चावभे॒दिने॑ च ॥
॥ ३ ॥ ३४

वर्धन्त इति वृधो वर्धमानाः । तेषु सन्निहिताय । अग्रे भवोऽग्र्यः । अग्राद् यत् । **‘आत्मा वा इदमग्र आसीत्’** इत्यादेः ॥ ३० ॥ शीघ्राद् यत् । शीघ्र्यः । नद्यां भवा नादेया जलचराः । स्त्रीभ्यो ढक् । तेषु सन्निहितः । स्वयं च नद्यां यमुनायाम्, तत्रापि द्वीपे भवो द्वैपायनः ॥ ३१ ॥ बुध्नाद् यत् । बुध्न्यः ॥ ३२–३३ ॥ अवमान् तामसान् भेत्तुं शीलमस्येत्यवभेदी ॥ ३४–३६ ॥

नमो॑ बि॒ल्मिने॑ च कव॒चिने॑ च॒ नमो॑ व॒र्म्मिणे॑ च वरू॒थिने॑ च ।
नम॑ः श्रु॒ताय॑ च श्रुतसे॒नाय॑ च॒ नमो॑ दुन्दु॒भ्या॑य चाहन॒न्या॑य च ॥
॥ ४ ॥ ३५

नमो॑ धृ॒ष्णवे॑ च प्रमृ॒शाय॑ च॒ नमो॑ निष॒ङ्गिणे॑ चेषुधि॒मते॑ च ।
नम॑स्ती॒क्ष्णेष॑वे चाऽयु॒धिने॑ च॒ नम॑ः स्वायु॒धाय॑ च सु॒धन्व॑ने च ॥
॥ ५ ॥ ३६

इति पञ्चमोऽनुवाकः

—०—

नम॒ः स्रुत्या॑य च॒ पथ्या॑य च॒ नम॒ः काट्या॑य च॒ नीप्या॑य च ।
नम॒ः कुल्या॑य च सर॒स्या॑य च॒ नमो॑ नादे॒याय॑ च वैश॒न्ताय॑ च ॥
॥ १ ॥ ३७

नम॒ः कूप्या॑य चाव॒ट्या॑य च॒ नम॒ ईध्र्या॑य चाऽत॒प्या॑य च ।
नमो॒ मेघ्या॑य च वि॒द्युत्या॑य च॒ नमो॒ वर्ष्या॒य चाव॒र्ष्या॑य च ॥
॥ २ ॥ ३८

नमो॒ वात्या॑य च॒ रेष्म्या॑य च॒ नमो॑ वास्त॒व्या॑य च वास्तु॒पाय॑ च ।
नम॒ः सोमा॑य च रु॒द्राय॑ च॒ नम॑स्ता॒म्राय॑ चारु॒णाय॑ च ॥ ३ ॥ ३९

नम॑ः श॒ङ्गवे॑ च पशु॒पत॑ये च॒ नम॑ उ॒ग्राय॑ च भी॒माय॑ च ।
नमो॑ऽग्रेव॒धाय॑ च॒ दूरेव॒धाय॑ च नमो॑ ह॒न्त्रे च॒ हनी॑यसे च ॥
॥ ४ ॥ ४०

कुल्यायां भवः कुल्यः । रघुकुलादिषु भवः कुल्यः । कुलीनेषु भवः कुल्यः । नादेयं नदीजलं तत्र भवाय । अर्थान्तरानुसन्धानाय पुनर्वचनम् । एवमन्यत्रापि ॥ ३७ ॥ वीध्रेषु निर्मलेषु भवः ॥ ३८ ॥ रिष्यन्ते भूतान्येभिरिति रेष्माणि रक्षांसि । तत्रगताय नमः । **‘बाध्यबाधकतां गतः’** इति हि स्मरन्ति । रेष्माणां

नमो॑ वृ॒क्षेभ्यो॒ हरि॑केशेभ्यो॒ नम॑स्ता॒राय॑ । नम॑ः शम्भ॒वे॑ च मयो॒भवे॑
च॒ नम॑ः शङ्क॒राय॑ च मयस्क॒राय॑ च॒ नम॑ः शि॒वाय॑ च शि॒वत॑राय च ॥
॥ ५ ॥ ४१

इति षष्ठोऽनुवाकः

—०—

नम॒ः पार्य्या॑य चावा॒र्य्या॑य च॒ नम॑ः प्र॒तर॑णाय चो॒त्तर॑णाय च ।
नम॒स्तीर्थ्या॑य च॒ कूल्या॑य च॒ नम॒ शष्प्या॑य च॒ फेन्या॑य च ॥
॥ १ ॥ ४२

नम॑ः सिक॒त्या॑य च प्रवा॒ह्या॑य च॒ नम॑ः किꣳशि॒लाय॑ च क्षय॒णाय॑ च ।
नम॑ः कप॒र्द्दिने॑ च पुल॒स्तिने॑ च॒ नम॑ इरि॒ण्या॑य च प्रप॒थ्या॑य च ॥
॥ २ ॥ ४३

नमो॒ व्रज्या॑य च॒ गोष्ठ्या॑य च॒ नम॒स्तल्प्या॑य च॒ गेह्या॑य च ।
नमो॑ हृद्या॑य च निवे॒ष्प्या॑य च॒ नम॑ः काट्या॑य च गह्वरे॒ष्ठाय॑ च ॥
॥ ३ ॥ ४४

नम॑ः शुष्क्या॑य च हरि॒त्या॑य च॒ नम॑ः पाꣳस॒व्या॑य च रज॒स्या॑य च ।
नमो॒ लोप्या॑य चोल॒प्या॑य च॒ नम॑ ऊ॒र्व्या॑य च॒ सूर्व्या॑य च ॥
॥ ४ ॥ ४५

चायं प्रियस्तमोमानित्वादिति शिवः ॥ ३९ ॥ शं सुखप्रदा गावो वेदा यस्य प्रतिपादकाः ॥ ४०–४१ ॥ पुलस्तिने । पुरः शरीराणि अस्ता यत्र तत् पुरस्तं श्मशानम् । तदस्य वासस्थानमिति पुरस्ती शिवः । स एव पुलस्ती ॥ ४३ ॥ व्रज्याय । व्रजे गोष्ठे भवाय गोपालाय । हृद्याय हृदयप्रियाय ॥ ४४–४५ ॥

नम॑ः प॒र्ण्णाय॑ च पर्ण्णश॒दाय॑ च॒ नम॑ उद्गु॒रमा॑णाय चाभिघ्न॒ते च॑ ।
नम॑ आखिद॒ते च॑ प्रखिद॒ते च॒ नम॑ इषु॒कृद्भ्यो॑ धनु॒ष्कृद्भ्य॑श्च वो॒
नम॑ः । नमो॑ वः किरि॒केभ्यो॑ दे॒वाना॒ꣳ हृद॑येभ्यो॒ नमो॑ विचिन्व॒-
त्केभ्यो॒ नमो॑ विक्षिण॒त्केभ्यो॒ नम॑ आनिर्हृ॒तेभ्य॑ः ॥ ५ ॥ ४६

इति सप्तमोऽनुवाकः

—०—

द्रापे॒ अन्ध॑सस्पते॒ दरि॑द्र॒ नील॑लोहित ।
आ॒सां प्र॒जाना॑मे॒षां प॑शू॒नां मा भे॒र्मो रो॒ङ्गो च॑ नः॒ किश्च॒नाम॑मत् ॥
॥ १ ॥ ४७

पर्णशदाय । वृक्षाणां पर्णयोजनेन सुषमाधायकः स एव शुष्काणां पर्णानां वृक्षात् पातयिता च । शद्लृ शातने । उद्गुरमाणाय उद्यतायुधाय । इषुभिः धनुषा चासुरान् कृन्तन्तीति इषुकृतश्च धनुष्कृतश्च । विक्षिण्वन्ति पापिन इति, विक्षिण्वन्ति पापिनां कं सुखम्, कानि शिरांसीति वा विक्षिणत्काः ॥ ४६ ॥ दरिद्रदेव दरिद्रः । यद्यप्यत्र **'द्रापे॑-दरि॑द्र'** इत्यामन्त्रितस्य पादादित्वादाद्युदात्तत्वं युक्तम् । कथम्–**'अन्ध॑सः प॒ते॒'** इति? **'नील॑लोहित'** इति? विशेषवचनात् । तथाहि कात्यायनः–**'अन्धो वीर्ये'** (वा.प्रा.२.३४) इति । वीर्यवचनः अन्धःशब्दः आद्युदात्तः स्यादित्यर्थः । अत्र च अन्धस इति वीर्यहेत्वन्नवाची । अथच सूत्रान्तरम्–**'सुमङ्गल सत्यराजन्, विकिरिद्र विलोहित, दरिद्र नीललोहित, श्रेयस्कर भूयस्कर, अम्बेऽम्बिकेऽम्बालिके, शरण्ये ब्रह्मसंशिते, मरुतो अश्विना, यव्ये गव्ये, द्यावापृथिवी उरो, अग्ना३इ पत्नीवन्, लाजी३न् शाची२न् , मीढुष्टम शिवतम, सहस्राक्ष शतेषुधे, वसुपते वसुदावन्'** (२.२०) इति । एतेष्वामन्त्रितत्वेन प्राप्तो निघातो न भवति । प्रत्युत आद्युदात्ततैव भवतीत्यर्थः । एतेन **'सह॑स्राक्ष शते॑षुधे**(१३) इति पूर्वमन्त्रोऽपि व्याख्यातः । **'मीळ्हु॑ष्टम॒ शिवत॑म॒'** (५१) **'विकि॑रिद्र**

इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः ।
यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥
॥ २ ॥ ४८

या ते रुद्र शिवा तनूः शिवा विश्वाहा भेषजी ।
शिव रुतस्य भेषजी तया नो मृळ जीवसे ॥ ३ ॥ ४९

परि णो हेती रुद्रस्य वृज्यात् परि त्वेषस्य दुर्म्मतिर्मही गात् ।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृळ ॥
॥ ४ ॥ ५०

विलोहित' (५२) इत्युत्तरमन्त्रोऽपि । आसां प्रजानां भगवत्प्रज्ञानाम् । एषां तत्साधनानां पशूनां वेदानां च मा भैषीः । भीषको मा भूः । मा रोक् मा रुजः । रुजो भङ्गे । भञ्जको मा भूः । मो आममत् । किमपि आमययुक्तं मा भूत् । प्रथमपादे सप्ताक्षराणि द्वितीयेऽष्टौ । तृतीये दश । तुरीये च द्वादश । तेनेयमुपरिष्टाद्बृहती ॥ ४७ ॥ मन्त्रेऽस्मिन् बह्वृचानां वाजसनेयिनां च समानः पाठः । इमां मतिमिति तैत्तिरीयाः । इमा मतीरिति काण्वाः । स्फुटं जगती ॥ ४८ ॥ 'या ते' अनुष्टुप् । विश्वं दुःखजातं हन्तीति, प्रळये च विश्वं जगद् हन्तीति विश्वहैव विश्वाहा । विश्वगत्वाद् वा विश्वाहा । हन हिंसागत्योः । तथाहि कात्यायनः–**'नर-हा-मित्रेषु च'** (३.१०२) इति । एषु परेषु विश्वशब्दो दीर्घमापद्यत इत्यर्थः । विस्मृततत्सूत्राविव, उवटमहीधरौ– 'विश्वानि च तान्यहानि विश्वाहा सर्वदा' इति व्याचक्षते । रुतस्य रोगस्य रोदनस्य वा भेषजी ॥ ४९ ॥ वृजियादिति व्यूहेन त्रिष्टुप् । **'परि ण इति शाकटायनः'** (वा.प्रा.३.८७) इति कात्यायनः । विकल्पेनायं भवति । **'परि णो हेतिः'** इति काण्वाः । **'परि नो रुद्रस्य'** इति माध्यन्दिनाः । परिवृज्यात्

मीळ्ढुष्टम शिवतम शिवो नः सुमना भव ।
परमे वृक्ष आयुधं निधाय कृत्तिं वसान आचर पिनाकं
बिभ्रदागहि ॥ ५ ॥ ५१

विकिरिद्र विलोहित नमस्ते अस्तु भगवः ।
यास्ते सहस्रꣳ हेतयोऽन्यमस्मन्निवपन्तु ताः ॥ ६ ॥ ५२

सहस्राणि सहस्रशो बाह्वोस्तव हेतयः ।
तासामीशानो भगवः पराचीना मुखा कृधि ॥ ७ ॥ ५३

असङ्ख्याता सहस्राणि ये रुद्रा अधि भूम्याम् ।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ८ ॥ ५४

अस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि ।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ९ ॥ ५५

नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्रा उपश्रिताः ।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ १० ॥ ५६

परिवर्जयतु । त्वेषस्य भगवद्द्वेषिणः मही महती प्रवृद्धा दुष्टा मतिः नः परित्यज्यान्यत्र गात् गच्छतु । तैत्तिरीयपाठेऽपि युक्तोऽयमर्थः ॥ ५० ॥ **'मीढुष्टम–'** यवमध्या त्रिष्टुप् ॥ ५१ ॥ **'विकिरिद्र–'** अनुष्टुप् । इत उत्तरा दश मन्त्राश्च आनुष्टुभाः । विकिरन् शरान् द्रावयत्यसुरानिति विकिरिद्रः । विचित्रेण किरिणा वराहरूपेणासुरेण निमित्तेन द्रवत्यर्जुनं योद्धुमिति विकिरिद्रः ॥ ५२ ॥ सहस्रशः सहस्राणि असङ्ख्यानि सहस्राणि ॥ ५३ ॥ असङ्ख्यातानि सहस्राणि ॥ ५४–५७ ॥

नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः ।
तेषा९ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ११ ॥ ५७

ये वृक्षेषु शष्पिञ्जरा नीलग्रीवा विलोहिताः ।
तेषा९सहस्रयोजनेऽव धन्वानि तन्मसि ॥ १२ ॥ ५८

ये भूतानामधिपतयो विशिखासः कपर्दिनः ।
तेषा९ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ १३ ॥ ५९

ये पथां पथिरक्षिण ऐलबृदा आयुर्युधः ।
तेषा९ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ १४ ॥ ६०

ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः ।
तेषा९ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ १५ ॥ ६१

येऽन्नेषु विविद्ध्यन्ति पात्रेषु पिबतो जनान् ।
तेषा९ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ १६ ॥ ६२

शष्पाः किसलयाः । तत्र लीनाः शष्पपञ्जरा एव शष्पिञ्जिराः । शष्पं बालतृणं तद्वत् पिञ्जरा हरिता वा ॥ ५८ ॥ ये भूतानामिति भुरिगनुष्टुप् ॥ ॥ ५९ ॥ पथिरक्षिणः ये पन्थानं रक्षन्ति । ऐलमन्नं बिभ्रतीति ऐलभृत एव परोक्षवृत्त्या ऐलवृदा इति व्याचक्षते । आयुषा निमित्तेन, केषाञ्चिदायुर्दातुं, केषाञ्चिद्धर्तुं युध्यन्त इत्यायुर्युधः ॥ ६० ॥ सृकाहस्ताः पाशहस्ताः ॥ ६१ ॥ तैत्तिरीयाः **'ये अन्नेषु'** इति पठन्ति । वाजसनेयिनः **'येऽन्नेषु'** इति । तथाहि स्मरति कात्यायनः–**'येऽन्नात्रयोः'** (वा.प्रा.४.६७) इति ॥ ६२ ॥

य एतावन्तश्च भूया९सश्च दिशो रुद्रा वितस्थिरे ।
तेषा९ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ १७ ॥ ६३

नमोऽस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः ।
तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः ।
तेभ्यो नमो अस्तु ते नो मृळयन्तु ते नोऽवन्तु ।
ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ।
नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वात इषवः ।
तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दर्दशोर्ध्वाः ।
तेभ्यो नमो अस्तु ते नो मृळयन्तु ते नोऽवन्तु ।
ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ।
नमोऽस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्नमिशवः ।
तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः ।
तेभ्यो नमो अस्तु ते नो मृळयन्तु ते नोऽवन्तु ।
ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥ १८ ॥ ६४

हरिः ओ३म्

इत्यष्टमोऽनुवाकः

—०—

नमस्ते षोळश ॥ १६ ॥ नमो हिरण्यबाहवे पञ्च ॥ ५ ॥ नम उष्णीषिणे पञ्च ॥ ५ ॥ नमस्तक्षभ्यः पञ्च ॥ ५ ॥ नमो ज्येष्ठाय पञ्च ॥ ५ ॥ नमः स्रुत्याय पञ्च ॥ ५ ॥ नमः पार्याय पञ्च ॥ ५ ॥ द्रापे अन्धसस्पतोऽष्टादश ॥ १८ ॥ अष्टानुवाकेषु चतुःषष्टिः ॥

इति शुक्लयजुःकाण्वसंहितायां सप्तदशोऽध्यायः ॥ १७ ॥

—०—


'य एतावन्तः' इति स्वराडनुष्टुप् ॥ ६३ ॥ दक्षिणाशब्द आद्युदात्त इति कात्यायनः–**'दक्षिणा च'** (वा.प्रा.२.२९) इति । तेन **'दक्षिणा'** इति

वक्तव्यम् । अथ दशशब्दपरस्त्वन्तोदात्तो भवतीति प्रतिप्रसवाद् 'दक्षिणा दश' इति साधुः । तथाहि कात्यायनः–**'न दश-विश्वकर्मा-निषद्य-इन्द्रस्य-पातु-सेदः-सह्येषु'** (वा.सं.२.३०) इति ॥ ६४ ॥

इदमाचार्यगोविन्दो विनेयजनवाञ्छया।
काण्वीयं शतरुद्रीयं व्याचख्यौ लेशतः सुधीः ॥

इत्याचार्यगोविन्दस्य कृतिषु काण्वीयशतरुद्रीयव्याख्यानम् ॥

—०—



शिवा विश्वहा भेषजी

शतरुद्रियम्

(माध्यन्दिनसंहितापाठानुसारि)

हरिः ओ३म् ॥ नम॑स्ते रुद्र म॒न्यव॑ उ॒तो त॒ इष॑वे॒ नम॑ः ।
बा॒हुभ्या॑मु॒त ते॒ नम॑ः ॥ १ ॥

या ते॑ रुद्र शि॒वा त॒नूरघो॒राऽपा॑पकाशिनी ।
तया॑ नस्त॒न्वा॒ शन्त॑मया॒ गिरि॑शन्ता॒भिचा॑कशीहि ॥ २ ॥

यामिषुं॑ गिरिशन्त॒ हस्ते॑ बिभ॒र्ष्यस्त॑वे ।
शि॒वां गि॑रित्र॒ तां कु॑रु॒ मा हि॑ꣳसीः॒ पुरु॑षं॒ जग॑त् ॥ ३ ॥

ओ३म् ॥ नत्वा नारायणं प्राणं रुद्रं च शशिशेखरम् ।
अथ माध्यन्दिनीयं च किञ्चिदेव विचिन्त्यते ॥

अथ माध्यन्दिनीयं शतरुद्रियं किञ्चिदिव व्याख्यास्यामः, यत्रार्थभेदः ।

काण्वसंहितायां सप्तदशोऽध्यायोऽस्मिन् सम्पाठे तु षोडशोऽध्यायः । अध्यायेऽस्मिन् षट्षष्टिः कण्डिकाः । आद्याः षोडश काण्डिकाः षोडशर्चः प्रथमोऽनुवाकः । ततः **'नमो हिरण्यबाहवे–'** इति सप्तदशीं कण्डिकामारभ्य, **'विकृन्तानां पतये नमः'** इत्यन्तः पञ्चकण्डिको द्वितीयोऽनुवाकः । ततः, पञ्च कण्डिकास्तृतीयोऽनुवाकः । ततः, पञ्च कण्डिकाश्चतुर्थोऽनुवाकः । ततः पञ्च कण्डिकाः पञ्चमोऽनुवाकः । ततश्चत्वारः कण्डिकाः षष्ठोऽनुवाकः । तत एका कण्डिका सप्तमोऽनुवाकः । ततः पञ्च कण्डिका अष्टमोऽनुवाकः । ततोऽवशिष्टा विंशतिः कण्डिका नवमोऽनुवाकः ॥ १–७ ॥

शिवेन वचसा त्वा गिरिशाच्छा वदामसि ।
यथा नः सर्वमिज्जगदयक्ष्मꣳसुमना असत् ॥ ४ ॥

अद्ध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहीꣳश्च सर्वान् जम्भयन् सर्वाश्च यातुधान्योऽधराचीः
परासुव ॥ ५ ॥

असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः ।
ये चैनꣳ रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषाꣳ
हेड ईमहे ॥ ६ ॥

असौ योऽवसर्प्पति नीलग्रीवो विलोहितः ।
उतैनं गोपा अदृश्रन्नदृश्रन्नुदहार्य्यः स दृष्टो मृडयाति नः ॥ ७ ॥

नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।
अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः ॥ ८ ॥

प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् ।
याश्च ते हस्त इषवः परा ता भगवो वप ॥ ९ ॥

विज्यं धनुः कपर्द्दिनो विशल्यो बाणवाँ२ उत ।
अनेशन्नस्य या इषव आभुरस्य निषङ्गधिः ॥ १० ॥

या ते हेतिर्म्मीढुष्टम हस्ते बभूव ते धनुः ।
तयाऽस्मान्विश्वतस्त्वमयक्ष्मया परिभुज ॥ ११ ॥

काण्वा बह्वृचा इव **'मीळ्हुषे'** इति पठन्ति । माध्यन्दिनास्तैत्तिरीया इव **'मीढुषे'** इति ॥ ८-१७ ॥

परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः ।
अथो य इषुधिस्तवाऽरे अस्मन्निधेहि तम् ॥ १२ ॥

अवतत्य धनुष्ट्वꣳ सहस्राक्ष शतेषुधे ।
निशीर्य्य शल्यानां मुखा शिवो नः सुमना भव ॥ १३ ॥

नमस्त आयुधायानातताय धृष्णवे ।
उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ॥ १४ ॥

मा नो महान्तमुत मा नो अर्भकं
मा न उक्षन्तमुत मा न उक्षितम् ।
मा नो वधीः पितरं मोत मातरं
मा नः प्रियास्तन्वो रुद्र रीरिषः ॥ १५ ॥

मा नस्तोके तनये मा न आयुषि
मा नो गोषु मा नो अश्वेषु रीरिषः ।
मा नो वीरान् रुद्र भामिनो वधी-
र्हविष्मन्तः सदमित्त्वा हवामहे ॥ १६ ॥

इति प्रथमोऽनुवाकः

—०—

नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो नमः शष्पिञ्जराय त्विषीमते पथीनां पतये नमो नमो हरिकेशायोपवीतिने पुष्टानां पतये नमः ॥ १७ ॥

नमो बभ्लुशाय व्याधिनेऽन्नानां पतये नमो नमो भवस्य हेत्यै जगतां पतये नमो नमो रुद्रायाऽततायिने क्षेत्राणां पतये नमो नमः सूतायाहन्त्यै वनानां पतये नमः ॥ १८ ॥

नमो रोहिताय स्थपतये वृक्षाणां पतये नमो नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमो नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो नम उच्चैर्घोषायाऽक्रन्दयते पत्तीनां पतये नमः ॥ १९ ॥

नमः कृत्स्नायतया धावते सत्वनां पतये नमो नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमो नमो निषङ्गिणे ककुभाय स्तेनानां पतये नमो नमो निचेरवे परिचरायारण्यानां पतये नमः ॥ २० ॥

नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो नमः सृकायिभ्यो जिघांꣳसद्भ्यो मुष्णतां पतये नमो नमोऽसिमद्भ्यो नक्तञ्चरद्भ्यो विकृन्तानां पतये नमः ॥ २१ ॥

इति द्वितीयोऽनुवाकः

—०—

नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो नम इषुमद्भ्यो धन्वायिभ्यश्च वो नमो नम आतन्वानेभ्यः

बभ्रुरेव बभ्लुरित्युक्तम् । तैत्तिरीयाणां विव्याधी, काण्वानामाव्याधी, माध्यन्दिनानां विध्यतीति व्याधी । शिवस्य किरातत्वे व्याधा अस्य परिवारतया सन्तीति च व्याधी ॥ १८–१९ ॥ कृत्स्नायतया कृत्स्नायततया । **'लोपः समाने'** इत्येकतकारलोपः । तततममिति वक्तव्ये 'ब्रह्म ततममपश्यत्' इति यथा । कृत्स्नेषु लक्ष्येषु धनुष आयतज्यतया सज्जीभूय धावते । कृत्स्ने जगत्यायततया सर्वगताय, अथापि भक्तरक्षणाय बहुरूपाय धावते । कृत्स्नायतया स्वरूपशक्त्या वा धावते ॥२०–५॥ **'क्षतृभ्यः'** इति व्याख्यातम् ॥२६–४०॥

प्रतिदधानेभ्यश्च वो नमो नम आयच्छद्भ्योऽस्यद्भ्यश्च वो नमः ॥ २२ ॥

नमो विसृजद्भ्यो विध्यद्भ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमः शयानेभ्य आसीनेभ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमः ॥ २३ ॥

नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो नमो नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नम उगणाभ्यस्तृꣳहतीभ्यश्च वो नमः ॥ २४ ॥

नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमः ॥ २५ ॥

नम सेनाभ्यः सेनानिभ्यश्च वो नमो नमो रथिभ्यो अरथेभ्यश्च वो नमो नमः क्षतृभ्यः सङ्ग्रहीतृभ्यश्च वो नमो नमो महद्भ्यो अर्भकेभ्यश्च वो नमः ॥ २६ ॥

इति तृतीयोऽनुवाकः

—०—

नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्म्मारेभ्यश्च वो नमो नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमो नमः श्वनिभ्यो मृगयुभ्यश्च वो नमः ॥ २७ ॥

नम श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च ॥ २८ ॥

नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च ॥ २९ ॥

नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च सवृधे च नमोऽग्र्याय च प्रथमाय च ॥ ३० ॥

नम आशवे चाजिराय च नमः शीघ्र्याय च शीभ्याय च नम ऊर्म्याय चावस्वन्याय च नमो नादेयाय च द्वीप्याय च ॥३१॥

इति चतुर्थोऽनुवाकः

—०—

नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो मद्ध्यमाय चापगल्भाय च नमो जघन्याय च बुध्न्याय च॥३२॥

नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च नमः श्लोक्याय चावसान्याय च नम उर्वर्याय च खल्याय च ॥
॥ ३३ ॥

नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च नम आशुषेणाय चाऽशुरथाय च नमः शूराय चावभेदिने च॥३४॥

नमो बिल्मिने च कवचिने च नमो वर्मिणे च वरूथिने च नमः श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्याय चाऽहनन्याय च ॥
॥ ३५ ॥

नमो धृष्णवे च प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चाऽयुधिने च नमः स्वायुधाय च सुधन्वने च ॥
॥ ३६ ॥

इति पञ्चमोऽनुवाकः

—०—

नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः कुल्याय च सरस्याय च नमो नादेयाय च वैशन्ताय च ॥३७॥

नमः कूप्याय चावट्याय च नमो वीध्र्याय चाऽतप्याय च नमो मेघ्याय च विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च ॥ ३८ ॥

नमो वात्याय च रेष्म्याय च नमो वास्तव्याय च वास्तुपाय च नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च ॥ ३९ ॥

नमः शङ्गवे च पशुपतये च नम उग्राय च भीमाय च नमोऽग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय ॥ ४० ॥

इति षष्ठोऽनुवाकः

—०—

नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥ ४१ ॥

इति सप्तमोऽनुवाकः

—०—

शं भवत्यनेनेति शम्भवः। मयो भवत्यनेनेति मयोभवः ॥ ४१–४२ ॥

नम॒ः पार्य्या॑य चावार्य्या॒य च॒ नम॑ः प्रतर॑णाय चोत्तर॑णाय च॒ नम॒-
स्तीर्त्थ्या॑य च॒ कूल्या॑य च॒ नम॑ः शष्प्या॑य च॒ फेन्या॑य च ॥ ४२ ॥

नम॑ः सिक॒त्या॒य च प्रवा॒ह्या॒य च॒ नम॑ः कि॒ꣳशि॒लाय॑ च क्षय॒णाय॑
च॒ नम॑ः कप॒र्द्दिने॑ च पुल॒स्तये॑ च॒ नम॑ इरि॒ण्या॒य च प्रप॒त्थ्या॒य च ॥
॥ ४३ ॥

नमो॒ व्रज्या॑य च गोष्ठ्या॑य च॒ नम॒स्तल्प्या॑य च॒ गेह्या॑य च॒ नमो॑
हृद॒य्या॒य च निवे॒ष्प्या॒य च॒ नम॑ः काट्या॑य च गह्वरेष्ठाय॑ च ॥
॥ ४४ ॥

नम॑ः शुष्क्या॑य च हरि॒त्या॒य च॒ नम॑ः पाꣳस॒व्या॒य च रज॒स्या॒य
च॒ नमो॒ लोप्या॑य चोल॒प्या॒य च॒ नम॑ ऊर्व्या॑य च॒ सूर्व्या॑य च ॥
॥ ४५ ॥

नम॑ः प॒र्ण्णाय॑ च पर्ण्णश॒दाय॑ च॒ नम॑ उद्गुर॒माणाय चाभिघ्न॒ते च॒
नम॑ आखिद॒ते च॑ प्रखिद॒ते च॒ नम॑ इषुकृ॒द्भ्यो॑ धनुष्कृ॒द्भ्य॑श्च वो॒
नमो॒ नमो॑ वः किरि॒केभ्यो॑ दे॒वाना॒ꣳ हृद॑येभ्यो॒ नमो॑ विचिन्व॒-
त्केभ्यो॒ नमो॑ विक्षिण॒त्केभ्यो॒ नम॑ आनिर्ह॒तेभ्य॑ः ॥ ४६ ॥

इत्यष्टमोऽनुवाकः

—०—

‘**पुलस्तिने**’ इति काण्वाः । ‘**पुलस्तये**’ इति तैत्तिरीया माध्यन्दिनाश्च । अर्थस्तूक्तः ॥ ४३ ॥ ‘**हृद्याय**’ इति काण्वाः। ‘**हृदय्याय**’ इति तैत्तिरीया माध्यन्दिनाश्च ॥ ४४–४९ ॥

द्रापे॒ अन्ध॑सस्पते॒ दरि॑द्र॒ नील॑लोहित ।
आ॒सां प्र॒जाना॑मे॒षां प॑शू॒नां मा भेर्मा रो॒ङ्मो च॑ नः॒
किञ्च॒नाम॑मत् ॥ ४७ ॥

इ॒मा रु॒द्राय॑ त॒वसे॑ कप॒र्द्दिने॑ क्ष॒यद्वी॑राय॒ प्रभ॑रामहे म॒तीः ।
यथा॑ शमस॑द्द्विप॒दे॒ चतु॑ष्पदे॒ विश्वं॑ पु॒ष्टं ग्रामे॑ अ॒स्मिन्न॑नातु॒रम् ॥
॥ ४८ ॥

या ते॑ रुद्र शि॒वा त॒नूः शि॒वा वि॒श्वाहा॑ भेष॒जी ।
शि॒वा रु॒तस्य॑ भेष॒जी तया॑ नो मृड जी॒वसे॑ ॥ ४९ ॥

परि॑ नो रु॒द्रस्य॑ हे॒तिर्वृ॑णक्तु॒ परि॑ त्वे॒षस्य॑ दु॒र्म्म॒तिर॑घा॒योः ।
अव॑ स्थि॒रा म॒घव॑द्भ्यस्तनुष्व॒ मीढ्व॑स्तो॒काय॒ तन॑याय मृड ॥
॥ ५० ॥

मीढु॑ष्टम॒ शिव॑तम शि॒वो न॑ः सु॒मना॑ भव ।
प॒रमे॑ वृ॒क्ष आयु॑धं नि॒धाय॒ कृत्तिं॒ वसा॑न॒ आच॑र॒ पिना॑कं॒
बिभ्र॒दाग॑हि ॥ ५१ ॥

विकि॑रिद्र॒ विलो॑हित॒ नम॑स्ते अस्तु भगवः ।
यास्ते॑ स॒हस्र॒ꣳ हे॒तयो॒ऽन्यम॒स्मन्निव॑पन्तु॒ ताः ॥ ५२ ॥

अत्र पूर्वार्धं तैत्तिरीयाणामिव णत्ववर्जम्–‘**परि नः–**’ इति, उत्तरार्धं च ळत्ववर्जम्–‘**तनयाय मृड**’ इति पठन्ति । अन्यत् सर्वं समानम् ॥ ५०–६६ ॥

इदमाचार्यगोविन्दो लेशतः शतरुद्रियम् ।
माध्यन्दिनीयं व्याचख्यौ विनेयजनवाञ्छया ॥

इत्याचार्यगोविन्दस्य कृतिषु माध्यन्दिनीयशतरुद्रियव्याख्यानम् ॥

—०—

स॒हस्रा॑णि सहस्र॒शो बा॒ह्वोस्तव॑ हे॒तय॑ः ।
ता॒सामीशा॑नो भगवः परा॒चीना॒ मुखा॑ कृधि ॥ ५३ ॥

अस॑ङ्ख्याता स॒हस्रा॑णि॒ ये रु॒द्रा अधि॒ भूम्या॑म् ।
तेषा॑ꣳ सहस्रयोज॒नेऽव॒ धन्वा॑नि तन्मसि ॥ ५४ ॥

अ॒स्मिन्म॑ह॒त्य॒र्ण॒वे॒ऽन्तरि॑क्षे भ॒वा अधि॑ ।
तेषा॑ꣳ सहस्रयोज॒नेऽव॒ धन्वा॑नि तन्मसि ॥ ५५ ॥

नील॑ग्रीवाः शिति॒कण्ठा॒ दिव॑ꣳ रु॒द्रा उप॑श्रिताः ।
तेषा॑ꣳ सहस्रयोज॒नेऽव॒ धन्वा॑नि तन्मसि ॥ ५६ ॥

नील॑ग्रीवाः शिति॒कण्ठा॑ः श॒र्वा अ॒धः क्ष॑माच॒राः ।
तेषा॑ꣳ सहस्रयोज॒नेऽव॒ धन्वा॑नि तन्मसि ॥ ५७ ॥

ये वृ॒क्षेषु॑ श॒ष्पिञ्ज॑रा॒ नील॑ग्रीवा॒ विलो॑हिताः ।
तेषा॑ꣳ सहस्रयोज॒नेऽव॒ धन्वा॑नि तन्मसि ॥ ५८ ॥

ये भू॒ताना॒मधि॑पतयो विशि॒खास॑ः कप॒र्दिन॑ः ।
तेषा॑ꣳ सहस्रयोज॒नेऽव॒ धन्वा॑नि तन्मसि ॥ ५९ ॥

ये प॒थां प॑थि॒रक्ष॑य ऐलबृदा आ॑यु॒र्युध॑ः ।
तेषा॑ꣳ सहस्रयोज॒नेऽव॒ धन्वा॑नि तन्मसि ॥ ६० ॥

ये ती॒र्थानि॑ प्र॒चर॑न्ति सृ॒काह॑स्ता निष॒ङ्गिण॑ः ।
तेषा॑ꣳ सहस्रयोज॒नेऽव॒ धन्वा॑नि तन्मसि ॥ ६१ ॥

येऽन्ने॑षु वि॒विद्ध्य॑न्ति॒ पात्रे॑षु पिब॑तो॒ जना॑न् ।
तेषा॑ꣳ सहस्रयोज॒नेऽव॒ धन्वा॑नि तन्मसि ॥ ६२ ॥

य ए॒ताव॑न्तश्च॒ भूया॑ꣳसश्च॒ दिशो॑ रु॒द्रा वि॑तस्थि॒रे ।
तेषा॑ꣳ सहस्रयोज॒नेऽव॒ धन्वा॑नि तन्मसि ॥ ६३ ॥

नमो॑ऽस्तु रु॒द्रेभ्यो॒ ये दि॒वि येषां॑ व॒र्षमिष॑वः । तेभ्यो॒ दश॒ प्राची॒र्दश॑ दक्षि॒णा दश॑ प्र॒तीची॒र्दशोदी॑ची॒र्दशो॒र्ध्वाः । तेभ्यो॒ नमो॑ अस्तु॒ ते नो॑ऽवन्तु॒ ते नो॑ मृडयन्तु॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तमे॑षां॒ जम्भे॑ दध्मः ॥ ६४ ॥

नमो॑ऽस्तु रु॒द्रेभ्यो॒ ये॒ऽन्तरि॑क्षे॒ येषां॒ वात॒ इष॑वः । तेभ्यो॒ दश॒ प्राची॒र्दश॑ दक्षि॒णा दश॑ प्र॒तीची॒र्दशोदी॑ची॒र्दशो॒र्ध्वाः । तेभ्यो॒ नमो॑ अस्तु॒ ते नो॑ऽवन्तु॒ ते नो॑ मृडयन्तु॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तमे॑षां॒ जम्भे॑ दध्मः ॥ ६५ ॥

नमो॑ऽस्तु रु॒द्रेभ्यो॒ ये पृ॑थि॒व्यां येषा॒मन्न॒मिष॑वः । तेभ्यो॒ दश॒ प्राची॒र्दश॑ दक्षि॒णा दश॑ प्र॒तीची॒र्दशोदी॑ची॒र्दशो॒र्ध्वाः । तेभ्यो॒ नमो॑ अस्तु॒ ते नो॑ऽवन्तु॒ ते नो॑ मृडयन्तु॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तमे॑षां॒ जम्भे॑ दध्मः ॥ ६६ ॥

हरि॒ः ओ३म्

इति नवमोऽनुवाकः

—०—

[अनुवाकसूत्रम्– नमस्ते षोडश, हिरण्यबाहवऽउष्णीषिणेतक्षभ्यो ज्येष्ठाय पञ्चकाः, स्रुत्याय चतस्रः शम्भवायैका,पार्य्याय पञ्च, द्रापेऽअन्धसो विंशतिः, नव, षट्षष्टिः ।]

॥ इति माध्यन्दिनीयायां वाजसनेयसंहितायां शतरुद्रियहोमो नाम षोडशोऽध्यायः ॥

—०—

शतरुद्रियम्

(मैत्रायणीयसंहितापाठानुसारि)

हरि॒ः ओ३म्

आ॑ त्वा॒ वहन्तु॒ ह॑र॒यः सुचे॒त॑स॒ः श्वे॒तै॑र॑श्वै॒रि॒ह॑ के॑तु॑म॒द्भिः ।
वा॒त॒ज॒वै॑र्ब॒लव॒द्भि॑र्म॒नोज॒वै॒र॑स्मि॑न् य॒ज्ञे॑ म॑म॒ ह॒व्या॑य॒ शर्व ॥ १ ॥

ओ३म् ॥ नत्वा नारायणं प्राणं रुद्रं रुद्रप्रपाठकम् ।
मैत्रायणीयं व्याख्यास्ये सङ्ग्रहेण यथामति ॥

अथातो मैत्रायणीयं रुद्रप्रपाठकं व्याख्यास्यामः । यत्रार्थभेदः पाठभेदश्च ।

मित्रस्यायं मैत्रायणः । मैत्रायणस्येयं संहिता मैत्रायणीया । अस्यां च संहितायां चत्वारि काण्डानि । तत्र द्वितीये मध्यमकाण्डे त्रयोदश प्रपाठकाः । तत्र नवमो रुद्रप्रपाठकः । यत्र दशानुवाकाः, ५८ मन्त्राः कण्डिकापरनामधेयाः । तत्र प्रथमानुवाकगास्त्रयोदश मन्त्राश्चरमानुवाकगाः पञ्च मन्त्राश्च नान्यासु संहितासु पठ्यन्ते । त एते विशिष्य मैत्रायणीया रुद्रमन्त्राः ।

तत्राऽद्यो जागतः । भौरिजस्त्रैष्टुभो वा । द्वितीय आनुष्टुभः । एकादश गायत्र्यः । तथाच मन्त्रार्थः—आ त्वा वहन्तु हरय इमं नो यज्ञं हे शर्व । कथं शर्वः? **'शर्वः शंरोधनाद्धरिः'** । शं रुध्वा वर्तत इति हरिः । असतां सदा, सतां मुक्तिपर्यन्तं स्वरूपसुखम् । हरिरिति वायुरपि । शर्वतीति शर्वः शिवोऽपि । शर्व हिंसायाम् । हरयोऽश्वाः । कीदृशा हरयः? सुचेतसः । भक्तयज्ञस्वीकारार्थमस्मत्स्वामिना गन्तव्यमिति शोभनाध्यवसायाः । अथ शर्वमभ्यर्थयते—श्वेतैः केतुमद्भिः बलवद्भिः वातजवैः, अथच मम मनोकूलजवैरश्वैः इहास्मिन् मम यज्ञे हव्यस्वीकरणाय मानसयज्ञे स्तुतिस्वीकाराय आ गच्छेति ॥ १ ॥

दे॒वानां॑ च ऋषी॒णां॑ चासु॑राणां च पूर्व॒जम् ।
म॒हा॒दे॒वꣳ स॒ह॒स्रा॒क्षꣳ शि॒वमावा॑हयाम्य॒हम् ॥ २ ॥

तत् पुरु॑षाय वि॒द्महे म॒हा॒दे॒वाय॑ धीमहि ।
तन्नो॑ रु॒द्रः प्र॒चो॒दया॑त् ॥ ३ ॥

तद्गा॑ङ्गौ॒च्याय वि॒द्महे गि॒रि॒सु॒ताय॑ धीमहि ।
तन्नो॑ गौ॒री प्र॒चो॒दया॑त् ॥ ४ ॥

देवानां च ऋषीणां च । **‘अहमादिर्हि देवानां महर्षीणां च सर्वशः’** इति, **‘अहं सर्वस्य प्रभवः’** इति च गीतासु । देवादीनां जननात् पूर्वं स्वयं पुरुषरूपेण जातमभिव्यक्तम् । **‘सहस्रशीर्षा पुरुषः सहस्राक्षः’** इति श्रुतिः । **‘शाश्वतं शिवमच्युतम्’** इति च । **‘आदिदेवो महादेवः’, सर्वः शर्वः शिवः स्थाणुः’** इति विष्णुसहस्रनामसु । आवाहयामि यज्ञाग्नौ, हृदयकमले वा ॥ २ ॥ शिवप्रतीके नारायणः स्तुतः । अथ तदीयगायत्रीराह । प्रथमा रुद्रगायत्री काठकेऽपि पठिता । रुजां द्रवणतः प्राणनारायणावपि रुद्रावित्युक्तम् । नारायणोपनिषदि चेयं पठ्यते ॥ ३ ॥ गौरीगायत्रीमाह–तत् गाङ्गौच्याय । गङ्गया ओच्यः सङ्गम्य इति गङ्गौच्यः शिवः । उच समवाये । ततस्येदमर्धाङ्गं गाङ्गौच्यं पार्वत्याख्यम् । गिरिसुतश्च सः । पुंवच्छक्तिमती नारी पुंशब्देनैव भण्यते । अथ यत्पादनिःसृतया गङ्गया शिव उच्यति, स गङ्गौच्यस्यायं प्रभुर्नारायणो गाङ्गौच्यः । नारायणाख्यं परं ब्रह्म वा गाङ्गौच्यम् । गिरिं प्राणं सौतीति गिरिसुतः । गिरिणा वा सुतोऽभिव्यक्तः शास्त्रप्रवचनेन । **‘मातरिश्वा मथायति’** इति हि श्रुतिः । गिरतीति गिरिः जगद्गुरुः प्राणः । गौरी स्वच्छवर्णो मोहिन्यादिस्त्रीरूपो भगवान् । गौरीगतत्वाच्च गौरी । भगवति त्रिलिङ्गसमन्वयश्चायम्– गाङ्गौच्यं गिरिसुतो गौरीति ॥ ४ ॥

तत् कु॒मा॒राय॑ विद्महे का॒र्त्ति॒के॒याय॑ धीमहि ।
तन्नः॑ स्क॒न्दः प्र॒चो॒दया॑त् ॥ ५ ॥

तत् कु॒रा॒टाय॑ वि॒द्महे ह॒स्ति॒मु॒खाय॑ धीमहि ।
तन्नो॑ द॒न्ती प्र॒चो॒दया॑त् ॥ ६॥

तच्च॑तुर्मुखाय विद्महे प॒द्मा॒स॒नाय॑ धीमहि ।
तन्नो॑ ब्र॒ह्मा प्र॒चो॒दया॑त् ॥ ७ ॥

अथ स्कन्दगायत्रीमाह– तत् कुमाराय । स्कन्दान्तर्गतस्य नारायणस्यैवेयं गायत्री । **‘अन्तर्यामिव्यपदेशास्तु’** इति ह्याह भगवान् बादरायणः । एवमुत्तरत्रापि । कुत्सितं दोषं मारयतीति कुमारः । कुमारगतत्वाच्च । स्वयमपि दशरथादीनां कुमारो बभूव । कृत्तिं वसानः शिवः कार्त्तिकः । तेनेयत इति कार्त्तिकेयो भगवान् । भवभयं स्कन्दत्यनेनेति स्कन्दः । स्कदिर् गतिशोषणयोः ॥ ५ ॥ गणेशगायत्रीमाह– तत् कराटाय विद्महे । बृंहितमिव कुत्सितं कुटिलं वा रटतीति कुराटः । कुराट एव कराटः । अत एव हेरम्ब उच्यते । हेरबि शब्दे । भक्तानामभीष्टकरः सन्नटति । सर्वं करोतीति करः । सर्वत्राटतीत्यटः । स चासौ स च कराटः । करेण शुण्डादण्डेनोपलक्षितोऽटति । हस्तिमुखो वैश्वानरः । **‘मध्यमं तु गजाकारम्’** इति हि स्मरन्ति । यदुपासनेन गणपतिरपि गजमुखो बभूव । अत एव वैश्वानरो दन्ती दंष्ट्री । वराहादिरूपश्च ॥ ६ ॥ स्तुतः सपरिवारः पौत्रः । अथ पुत्रगतः स्तूयते । चतुर्मुखगतः स्वयमपि चतुर्मुखः पद्मासनो ब्रह्मा । गायत्रीप्रतिपाद्यश्च पद्मासनः । **‘नारायणः सरसिजासनसन्निविष्टः’** इति हि नृसिंहपुराणे । पद्मा चास्य वक्षसि चाङ्के चाऽस्त इति च पद्मासनो भगवान् ॥ ७ ॥

तत् केशवाय विद्महे नारायणाय धीमहि ।
तन्नो विष्णुः प्रचोदयात् ॥ ८ ॥

तद्भास्कराय विद्महे प्रभाकराय धीमहि ।
तन्नो भानुः प्रचोदयात् ॥ ९ ॥

तत् सोमराजाय विद्महे महाराजाय धीमहि ।
तन्नश्चन्द्रः प्रचोदयात् ॥ १० ॥

तज्ज्वलनाय विद्महे वैश्वानराय धीमहि ।
तन्नो वह्निः प्रचोदयात् ॥ ११ ॥

तत्त्यजपाय विद्महे महाजपाय धीमहि ।
तन्नो ध्यानः प्रचोदयात् ॥ १२ ॥

अथ विष्णुगायत्री– तत् केशवाय । तताय केशवाय । प्रसिद्धा विष्णुगायत्री– नारायणोपनिषद्गता– **'नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात्'** इति । अत्र वासुदेवस्थाने केशवः पठ्यते, पूर्वप्रस्तुतौ केशौ ब्रह्मरुद्रौ वर्तयतीति, केशयोः वर्तत इति वा ॥ ८ ॥ **'यदादित्यगतं तेजो जगद् भासयतेऽखिलम् । यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्'** इत्युक्तं रूपत्रयं तिसृभिर्गायत्रीभिः क्रमेणाऽह–तद् भास्कराय ॥ ९ ॥ सोमश्चासौ राजा च सोमराजश्चन्द्रः । सोमस्य चन्द्रस्य शिवस्य पवमानस्यापि राजा भगवान् । भक्त्याद्यलङ्कृते सोमे मनसि राजते चायम् । महांश्चायं रजन्यां विराजते । चन्द-तीति चन्द्रः सर्वलोकाह्लादकः । चन्दति रमते वा ॥ १० ॥ अग्निगायत्रीमाह– तज्ज्वलनाय । जागरितस्थानो वैश्वानरो भगवान् । विश्वनरस्याप्यभिमुखतया सूर्यगतश्च । शिवश्चाष्टमूर्तित्वादग्न्यादिगतः ॥ ११ ॥ ध्यानगायत्रीमाह– तत् त्यजपाय । तीत्यानन्दः । यमिति ज्ञानम् । ज्ञानानन्दस्वरूप इति जप्यत इति

तत् परमात्माय विद्महे वैनतेयाय धीमहि ।
तन्नः सृष्टिः प्रचोदयात् ॥ ॥ १३ ॥

इति प्रथमोऽनुवाकः

—०—

नमस्ते रुद्र मन्यव उतो ता इषवे नमः ।
नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ॥ १४ ॥

या ते रुद्र शिवा तनूरघोराऽपापकाशिनी ।
तया नस्त३न्वा शन्तमया गिरिशन्ताभिचाकशीहि ॥ १५ ॥

यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे ।
शिवां गिरिश तां कुरु मा हि९ंसीः पुरुषं जगत् ॥ १६ ॥

त्यजपः । सर्वतो महानयमिति जप्यत इति महाजपः । मुमुक्षुभिर्ध्यायत इति ध्यानः । ध्येय इत्यर्थः ॥ १२ ॥ अन्ते सृष्टिगायत्रीमाह– तत् परमात्माय । परमश्च आततश्च मतश्चायं सतामिति परमात्मः । विनतानां ब्रह्मादीनामयं स्रष्टेति वैनतेयः । विनतैरीयत इति विनतेय एव वैनतेयः । वैनतेयगतश्च । नित्य-विनताया रमायाश्चायं रमणः । सृष्टिगतत्वात् सृष्टिः । सृज्यतेऽनयेति च सृष्टिः भगवन्मूर्तिः ॥ १३ ॥ ✻ ॥ **'एचोऽयवायावः'** (अ.सू.६.१.७८) इति पाणिनिः । तेन **'ते+इषवः'** तयिषव इति रूपम् । **'लोपः शाकल्यस्य'** (अ.सू.८. ३.१९) इति यलोपे 'त इषवे' इति । मैत्रायणीया अकारस्थाने आकारं पठन्ति– **'ता इषवे'** इति । यथा वा प्रथममन्त्रे एव– **'श्रेष्ठतमाय कर्मणा आप्यायध्वम्'** इति । विसर्गलोपेनाऽकारो यथा– **'देवेभ्या इन्द्राय भागम्'** इति । एवमुत्तरत्रापि । क्वचिन्नच भवति । यथा– **'नम आक्रन्दयते'**, **'नम उष्णीषिणे'**, **'नम इषुकृद्भ्यः'** इत्यादि ॥ १४–५ ॥ गिरन्तीति गिरयो वेद-गिरः । तत्र शेते ॥ १६ ॥

शिवेन वचसा त्वा गिरिशाच्छा वदामसि ।
यथा नः सर्वा इज्जनः सङ्गमे सुमना असत् ॥ १७ ॥

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहीꣳश्च सर्वान् जम्भयन्त्सर्वाश्च यातुधान्योऽधराचीः
परासुव ॥ १८ ॥

असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः ।
ये चेमे अभितो रुद्रा दिक्षु श्रिताः सहस्रशोऽवैषाꣳ
हेड ईमहे ॥ १९ ॥

असौ योऽवसर्प्पति नीलग्रीवो विलोहितः ।
उतैनं गोपा अदृश्रन्नुतैनमुदहार्यः ॥ २० ॥

उतैनꣳ विश्वा भूतानि स दृष्टो मृडयातु नः ॥ २१ ॥

नमो नीलकपर्दाय सहस्राक्षाय मीढुषे ।
अथो ये अस्य सत्वान इदं तेभ्योऽकरं नमः ॥ २२ ॥

नमस्ता आयुधायानातताय धृष्णवे ।
उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ॥ २३ ॥

असंयुक्तमेव प्रायश्छकारं मैत्रायणीयाः पठन्ति अछेति गछेति । परन्तु उपनिषदि– **'वैदिकेषु परिस्थातुमिच्छन्ति'** इत्येव पाठो दृश्यते । तेनोभयथाऽपि प्रयोगस्तेषां सम्मत इति भाति । **'सर्वा इज्जनः'** इति दत्तोत्तरम् । सङ्गमे परस्परसमागमे सुमनस्कं स्यात् । कलहो मा भूदिति ॥ १७–२० ॥ मृडयातु मृडयतु ॥ २१ ॥ नीलकपर्दाय नीलजटाय ॥ २२ ॥ **'नमस्ता आयुधाय'** इति

प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् ।
याश्च ते हस्ता इषवः परा ता भगवो वप ॥ २४ ॥

अवतत्य धनुष्ट्वꣳ सहस्राक्ष शतेषुधे ।
प्रशीर्य्य शल्यानां मुखꣳ शिवो नः सुमना भव ॥ २५ ॥

विज्यं धनुः कपर्दिनो विशल्यो बाणवं उत ।
अनेशन्नस्य या इषव आभूरस्य निषङ्गथिः ॥ २६ ॥

परि ते धन्वनो हेतिरस्मान् वृणक्तु विश्वतः ।
अथो य इषुधिस्तवारे अस्मिन्निधेहि तम् ॥ २७ ॥

या ते हेतिर्म्मीढुष्टम शिवं बभूव ते धनुः ।
तयाऽस्मान् विश्वतस्त्वमयक्ष्मया परिभुज ॥ २ ॥ ॥ २८ ॥

इति द्वितीयोऽनुवाकः

—०—

नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो नमो हरिकेशायोपवीतिने पुष्टानां पतये नमो नमः शष्पिञ्जराय त्विषीमते पथीनां पतये नमो नमो बभ्लुशाय व्याधिनेऽन्नस्य पतये नमो नमो रुद्रायाऽततायिने क्षेत्रस्य पतये नमो नमो भवस्य हेत्यै जगतस्पतये नमो नमः सूतायाहन्त्वाय वनानां पतये नमो

विवृतम् ॥ २३ ॥ **'हस्ता इषवः'** इति च ॥ २४–२५ ॥ **'बाणवं उत'** इत्युपलब्धः पाठः । **'बाणवाम् उत'** इति वा स्यात् ॥ २६ ॥ अस्मिन् मयि त्वद्भक्तविषये तमिषुधिं दूरे निधेहि ॥ २७–२८ ॥ ✻ ॥ अहन्त्वाय । अहं च

नमो रोहिताय स्थपतये वृक्षाणां पतये नमो नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमो नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमो नम आक्रन्दयत उच्चैर्घोषाय सत्वानां पतये नमो नमः कृत्स्नवीताय धावते पत्तीनां पतये नमो नमो निषङ्गिणे ककुभाय स्तेनानां पतये नमो नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो नमो निचेरवे परिचरायारण्यानां पतये नमो नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो नमः सृगायिभ्यो जिघाꣳसद्भ्यो मुष्णतां पतये नमो नमोऽसिमद्भ्यो नक्तं चरद्भ्यः प्रकृन्तानां पतये नमो नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो नमः ॥ २९ ॥

इति तृतीयोऽनुवाकः

—०—

नम इषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो नम इषुमद्भ्यो धन्वायिभ्यश्च वो नमो नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो नम आयच्छद्भ्यो विसृजद्भ्यश्च वो नमो नमोऽस्यद्भ्यो विद्ध्यद्भ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो

त्वं च यस्य वाचके पदे सोऽहन्त्वः । सतामहङ्कारं त्वक्षति तनूकरोति, असतां त्वेषयति वर्धयतीत्यहन्त्वः शिवः । अहङ्कारमानित्वात् । सत्वानां प्राणिनां पतये । सृकायिन एव सृगायिनः । तृतीयोऽतिशये ॥ २९ ॥ ✻ ॥ **'आयछद्भ्यः'** इति व्याख्यातम् । **'शयानेभ्या आसीनेभ्यः'** इति च । बृहद्भ्यः महद्भ्य

नमः शयानेभ्या आसीनेभ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो नमो नम आव्याधिनीभ्यो विविद्ध्यन्तीभ्यश्च वो नमो नमा उगणाभ्यस्तृꣳहतीभ्यश्च वो नमो नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमः कृच्छ्रेभ्यः कृच्छ्रपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो नमः सेनाभ्यः सेनानीभ्यश्च वो नमो नमो रथिभ्यो वरूथिभ्यश्च वो नमो नमः क्षत्तृभ्यः सङ्ग्रहीतृभ्यश्च वो नमो नमो बृहद्भ्योऽर्भकेभ्यश्च वो नमो नमो युवभ्य आशीनेभ्यश्च वो नमो नमः ॥ ३० ॥

इति चतुर्थोऽनुवाकः

—०—

नमो ब्राह्मणेभ्यो राजन्येभ्यश्च वो नमो नमः सूतेभ्यो विश्वेभ्यश्च वो नमो नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्म्मारेभ्यश्च वो नमो नमो निषादेभ्यः पुञ्जिष्टेभ्यश्च वो नमो नमः श्वनीभ्यो मृगयुभ्यश्च वो नमो नमः श्वभ्यः

इत्येकार्थम् । आशीना अतिशयेनाऽशिनाः । आ वटवः ॥ ३० ॥ ✻ ॥ ब्राह्मणेभ्यो राजन्येभ्यश्च । **'ब्रह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः'** इति हि श्रुतिः । सुष्ठु गुणैरूताः सूताः । सारथयश्च । विट्सु प्रजासु भवा विश्या वैश्याः । विशां हिता विश्याः । मीढुष्टम एव मीढुष्टरः । यत्रोभयोः प्रयोगो न तत्रैकार्थौ तरप्तमपौ । सुष्ठु वृद्धिमान् सुवृध्वा । शीभः शयानो भाति सर्वतः ।

श्वपतिभ्यश्च वो नमो नमो भवाय च शर्वाय च नमो रुद्राय च
पशुपतये च नमो व्युप्तकेशाय च कपर्दिने च नमो नीलग्रीवाय
च शितिकण्ठाय च नमः सहस्राक्षाय च शतधन्वने च नमो
गिरिशाय च शिपिविष्टाय च नमो मीढुष्टराय चेषुमते च नमो
ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय
च सुवृध्वने च नमोऽग्रियाय च प्रथमाय च नम आशवे
चाजिराय च नमः शीभाय च शीघ्र्याय च नमा ऊर्म्याय
चावस्वन्याय च नमो द्वीप्याय च स्रोतस्याय च ॥ ३१ ॥

इति पञ्चमोऽनुवाकः

—०—

नम आशुषेणाय चाऽशुरथाय च नमो बिल्मिने च कवचिने च
नमो वर्म्मिणे च वरूथिने च नमः शूराय चावभिन्दते च नमः
श्रुताय च श्रुतसेनाय च नमो ज्यायसे च कनीयसे च नमः
पूर्वजाय चापरजाय च नमो मद्ध्यमाय चापगल्भाय च नमो
जघन्याय च बुध्न्याय च नमः सोभ्याय च प्रतिसराय च नमो
याम्याय च क्षेम्याय च नमोऽवसान्याय च श्लोक्याय च नम
उर्वर्य्याय च खल्याय च नमो वन्याय च कक्ष्याय च नमः
श्रवाय चप्रतिश्रवाय च नमः पथ्याय च स्रुत्याय च नमो नाद्याय
च वैशन्ताय च नमो नीप्याय च भिंद्याय च नमोऽवट्याय च
कूप्याय च नमः सूद्याय च सरस्याय च ॥ ३२ ॥

इति षष्ठोऽनुवाकः

—०—

सतां शीतलो भाति । **'छायातपौ ब्रह्मविदो वदन्ति'** इति श्रुतिः । **'नमा ऊर्म्याय'** इत्युक्तार्थम् ॥ ३१ ॥ ✻ ॥

नमो दुन्दुभ्ये चाऽहननीयाय च नमो धृष्णवे च प्रमृशाय च
नमो निषङ्गिणे चेषुधिमते च नमस्तिग्मेषवे चाऽयुधिने च
नमः स्वायुधाय च सुधन्वने च नमो मेघ्याय च विद्युत्याय च
नमो वर्ष्याय चावर्ष्याय च नमो वीध्रियाय चाऽतप्याय च नमो
वात्याय च रेष्मण्याय च नमो वास्तव्याय च वास्तुपाय च
नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च नमः
शङ्गवे च पशुपतये च नम उग्राय च भीमाय च नमोऽग्रेव-
धाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो
वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय नमः शम्भवे च मयोभवे च
नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय
च ॥ ॥ ३३ ॥

इति सप्तमोऽनुवाकः

—०—

नम शिखण्डिने च पुलस्तिने च नमः कि९शिलाय च क्षेणाय
च नमः इरिण्याय च प्रपथ्याय च नमो गृह्याय च गोष्ठ्याय च
नमो गेह्याय च तल्प्याय च नमः कूल्याय च तीर्थ्याय च नमः
पार्य्याय चावार्य्याय च नमः प्रतरणाय चोत्तरणाय च नमः
प्रवाह्याय च सिकत्याय च नमः फेन्याय च शष्प्याय च नमो

क्वचिदवतारे ज्यायान् भवति । क्वचित् कनीयान् । भिद्यो नदः तद्गताय नमः । **'नदः सरस्वान् भिद्योद्ध्यौ'** इति यादवप्रकाशः । सर्वस्माद् भिद्यत इति भिद्यः ॥ ३२ ॥ ✻ ॥ दुन्दुभिस्तद्गतः । आहननेन दुन्दुभिध्वानेनापि स एवेयते । रेष्मणि भवः रेष्मण्यः । स एव रेष्म्यः इत्युक्तः ॥ ३३ ॥ ✻ ॥ शिखण्डः

नीवेष्याय च हृद्याय च नमः काट्याय च गह्वरेष्ठ्याय च नमः
शुष्याय च हरित्याय च नमः पा९सव्याय च रजस्याय च नमो
लोप्याय चोलपाय च नम ऊर्म्याय च सूर्म्याय च नमः
पण्णीय च पर्ण्णशादाय च नमोऽपगुरमाणाय चाभिघ्नते च
नम आखिदते च प्रखिदते च नम आखिदाय च प्रखिदाय
च ॥ ॥ ३४ ॥

इत्यष्टमोऽनुवाकः

—०—

नमो गिरिकेभ्यो देवाना९ हृदयेभ्यो नमो विचिन्वत्केभ्यो नम
आक्षिणकेभ्यो नम आनृहतेभ्यः ॥ ३५ ॥

प्रचलाकः तेनावतंसितः कृष्णः । किरातरूपः शिवश्च । काकपक्षः शिखाविशेषोऽपि शिखण्ड उच्यते । **'काकपक्षः शिखण्डश्च शिखण्डकः'** इति यादवप्रकाशः । शिखण्डिनि ताम्रचूडे मयूरे च सन्निहितः । अम्बायाः शिखण्डिभावे तत्र सन्निहितः । शिखण्डः कपर्दः तद्वते च । जगत् क्षयन्त्यनेनेति क्षीण एव क्षेणः । दोषैः क्षीणश्च । अतितमां क्षीणः क्षेणः । जगति क्षियति वसतीति क्षीण एव क्षेणः । जगत् क्षेणयति क्षिणोतीति वा क्षेणः । क्षिणु हिंसायाम् । इणः ज्ञानानन्दरूपः क्षो नृसिहः । नृसिंहोऽस्येन इति च क्षेणः प्राणः शिवश्च । गह्वरे मुक्तस्थाने स्थिता मुक्तजीवाः । तानप्ययं नियमयति । ये शुष्यन्ति ते शुष्याः शुष्काः । तत्रगताय । उच्च इत्युकारेण लपन्त्येनम् । उग्र इत्युकारेण लपन्त्येनम् । खेदयन् खिदन्नुच्युते । खिद्यमानेषु गतः खिद उच्यते । खिनः सुखिनः । **'सुखं खमिति चोच्यते'** इति स्मरणात् । आखिन ईषत्सुखिनः संसारिणः । प्रखिनो मुक्ताः । तानपि दयते रक्षतीत्याखिदः प्रखिदः ॥ ३४ ॥ ॥✻॥ गिरि विभवैः कीयन्ते गीयन्त इति गिरिकः । कै

द्रापे अन्धसस्पते दरिद्र नीललोहित ।
एषां पशूनामासां प्रजानां मा भैर्मा रुङ् मो च नः किं
चनाममत् ॥ ३६ ॥

इमा रुद्राय तवसे कपर्द्दिने क्षयद्वीराय प्रभरामहे मतीः ।
यथा नः शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे
अस्मिन्ननातुरम् ॥ ३७ ॥

या ते रुद्र शिवा तनूः शिवा विश्वाह भेषजा ।
शिवा रुतस्य भेषजा तया नो मृड जीवसे ॥ ३८ ॥

परि नो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्म्मतिरघायोः ।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृड ॥
॥ ३९ ॥

मीढुष्टम शिवतम शिवो न एधि सुमना भव ।
अवतत्य धनुष्द्वमक्रुद्धः सुमना भव ।
पिनाकं बिभ्रदागहि कृत्ति९ वसाना उच्चर ॥ ४० ॥

शब्दे । गिरणाद् गिरयः सुखरूपाश्च । आक्षिण्वन्ति दुष्टान् दोषांश्चेति आक्षिणकाः । आ समन्तात् मांसचपलैर्नृभिः हता मृगा पक्षिणश्च आनृहता उच्यन्ते । तेषु गतेभ्यो भगवद्रूपविशेषेभ्यो नम इति । अद्भुतमिदं देशनम्– यत् प्राणिनो घ्नन्ति ते तद्रूं भगवन्तं हिंसन्तीवेति ॥ ३५ ॥ मा भैः मा भैषीः ॥ ३६–३७ ॥ भेषजं छन्दसि भेषजी भेषजा च ॥ ३८–३९ ॥ नः शिव एधि भव । सुमनाश्च भव । शिवः सन् नः एधि एधयेति वा । सुमना भव इत्यस्यैव विवरणम्–अक्रुद्धः सुमना भव । तात्पर्यद्योतनाय द्विः सौमनस्यप्रार्थनम् ॥४०॥

व्यंकृड विलोहित नमस्ते अस्तु भगवः ।
यास्ते सहस्रꣳ हेतयोऽन्याꣳस्तै अस्मन्निवपन्तु ताः ॥ ४१ ॥

सहस्राणि सहस्रशो हेतयस्तव बाह्वोः ।
तासामीशानो मघवन् पराचीना मुखा कृधि ॥ ४२ ॥

असङ्ख्याता सहस्राणि ये रुद्रा अधि भूम्याम् ।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ४३ ॥

ये अस्मिन् महत्यर्णवे अन्तरिक्षे भवा अधि ।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ४४ ॥

ये नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्रा उपश्रिताः ।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ४५ ॥

ये नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः ।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ४६ ॥

ये वृक्षेषु शष्पिञ्जरा नीलग्रीवा विलोहिताः ।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ४७ ॥

ये भूतानामधिपतयो विशिखासः कपर्दिनः ।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ४८ ॥

विर्विलक्षणः अकृडः मृदुश्च साधुषु । कृड घनत्वे । काठिन्यं घनत्वम् । तेनासाधुषु व्यवहितः कृडः कठिनश्च । यास्ते तव हेतयः ताः ते तव तावकीनेभ्यः अस्मदन्यान् निवपन्तु ॥ ४१ ॥ मघवन् मखवन् यज्ञाराध्य ॥ ४२–४८ ॥

ये पथां पथिरक्षय ऐलमृडा वो युधः ।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ४९ ॥

ये तीर्थानि प्रचरन्ति सृगवन्तो निषङ्गिणः ।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ५० ॥

ये अन्नेषु विविद्ध्यन्ति पात्रेषु पिबतो जनान् ।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ५१ ॥

य एतावन्तो वा भूयाꣳसो वा दिशो रुद्रा वितस्थिरे ।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ५२ ॥

नमो अस्तु रुद्रेभ्यो ये दिवि येषाꣳ वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमो अस्तु ते नो मृडन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मो नमो अस्तु रुद्रेभ्यो ये अन्तरिक्षे येषाꣳ वाता इषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमो अस्तु ते नो मृडन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मो नमो अस्तु रुद्रेभ्यो ये पृथिव्याꣳ येषामन्नमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमो अस्तु ते नो मृडन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥ ५३ ॥

इति नवमोऽनुवाकः

—०—

ऐलमन्नं मृडन्ति रक्षन्ति । ऐलेन वा मृडन्ति सुखयन्ति । वो युष्मदीया युधो योद्धारः ॥ ४९ ॥ सृगवन्त आयुधवन्तः ॥ ५०–५३ ॥ ✻ ॥

अघोरेभ्यो अथ घोरेभ्यो अघोरघोरतरेभ्यश्च ।
सर्वतः शर्वशर्वेभ्यो नमस्ते रुद्र रूपेभ्यो नमः ॥ ५४ ॥

यः पथः समनुयाति स्वर्ग्गं लोकं गामिव सुप्रणीतौ ।
तेन त्वं भगवान् याहि पथा ॥ ५५ ॥

इमे हिरण्यवर्ण्णाः स्वꣳ योनिमाविशन्तौ ॥ ५६ ॥

गच्छ त्वं भगवान् पुनरागमनाय पुनर्द्दर्शनाय सहदेव्याय
सहवृषाय सहगणाय सहपार्षदाय यथाहुताय नमोनमाय
नमःशिवाय नमस्ते अस्तु मा मा हिꣳसीः ॥ ५७ ॥

अघोराः सात्त्विकेषु । घोरतमास्तामसेषु । राजसेषु संसारिषु क्वचिदघोराः । क्वचिद् घोरतराः । शर्वाणां हिंसकानामपि शर्वा हिंसकाः । शर्वस्य शिवस्यापि शर्वाः संहर्तारः नृसिंहादयो भगवद्रूपविशेषाः । हे रुजां द्रावक, तव सर्वेभ्यो रूपेभ्यो नमः ॥ ५४ ॥ यः पथः पन्थाः स्वर्ग लोकं समनुयाति । सं विष्णुमनुगतो याति । **'अकयप्रविसम्भूमसखहाः विष्णुवाचकाः'** इति स्मृतेः । वेदवाचामिव सुखरूपस्य भगवतः प्रणयनार्थम् । भगवांस्त्वं तेन पथा मां याहि यापय । त्वमपि तेन पथा आयाहीति वा ॥ ५५ ॥ हिरुक् सुखं हिरण्यं वरणीयं येषां त इमे तव रूपविशेषा हे भगवन् । अहं स्वं योनिं बिम्बरूपमाविशन् भवामि । त्वं च स्वं योनिं मूलरूपमाविशन् भव । **'पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते'** इति श्रुतेः ॥ ५६ ॥ आगत्य च दर्शनं देयमित्याह– पुनर्दर्शनाय च । देव्या सहितः सहदेव्यः । देव्यं देवयोग्यं वासोभूषादि । तेन सहिताय वा । वृषः जीववृषभो ब्रह्मा वायुश्च । वृषो नन्दी तत्सहिताय च । सह

आवाहितमावाहित नमस्कृतं नमस्कृत विसर्ज्जितꣳ
विसर्जित पथं गछ पथं गछ दिवं गछ दिवं गछ स्वर्ग्गछ
स्वर्ग्गछ ज्यौतिर्ग्गछ ज्यौतिर्ग्गछ नमस्ते अस्तु मा मा
हिꣳसीः ॥ हरिः ओ३म् ॥ ॥ ५८ ॥

इति दशमोऽनुवाकः

इति मैत्रायणीयसंहितायां मध्यमकाण्डे नवमः प्रपाठकः ॥ ९ ॥

—०—

देवसेनागणाय । सपरिवाराय । यथाविधि अस्माभिराहूताय हुताय च । ये नमन्ति ते नमासः । तेषु प्रीत्या नमाय नम्राय प्रह्वाय । **'अहं भक्तपराधीनः'** इति स्मरणात् । नमसां नमतां भक्तानां शिवाय ते नमोऽस्तु । मा मां हिंसीः ॥ ५७ ॥ प्रथमं मयाऽऽवाहितम् । तेन प्रतीक आवाहितोऽभवः । आवाह्य च मया नमस्कृतं स्तुतिरकारि । एवं मया नमस्कृत, पूजान्ते च तव सन्निधानं विसर्जितम् । एवं मया विसर्जित, त्वं देवपथं गच्छ । मां च गमय । दिवं ज्ञानमयं लोकं गच्छ । नश्च गमय । स्वः स्वरूपानन्दमयं लोकं गच्छ गमय च । अप्राकृतज्योतिर्मयं लोकं गच्छ गमय च माम् । मा नरकादिना हिंसीः । भूयिष्ठां ते नमउक्तिं विधेम । अपूर्वोऽयं दशमोऽनुवाकोऽन्यशाखीये रुद्रप्रपाठके न पठितः ॥ ७८ ॥ ❊ ॥

महार्थमद्भुतं मैत्रायणीयं शतरुद्रियम् ।
इदमाचार्यगोविन्दो व्याचकार यथामति ॥

इत्याचार्यगोविन्दस्य कृतिषु मैत्रायणीयशतरुद्रीयव्याख्यानम् ॥

—०—

शतरुद्रियम्

(काठकसंहितापाठानुसारि)

[काठकसंहितायां ध्रुवक्षितिनामके सप्तदशे स्थानके एकादशादा षोडश-मनुवाकम्, षडनुवाकाः, ३९मन्त्राः (३२–७०) शतरुद्रियमित्युच्यन्ते ।]

हरि॒ः ओ३म्

तं॑त् पु॑रुषाय विद्महे महादेवा॑य धी॑महि ।
तं॑न्नो रुद्रं॑ः प्रचोदं॑यात् ॥ १ ॥ ३२

नारायणं नमस्कृत्य प्राणं च शशिशेखरम् ।
व्याख्यास्यामि यथाबोधं काठकं शतरुद्रियम् ॥

अथातः काठकं शतरुद्रियं व्याख्यास्यामः ।

यत्र पाठभेदः, यत्र चार्थभेदः ।

काठकसंहितायां पञ्च प्रभेदा भवन्ति– १. इठिमिका, २. मध्यमिका, ३. ओरिमिका, ४. याज्यानुवाक्या, ५. अनुवचनानीति । तत्राऽद्यायामिठि-मिकायामष्टादश स्थानकानि भवन्ति । तत्र सप्तदशं स्थानकं ध्रुवक्षितिर्नाम । तत्र एकान्नविंशतिरनुवाकाः । तेष्वेकादशादा षोडशं षडनुवाकाः शतरुद्रिया नाम ३९ मन्त्राः । ननु किमियं वैदिकी भाषा? इठिमिकेति ओरिमिकेति? मन्यामहे वैदिकानां गुह्यभाषेयम् । सम्प्रति तेषां गुह्यभेदनाय प्रयतिषीमहि भगवत्कृपालेशबलावलेपाः । अक्षरसाम्यान्निर्ब्रूयादिति यास्कवचनं चात्र सहकरिष्यति । इकार इच्छावचनो ज्ञानवचनश्च । ज्ञानरूपः सन् सर्वत्र स्वेच्छया प्रतिष्ठितो भगवान् इठिरुच्यते । विशेषतश्च वाजपेयादिष्विष्टिषु प्रतिष्ठितः । इना इन्द्रेण परमेश्वरेण सह प्रतिष्ठितो वायुरपि इठिः । इष्टिषु

नम॑स्ते रुद्र मन्य॑वे बाहु॑भ्यामुत॑ ते न॑मः
उतो॑ त इ॑षवे न॑मः ॥ २ ॥ ३३

या॑ ते रुद्र शिवा॑ तनू॑र॑घोरा॑ऽपापकाशिनी ।
तया॑ नस्तन्वा श॑न्तमया गि॑रिशन्ताभि॑चाकशीहि ॥ ३॥ ३४

या॑मि॑षुं गिरिशन्त ह॑स्ते बिभ॑र्ष्य॑स्तवे ।
शिवां॑ गिरित्र तां॑ कुरु मा हिँ॑सीः पु॑रुषं ज॑गत् ॥ ४ ॥ ३५

शिवे॑न व॑चसा त्वा गि॑रिशा॑च्छा वदामसि ।
य॑था नः स॑र्वमि॑ज्ज॑गदयक्ष्मँ॑ सुम॑ना अ॑सत् ॥ ५ ॥ ३६

अ॑ध्यवोचदधिवक्ता॑ प्रथमो॑ दैव्यो भिष॑क् ।
अ॑हीँश्च स॑र्वाञ्जम्भ॑य स॑र्वाश्च यातुधान्योऽधरा॑चीः
प॑रासुव ॥ ६॥ ३७

असौ य॑स्ताम्रो॑ अरुण॑ उत॑ बभ्रुः॑ सुमङ्ग॑लः ।
ये॑ चेमे॑ रुद्रा॑ अभि॑तो दिक्षु॑ श्रिता॑ः सहस्रशो॑ऽवैषाँ॑
हेड ईमहे ॥ ७ ॥ ३८

असौ योऽवस॑र्प्पति नी॑लग्रीवो वि॑लोहितः ।
उतैनं गोपा॑ अदृश्रन्नुतैनमुदहार्य्यः
उतैनं वि॑श्वा भूता॑नि स॑ दृष्टो॑ मृडयाति नः ॥ ८ ॥ ३९

पूज्यत्वेन पठितोऽपि इठिः । असतामिषुभिः कठिनोऽपि इठिः । इन्दावयं प्रतिष्ठितः, अष्टमूर्तित्वादिति शिवोऽपि इठिः । तानेतान् मिमीते लोकोऽनयेति इठिमिका । एवमोङ्कारवाच्यो भगवान् ओ । **'ओ श्रावयेत्याश्रावयन्ति'** इति हि तैत्तिरीयाः । ज्ञानानन्दमयो रिः । स मीयतेऽनयोत्यरिमिका ॥ ※ ॥

न॑मो अस्तु नीलग्रीवाय सहस्राक्षा॑य मीढुषे ।
अ॑थो ये॑ अस्य स॑त्वानोऽह॑ं ते॑भ्योऽकरं न॑मः ॥ ९ ॥ ४०

प्र॑मुञ्च ध॑न्वनस्त्व॑मुभ॑योरा॑र्त्न्यो॑र्ज्या॑म् ।
या॑श्च ते ह॑स्त इष॑वः प॑रा ता॑ भगवो वप ॥ १० ॥ ४१

वि॑ज्यं ध॑नुः कप॑र्द्दिनो वि॑शल्यो बा॑णवानुत॑ ।
अ॑नेशन्नस्यै॑षव आभू॑रस्य निषङ्ग॑थिः ॥ ११ ॥ ४२

या॑ ते हेति॑र्म्मीढुष्टम ह॑स्ते बभू॑व ते ध॑नुः ।
त॑याऽस्मा॑न् विश्व॑तस्त्व॑मयक्ष्मै॑ण प॑रिभुज ॥ १२ ॥ ४३

प॑रि ते ध॑न्वनो हेति॑रस्मा॑न् वृणक्तु विश्व॑तः ।
अ॑थो य॑ इषुधिस्त॑वारे॑ अस्म॑न्नि॑धेहि त॑म् ॥ १३ ॥ ४४

न॑माँ॑सि त आ॑युधाया॑नातताय धृष्ण॑वे ।
उभा॑भ्यामुत॑ ते न॑मो बाहु॑भ्यां त॑व ध॑न्वने ॥ १४ ॥ ४५

अवत॑त्य ध॑नुस्त्वँ॑ स॑हस्राक्ष श॑तेषुधे ।
निशी॑र्य्य शल्या॑नां मु॑खँ शिवो॑ नः सुम॑ना भव ॥ १५ ॥ ४६

तत्राऽदौ नारायणं प्राणं शिवं च एकयोत्त्या स्मरति रुद्रगायत्र्या– तत् पुरुषायेति । तदित्यविभक्तिको निर्देशः । तताय परमपुरुषाय तत्प्रसादाय तमेव सर्ववेदेषु विद्मः । तमेव सर्वोत्तमं देवं ध्यायेम तस्मात् संसाररुग्द्रावको भगवान् ज्ञानमार्गे प्रचोदयतु । अथ तदिति षष्ठ्यर्थे । तस्य नारायणस्यायं पुरुष इति प्राणः शिवश्च । महादेवौ च तौ । रुद्रौ च । पापिनो रोदयत इति सतां रुजं द्रावयत इति ॥ १–११ ॥ या हेतिर्धनुरिति अयक्ष्मेण तेन धनुषा ॥ १२–१३ ॥ नमांसीति विभक्तिप्रतिरूपकमव्ययम् । प्रणामपरम्परा ॥ १४ ॥

या॑ त इ॑षुः शिव॑तमा शिवं॑ बभू॑व ते ध॑नुः ।
शिवा॑ शरव्या॒॒ या॑ त॑व त॑या नो मृड जीव॑से ॥ १६ ॥ ४७

इत्येकादशोऽनुवाकः

—०—

न॑मो हि॑रण्यबाहवे सेना॒न्ये॒ दिशां॑ च प॑तये न॑मो न॑मो वृक्षे॑भ्यो ह॑रिकेशेभ्यः पशूनां॑ प॑तये न॑मो न॑मः श॒ष्पिं॑ञ्जराय त्वि॑षीमते पथीनां॑ प॑तये न॑मो न॑मो बभ्लुशा॑य व्याधि॑नेऽन्नानां॑ प॑तये न॑मो न॑मो ह॑रिकेशायोपवीति॑ने पुष्टा॑नां प॑तये न॑मो न॑मो भव॑स्य हेत्यै ज॑गतस्प॑तये न॑मो न॑मो रुद्रा॑याऽततायि॑ने क्षे॑त्राणां प॑तये न॑मो न॑मः सूता॑या॑हन्त्वाय व॑नानां प॑तये न॑मो न॑मो रो॑हिताय स्थप॑तये वृक्षा॑णां प॑तये न॑मो न॑मो मन्त्रि॑णे वाणिजा॑य क॑क्षाणां प॑तये न॑मो न॑मो भुवन्त॑ये वारिव-स्कृता॑यौषधीनां प॑तये न॑मो न॑म आक्रन्द॑यत उच्चैर्घो॑षाय स॑त्त्वानां प॑तये न॑मो न॑मः कृत्सं॑वीता॑य धा॑वते पत्ती॑नां प॑तये न॑मो न॑मः स॑हमानाय निव्याधि॑न आव्या॑धिनीनां प॑तये न॑मो न॑मो॑ निषङ्गि॑णे ककुभा॑य स्तेना॑नां प॑तये न॑मो न॑मो व॑ञ्चते

शल्यानां मुखमिति समुदायैकवचनम् । सर्वाण्यपि हि शल्यानां मुखानि दुष्टानामेवाभिमुखानीत्यैकमुख्यमेकवचनार्थः ॥ १५ ॥ या त इषुः मां प्रति शिवतमा बभूव, धनुश्च शिवतमं बभूव, इतः परमपि ताभ्यां नो मृड रक्ष । या तव शरव्या शरस्य लक्षभूता तामसी जातिः, असुरप्रकृतिरित्येतत् । साऽपि मयि शिवा भवतु । ‘वेध्यं शरव्यं न नरि’ इति यादवप्रकाशः । तया, पञ्चम्यर्थे तृतीया । ततोऽपि नो मृड रक्ष । जीवसे दीर्घजीवनाय ॥ १६ ॥ ✻ ॥

परिव॑ञ्चते स्तायूनां॑ प॑तये न॑मो न॑मो निचरा॑य परिचरा॑-
या॑रण्यानां प॑तये न॑मो न॑मो निषङ्गि॑ण इषुधिम॑ते त॑स्कराणां
प॑तये न॑मो न॑मः सृकायि॑भ्यो जिघाँ॑सद्भ्यो मुष्णतां॑ प॑तये न॑मो
न॑मोऽसिम॑द्भ्यो न॑क्तं च॑रद्भ्यः प्रकृन्ता॑नां प॑तये न॑मो न॑म
उष्णीषि॑णे गिरिचरा॑य कुलुञ्चा॑नां प॑तये न॑मः ॥ १७ ॥ ४८

इति द्वादशोऽनुवाकः

—०—

न॑म इषुकृ॑द्भ्यो धन्वकृ॑द्भ्यश्च वो न॑मो न॑म इ॑षुमद्भ्यो धन्वा-यि॑भ्यश्च वो न॑मो न॑म आतन्वाने॑भ्यः प्रतिद॑धानेभ्यश्च वो न॑मो न॑म आय॑च्छद्भ्योऽस्यद्भ्यश्च वो न॑मो न॑मो विसृज॑द्भ्यो वि॑ध्यद्भ्यश्च वो न॑मो न॑मः स्वप॑द्भ्यो जा॑ग्रद्भ्यश्च वो न॑मो न॑मः श॑यानेभ्य आ॑सीनेभ्यश्च वो न॑मो न॑मस्ति॑ष्ठद्भ्यो धा॑वद्भ्यश्च वो न॑मो न॑मः सभा॑भ्यः सभा॑पतिभ्यश्च वो न॑मो न॑मो॑ऽश्वेभ्यो॑ऽश्वपतिभ्यश्च वो न॑मो न॑म आव्याधि॑नीभ्यो विवि॑ध्यद्भ्यश्च वो न॑मो न॑म उ॑गणाभ्यस्तृँहतीभ्यश्च वो न॑मो न॑मो व्रा॑तेभ्यो व्रा॑तपतिभ्यश्च वो न॑मो न॑मो गणे॑भ्यो

वनानां पतिर्वनस्पतिर्भवति । जगतां पतिर्जगतस्पतिर्भवति । आम्लोपेन सुट् । जगत्कृता ब्रह्मणा संवीतः सङ्गतः । नितरां चरतीति निचरः । स एव निचेरुः ॥ १७ ॥ ✻ ॥ विविद्ध्यन्ति यानि सैन्यानि तेषु सन्निहितेभ्यः । कृतश्रमाः कृच्छ्राः ये कृच्छ्रं तपश्चरन्ति तेषां पतयो मरीच्यादयः कृच्छ्रपतयः । वरूथो रथगुप्तिः । परितः प्रतिसीराद्यावरणेन पिहितेन रथेन गच्छन्तो वरूथिनः ।

गणपतिभ्यश्च वो नमो नमः कृच्छ्रेभ्यः कृच्छ्रपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो नमः सेनाभ्यः सेनानीभ्यश्च वो नमो नमो रथिभ्यो वरूथिभ्यश्च वो नमो नमो महद्भ्योऽर्भकेभ्यश्च वो नमो नमो युवभ्य आशिनेभ्यश्च वो नमो नमः क्षत्तृभ्यः सङ्ग्रहीतृभ्यश्च वो नमो नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्म्मारेभ्यश्च वो नमो नमः पुञ्जिष्टेभ्यो निषादेभ्यश्च वो नमो नमः श्वनिभ्यो मृगयुभ्यश्च वो नमो नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च नमो व्युप्तकेशाय च कपर्द्दिने च नमः सहस्राक्षाय च शतधन्वने च ॥ १८ ॥ ४९

॥ इति त्रयोदशोऽनुवाकः ॥

नमो गिरिशाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च सवृध्वने च नमोऽग्र्याय च प्रथमाय च नम आशवे चाजिराय च नमः शीभ्याय च शीघ्र्याय च नम ऊर्म्याय चावस्वन्याय च नमो नाद्याय च द्वीप्याय च नमो ज्येष्ठाय च

'नमो महद्भ्यो नमो अर्भकेभ्यो नमो युवभ्यो नम आशिनेभ्यः' इति श्रुतिः । आशिना वटवः । 'नमो महद्भ्योऽस्तु नमः शिशुभ्यो नमो युवभ्यो नम आवटुभ्यः' इति भागवते ॥ १८ ॥ ✻ ॥

कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो मद्ध्यमाय चापगल्भाय च नमो बुध्न्याय च जघन्याय च नमः सोभ्याय च प्रतिसर्य्याय च नम आशुषेणाय चाऽशुरथाय च नमो बिल्मिने च कवचिने च नमो वर्म्मिणे च वरूथिने च नमः शूराय चावभेदिने च नमः श्रुताय च श्रुतसेनाय च नमो याम्याय च क्षेम्याय च नम उर्वर्य्याय च खल्याय च नमश्श्लोक्याय चावसान्याय च नमः श्रवाय च प्रतिश्रवाय च नमो वन्याय च कक्ष्याय च नमो दुन्दुभ्याय चाहनन्याय च नमो धृष्णवे च प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चाऽयुधिने च नमः स्वायुधाय च सुधन्वने च ॥ १९ ॥ ५०

इति चतुर्द्दशोऽनुवाकः

नमः सृत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमो नाद्याय च वैशन्ताय च नमः कुल्याय च सरस्याय च नमः कूप्याय चावट्याय च नमो वर्ष्याय चावर्ष्याय च नमो मेघ्याय च विद्युत्याय च नमो वीध्र्याय चाऽतप्याय च नमो वात्याय च रेष्म्याय च नमो वास्तव्याय च वास्तुपाय च नमः सोमाय च

शिपिनामकेषु प्रजासु पशुषु यज्ञेषु च विविधतया स्थितः शिपिविष्टः । समानं तत्तद्योग्यतानुगुणं वर्धयन् सवृध्वान् । शीघ्रकारित्वात् शीघ्रः । नद्यां भवो नादेय एव नाद्यः । मन्त्रगुप्तो वरूथीत्युक्तम् ॥ १९ ॥ ✻ ॥ सरणात् सृतिः क्षुद्रमार्गः । तत्रगतः सृत्यः । न विद्यत आद्यो यस्मादिति च नाद्यः । नदीभवश्च । क्षुद्रनदी-महानदीभेदेनापुनरुक्तिः । ह्रदा अव्यन्तेऽनेन । नितरां वेषमलङ्कारमर्हतीति

रुद्रा॑य च न॑मस्ताम्रा॑य चारुणा॑य च न॑मः शङ्ग॑वे च पशुप॑तये च न॑म उग्रा॑य च भीमा॑य च न॑मो हन्त्रे॑ च ह॑नीयसे च न॑मोऽग्रेवधा॑य च दू॑रेवधा॑य च न॑मो वृक्षे॑भ्यो ह॑रिकेशेभ्यो न॑मस्सतारा॑य न॑मः शम्भ॑वे च मयोभ॑वे च न॑मः शङ्करा॑य च मयस्करा॑य च न॑मः शिवा॑य च शिव॑तराय च न॑मः किंशिला॑य च क्षयणा॑य च न॑म इरि॑ण्याय च प्रपथ्याय च न॑मः पुलस्ति॑ने च कपर्दि॑ने च न॑मो गोष्ठ्याय च गृह्याय च न॑मस्त॑ल्प्याय च गेह्याय च न॑मः पार्य्या॑य चावार्य्या॑य च न॑मः प्रत॑रणाय चोत्त॑रणाय च न॑मस्ती॑र्थ्या॑य च कूल्याय च न॑मः फेन्याय च शष्प्याय च न॑मस्सिकत्याय च प्रवाह्याय च न॑मो ह्रद॑व्याय च निवेष्याय च न॑मः का॑ट्याय च गह्वरेष्ठा॑य च न॑मः शुष्क्याय च हरित्याय च न॑मो लो॑प्याय चोलप्याय च न॑मः पाँसव्याय च रजस्याय च न॑मः सू॑र्म्याय चौम्र्याय च न॑मः प॑र्ण्याय च पर्ण्ण-शादा॑य च न॑म आखिदते॑ च प्रखिदते॑ च न॑मोऽभिघ्नते॑ चाप-गुर॑माणाय च न॑म आखिदा॑य च विखिदा॑य च ॥ २० ॥ ५१

इति पञ्चदशोऽनुवाकः

—०—

निवेष्यः । सुष्ठूर्मिमिति समुद्रजले भवाय । साधारणोर्मिमिति नदीजले च भवाय । पर्ण्याय पर्णगताय । पर्णानां शादः शातनम् । तत्कारणाय । आ ईषत् खेदयतीत्याखिदः । विविधं खेदयतीति विखिदः । णिलुक् । खिद्यन्तेऽनेनेति वा ॥ २०–२४ ॥

न॑मो वः किरिके॑भ्यो देवा॑नाँ हृ॑दयेभ्यो न॑मो विचिन्वत्के॑भ्यो
न॑मो विक्षीणके॑भ्यो न॑म आनिर्ह॑तेभ्यः ॥ २१ ॥ ५२

द्रापे॑ अन्धसस्पते द॑रिद्र नीललोहित ।
आसा॑ं प्रजा॑नामेषा॑ं पु॑रुषाणामेषा॑ं पशूना॑म् ।
मा॑ भैर्मा॑ रौङ् मा॑ नः किंश्चना॑ममत् ॥ २२ ॥ ५३

इमा॑ रुद्रा॑य तव॑से कपर्दि॑ने क्षय॑द्वीराय प्र॑भरामहे मतीः ।
य॑था नः श॑म॑सद् द्विप॑दे च॑तुष्पदे वि॑श्वं पुष्टं॑ ग्रा॑मे
अस्मि॑न्ननातुर॑म् ॥ २३ ॥ ५४

या॑ ते रुद्र शिवा॑ तनूः॑ शिवा॑ विश्वा॑ह भेषजी ।
शिवा॑ रुत॑स्य भेषजी त॑या नो मृड जीव॑से ॥ २४ ॥ ५५

प॑रि णो रुद्र॑स्य हेति॑र्वृणक्तु प॑रि त्वेष॑स्य दुर्म्मति॑रघायोः॑ ।
अ॑व॑ स्थिरा॑ मघ॑वद्भ्यस्तनुष्व मीढ्वस्तोका॑य त॑नयाय मृड ॥
॥ २५ ॥ ५६

मीढुष्टम शि॑वतम शिवो॑ नः सुम॑ना भव ।
परमे॑ वृक्ष॑ आ॑युधं निधा॑य कृत्तिं॑ व॑सान उ॑च्चर पि॑नाकं
बिभ्र॑दुच्चर ॥ २६ ॥ ५७

वि॑कि॑रिड वि॑लोहित न॑मस्ते अस्तु भगवः ।
या॑स्ते सह॑स्रँ हेत॑योऽन्यऽस्म॑न्निवपन्तु ताः॑ ॥ २७ ॥ ५८

मृड मृडय रक्ष सुखय वा ॥ २५ ॥ उच्चर उद्गच्छ उदितो भव ॥ २६ ॥ अभीष्टं

सहस्रधा सहस्राणि हेतयस्तव बाह्वोः ।
तासामीशानो भगवः पराचीना मुखा कुरु ॥ २८ ॥ ५९

असङ्ख्याता सहस्राणि ये रुद्रा अधि भूम्याम् ।
तेषाँ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ २९ ॥ ६०

येऽस्मिन् महत्यर्णवेऽन्तरिक्षे भवा अधि ।
तेषाँ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ३० ॥ ६१

ये नीलग्रीवाः शितिकण्ठा दिवं रुद्रा उपश्रिताः ।
तेषाँ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ३१ ॥ ६२

ये नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः ।
तेषाँ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ३२ ॥ ६३

ये वनेषु शष्पिञ्जरा नीलग्रीवा विलोहिताः ।
तेषाँ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ३३ ॥ ६४

येऽन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् ।
तेषाँ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ३४ ॥ ६५

ये भूतानामधिपतयो विशिखासः कपर्दिनः ।
तेषाँ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ३५ ॥ ६६

विकिरतीति विकिरिः सन् डयत इति विकिरिडः । येऽस्मदन्ये तान् पीडयन्तु ॥ २७–३२ ॥ वनेषु वृक्षेष्वित्यनर्थान्तरम् ॥ ३३–३५ ॥

ये पथीनां पथिरक्षय ऐडमृदा यव्युधः ।
तेषाँ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ३६ ॥ ६७

ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः ।
तेषाँ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ३७ ॥ ६८

य एतावन्तो वा भूयाँसो वा दिशो रुद्रा वितस्थिरे ।
तेषाँ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ३८ ॥ ६९

नमो अस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमो अस्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दधामि । नमो अस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वात इषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमो अस्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दधामि । नमो अस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमो अस्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दधामि ॥ ३९ ॥ ७०

हरिः ओ३म्

इति षोडशोऽनुवाकः

इति काठकसंहितायां रुद्रपाठः

पथीनाम् । इन्नन्त इदन्तोऽपि भवतीति प्राचीनम् । यथा नृकेसरी नृकेसरिः । ततस्त्रीणि रूपाणि पन्थाः पथः पथिरिति । तेन पथीनां पथामधिपतयः । इडा

अन्नम् । तत्समुदायश्चतुर्विधं त्रिविधं वा अन्नम् । ऐडं मृद्नन्तीत्यैडमृदः ॥ ३६–३८ ॥ यं ते वयं द्विष्म इत्यात्मनि बहुवचनम् । सोऽहं यं द्वेष्मि । दधामीति वा बहुवचनार्थे । ऐकमत्यं वचनव्यत्ययार्थः ॥ ३९ ॥

इदमाचार्यगोविन्दः काठकं शतरुद्रियम् ।
सङ्ग्रहेण व्याचकार विनेयजनवाञ्छया ॥ ❊ ॥

इत्याचार्यगोविन्दस्य कृतिषु काठकीयशतरुद्रीयव्याख्यानं समाप्तम् ।

—०—



कदा नु शितिकण्ठ ते वपुरवेक्षते वीक्षणम्

शतरुद्रियम्

(कपिष्ठलकठसंहितापाठानुसारि)

हरिः ओ३म् ॥ नमस्ते रुद्र मन्यवे उतो त इषवे नमः ।
बाहुभ्यामुत ते नमः ॥ १ ॥

नारायणं नमस्कृत्य प्राणं रुद्रं च लेशतः ।
कपिष्ठलकठानां व्याकरिष्ये शतरुद्रियम् ॥

श्रूयन्ते–कठाः प्राच्यकठाः कपिष्ठलकठा इति । कठानां संहिता समग्रा चोपलब्धा । लुप्ता अनुयायिनः । प्राच्यकठानां कथाऽपि न श्रूयते । लुप्ता संहिता । लुप्ताश्चानुयायिनः । कपिष्ठलकठानां संहिता त्वंशत उपलब्धा । लुप्ता एवानुयायिनः ।

संहितेयमष्टचत्वारिंशदध्यायात्मिका षड्भिरष्टकैर्युक्ता । द्वितीयतृतीये अष्टके लुप्ते एव । अवशिष्टान्यंशतो लुप्तान्यप्युपलब्धानि । दिष्ट्या चतुर्थमष्टकमुपलब्धम् । तत्र सप्तविंशोऽध्यायः षडनुवाकात्मकः समग्रो रुद्राध्यायः ।

कथं कपिष्ठलकठाः? कपिष्ठलो नाम कश्चनर्षिः । तद्वंशभवाः कपिष्ठलाः कठाः । तमेतं गोत्रप्रवर्तकमृषिं स्मरति पाणिनिः–'कपिष्ठलो गोत्रे' (अ.सू.८.३.९१) इति । निरुक्तव्याख्याता दुर्गाचार्यः स्वयमात्मानं कपिष्ठलशाखानुयायिनमाह–**'अहं च कापिष्ठलो वासिष्ठः'** इति । कपिस्थलग्रामवासी चायं मुनिरिति ज्ञायते । कपेः, नामैकदेशग्रहणम्, कपिष्ठलमुनेः वासस्थलं कपिस्थलमिति । तदेतदाह वामनः काशिकायाम्–**'कपेः स्थलं कपिस्थलम्'** इति । कुरुक्षेत्रसमीपगोऽयं ग्रामः सम्प्रत्यपि **'कैतल्'** इति व्यपदिश्यते ।

या ते रुद्र शिवा तनूरघोराऽपापकाशिनी ।
तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि ॥ २ ॥

यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे ।
शिवां गिरित्र तां कुरु मा हिंसीः पुरुषं जगत् ॥ ३ ॥

शिवेन वचसा त्वा गिरिशाच्छा वदामसि ।
यथा नः सर्वमिज्जगदयक्ष्मं सुमना असत् ॥ ४ ॥

अद्ध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहींश्च सर्वान् जम्भयन् सर्वाश्च यातुधान्योऽधराचीः
परासुव ॥ ५ ॥

असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः ।
ये चेमे रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषां
हेड ईमहे ॥ ६ ॥

क्वचिदपि **'कवितल्'** इति । तमेतमितिहासमजानन् भट्टोजिदीक्षितः 'कपि-प्रचुरोऽयं ग्रामः' इति भ्रान्त्या 'कपीनां स्थलं कपिस्थलम्' इति विजग्राह । भगवती भ्रान्तिरियम् । नेदं कपीनां स्थलम् । किन्तु महर्षेः कपेः स्थलम् । कपिष्ठलस्य स्थलं कपिस्थलमित्येव वा विग्रहः । **'लोपः समाने'** इत्येकपदलोपः । वराहमिहिरोऽपि कपिष्ठलस्य मुनेः ग्राममुल्लिलेख–**'साकेत-कङ्कुरुकालकोटिकुकुराश्च पारियानगः । औदुम्बरकापिष्ठलगजा-ह्वयाश्चेति मध्यमिदम्'** इति । (बृहत्संहिता १४-४)कथं कपिष्ठलः? कं सुखं पिबतीति कपिर्नारायाणः । तस्य स्थलं निलयनमिति कपिष्ठलो वायुः । तन्नामा चाय-मृषिः । कं जलं पिबतीति कपिः सूर्यः । सोऽस्य भगवदुपास्तिस्थलमिति गायत्र्या सूर्यनारायणमुपासमानो मुनिः कपिष्ठलः । तस्येयं संहिता । नात्रातीव

असौ योऽवसर्प्पति नीलग्रीवो विलोहितः ।
उतैनं गोपा अदृश्रन्नदृश्रन्नुदहार्य्यः स दृष्टः किं करिष्यति॥ ७ ॥

नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।
अथो ये अस्य सत्वानोऽहं तेभ्यो अकरं नमः ॥ ८ ॥

प्रमुश्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्ज्याम् ।
याश्च ते हस्त इषवः परा ता भगवो वप ॥ ९ ॥

विज्यं धनुः कपर्द्दिनो विशल्यो बाणवाँ उत ।
अनेशन्नस्येषव आभुरस्य निषङ्गधिः ॥ १० ॥

या ते हेतिर्म्मीढुष्टम हस्ते बभूव ते धनुः ।
तयाऽस्मान्विश्वतस्त्वमयक्ष्मेण परिभुज ॥ ११ ॥

परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः ।
अथो य इषुधिस्तवाऽरे अस्मन्निधेहि तम् ॥ १२ ॥

नमांसि त आयुधायानातताय धृष्णवे ।
उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ॥ १३ ॥

अवतत्य धनुष्ट्वं सहस्राक्ष शतेषुधे ।
निशीर्य्य शल्यानां मुखं शिवो नः सुमना भव ॥ १४ ॥

पाठभेद इति पर्याप्ता लघुटिप्पणी ॥ १–६ ॥ 'स दृष्टः किं करिष्यति?' इति कुतूहलप्रश्नः । उत्तरगर्भश्चायम् । बहिर्मुखतया दृष्टः किं करिष्यतीत्याक्षेपः । न किमपि करिष्यति । तामसै रामादिष्ववतारेषु दृष्टः किं कुत्सितं दुःखमेव करि-ष्यति । अन्तर्बिम्बरूपतया दृष्टः किमतिशयितं सुखं करिष्यति ॥ ७–१५ ॥
॥ ✻ ॥

या त इषुः शिवतमा शिवं बभूव ते धनुः ।
शिव शरव्या या तव तया नो मृड जीवसे ॥ १५ ॥

इति प्रथमोऽनुवाकः

—०—

नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमः । नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमः । नमः शष्पिञ्जराय त्विषीमते पथीनां पतये नमः । नमो बभ्लुशाय व्याधिनेऽन्नानां पतये नमः । नमो हरिकेशायोपवीतिने पुष्टानां पतये नमः । नमो भवस्य हेत्यै जगतस्पतये नमः । नमो रुद्रायाऽततायिने क्षेत्राणां पतये नमः । नमः सूतायाहन्त्वाय वनानां पतये नमः । नमो रोहिताय स्थपतये वृक्षाणां पतये नमः । नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमः । नमो भुवन्तये वारिवस्कृता-यौषधीनां पतये नमः । नम आक्रन्दयत उच्चैर्घोषाय सत्त्वानां पतये नमः । नमः कृत्संवीताय धावते पत्तीनां पतये नमः । नमः सहमानाय निव्याधिन आव्याधि-नीनां पतये नमः । नमो निषङ्गिणे ककुभाय स्तेनानां पतये नमः । नमो वञ्चते परिवञ्चते स्तायूनां पतये नमः । नमो निचराय परिचरायारण्यानां पतये नमः । नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमः । नमः सृगायुभ्यो जिघां-सद्भ्यो मुष्णतां पतये नमः । नमोऽसिमद्भ्यो नक्तञ्चरेभ्यो

सृकं सृकेति सृगं सृगेति चाऽयुधनामानि ॥ १६ ॥ ✻ ॥

प्रकृन्तानां पतये नमः । नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमः ॥ १६ ॥

इति द्वितीयोऽनुवाकः

—०—

नम इषुकृद्भ्यो धन्वकृद्भ्यश्च वो नमः । नम इषुमद्भ्यो धन्वायिभ्यश्च वो नमः । नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमः । नम आयच्छद्भ्योऽस्यद्भ्यश्च वो नमः । नमो विसृजद्भ्यो विद्ध्यद्भ्यश्च वो नमः । नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमः । नमः शयानेभ्य आसीनेभ्यश्च वो नमः नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमः । नमः सभाभ्यः सभा-पतिभ्यश्च वो नमः । नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो नमः । नम आव्याधिनीभ्यो विविद्ध्यद्भ्यश्च वो नमः । नम उगणा-भ्यस्तृंहतीभ्यश्च वो नमः । नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमः । नमो गणेभ्यो गणपतिभ्यश्च वो नमः । नमः कृच्छ्रेभ्यः कृच्छ्रपतिभ्यश्च वो नमः । नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमः । नम सेनाभ्यः सेनानिभ्यश्च वो नमः । नमो रथिभ्यो वरूथिभ्यश्च वो नमः । नमो महद्भ्योऽर्भकेभ्यश्च वो नमः । नमः क्षत्तृभ्यः सङ्ग्रहीतृभ्यश्च वो नमः । नमस्तक्षभ्यो रथ-कारेभ्यश्च वो नमः । नमः कुलालेभ्यः कर्म्मारेभ्यश्च वो नमः ।

सुवृद्धं परिपूर्णं गुणक्रियादिकमस्येति सुवृद्धी । तस्मै । प्रतिकूलमपि सह्यमभिभाव्यमस्येति प्रतिसह्यः ॥ १७–१९ ॥ ✻ ॥

नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमः । नमः श्वनिभ्यो मृगयुभ्यश्च वो नमः । नम श्वभ्यः श्वपतिभ्यश्च वो नमः । नमो भवाय च रुद्राय च । नमः शर्वाय च पशुपतये च । नमो नीलग्रीवाय च शितिकण्ठाय च । नमः कपर्दिने च व्युप्तकेशाय च । नमः सहस्राक्षाय च शतधन्वने च ॥ १७ ॥

इति तृतीयोऽनुवाकः

—०—

नमो गिरिशयाय च शिपिविष्टाय च । नमो मीढुष्टमाय चेषुमते च । नमो ह्रस्वाय च वामनाय च । नमो बृहते च वर्षीयसे च । नमो वृद्धाय च सुवृद्धिने च । नमोऽग्र्याय च प्रथमाय च । नम आशवे चाजिराय च । नमः शीभाय च शीघ्र्याय च । नम ऊर्म्याय चावस्वन्याय च । नमो नाद्याय च द्वीप्याय च । नमो ज्येष्ठाय च कनिष्ठाय च । नमः पूर्वजाय चापरजाय च । नमो मद्ध्यमाय चापगल्भाय च । नमो बुध्न्याय च जघन्याय च । नमः सोभ्याय च प्रतिसह्याय च । नम आशुषेणाय चाऽशुरथाय च । नमो बिल्मिने च कवचिने च । नमो वर्म्मिणे च वरूथिने च । नमः शूराय चावभेदिने च । नमः श्रुताय च श्रुतसेनाय च । नमो याम्याय च क्षेम्याय च । नम उर्वर्याय च खल्याय च । नमः श्रवाय च प्रतिश्रवाय च । नमः श्लोक्याय चावसान्याय च । नमो कक्ष्याय च वन्याय च । नमो दुन्दुभ्याय चाऽहनन्याय च । नमो धृष्णवे च प्रमृशाय च । नमो

निषङ्गिणे चेषुधिमते च । नमस्तीक्ष्णेषवे चाऽयुधिने च । नमः स्वायुधाय च सुधन्वने च ॥ १८ ॥

इति चतुर्थोऽनुवाकः

—०—

नमः स्रुत्याय च पथ्याय च । नमः काट्याय च नीप्याय च । नमो नाद्याय च वैशन्ताय च । नमः कुल्याय च सरस्याय च । नमः कूप्याय चावट्याय च । नमो वर्ष्याय चावर्ष्याय च । नमो मेघ्याय च विद्युत्याय च । नमो वीध्रियाय चाऽतप्याय च । नमो वात्याय च रेष्म्याय च । नमो वास्तव्याय च वास्तुपाय च । नमः सोमाय च रुद्राय च । नमस्ताम्राय चारुणाय च । नमः शङ्गवे च पशुपतये च । नम उग्राय च भीमाय च । नमो हन्त्रे च हनीयसे च । नमोऽग्रेवधाय च दूरेवधाय च । नमो वृक्षेभ्यो हरिकेशेभ्यः । नमस्ताराय । नमः शम्भवे च मयोभवे च । नमः शङ्कराय च मयस्कराय च । नमः शिवाय च शिवतराय च । नमः किंशिलाय च क्षयणाय च । नम इरिण्याय च प्रपथ्याय च । नमः पुलस्तिने च कपर्दिने च । नमो गोष्ठ्याय च गृह्याय च । नमस्तल्प्याय च गेह्याय च । नमः पार्य्याय चावार्य्याय च । नमः प्रतरणाय चोत्तरणाय च । नमस्तीर्थ्याय च कूल्याय च । नमः फेन्याय च शष्प्याय च । नमः सिकत्याय च प्रवाह्याय च । नमो ह्रदव्याय च निवेष्याय च । नमः काट्याय च गह्वरेष्ठाय च । नमः शुष्याय च हरित्याय च । नमो लोप्याय चोलप्याय च । नमः पांसव्याय च रजस्याय च ।

नमः सूर्म्याय चोर्म्याय च । नमः पर्ण्णाय च पर्ण्णशदाय च ।
नम आखिदते च प्रखिदते च । नमोऽभिघ्नते चापगुरमाणाय
च । नम आखिदाय च विखिदाय च ॥ १९ ॥

इति पञ्चमोऽनुवाकः

—०—

नमो वः किरिकेभ्यो देवानां हृदयेभ्यः । नमो विचिन्वत्केभ्यः ।
नमो विक्षिणत्केभ्यः । नम आनिर्हतेभ्यः ॥ २० ॥

द्रापे अन्धसस्पते दरिद्र नीललोहित ।
आसां प्रजानामेषां पुरुषाणामेषां पशूनाम् ।
भैर्म्मा रुङ् मा नः किञ्चनाममत् ॥ २१ ॥

इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः ।
यथा शमसद्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥
॥ २२ ॥

या ते रुद्र शिवा तनूः शिवा विश्वाह भेषजी ।
शिवा रुतस्य भेषजी तया नो मृड जीवसे ॥ २३ ॥

परि नो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्म्मतिरघायोः ।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृड ॥
॥ २४ ॥

मीढुष्टम शिवतम शिवो नः सुमना भव ।
परमे वृक्ष आयुधं निधाय कृत्तिं वसान उच्चर पिनाकं
बिभ्रदुच्चर ॥ २५ ॥

विकिरिद्र विलोहित नमस्ते अस्तु भगवः ।
यास्ते सहस्रं हेतयोऽन्यमस्मन्निवपन्तु ताः ॥ २६ ॥

सहस्रधा सहस्राणि हेतयस्तव बाह्वोः ।
तासामीशानो भगवः पराचीना मुखा कुरु ॥ २७ ॥

असङ्ख्याता सहस्राणि ये रुद्रा अधि भूम्याम् ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ २८ ॥

ये अस्मिन्महत्यर्ण्णवे अन्तरिक्षे भवा अधि ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ २९ ॥

ये नीलग्रीवाः शितिकण्ठा दिवं रुद्रा उपश्रिताः ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ३० ॥

ये नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ३१ ॥

ये वनेषु शष्पिञ्जरा नीलग्रीवा विलोहिताः ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ३२ ॥

येऽन्नेषु विविद्ध्यन्ति पात्रेषु पिबतो जनान् ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ३३ ॥

ये भूतानामधिपतयो विशिखासः कपर्दिनः ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ३४ ॥

ये पथीनां पथिरक्षय ईलमृडा यवधः ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ३५ ॥

ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ३६ ॥

य एतावन्तो भूयांसो वा दिशो रुद्रा वितस्थिरे ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ३७ ॥

नमो अस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः । तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः तेभ्यो नमो अस्तु । ते नो मृडयतु । ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दधामि ॥ ३८ ॥

नमो अस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वात इषवः । तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः । तेभ्यो नमो अस्तु । ते नो मृडयन्तु । ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दधामि ॥ ३९ ॥

नमो अस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवः । तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः । तेभ्यो नमो

॥ २०–३४ ॥ ईं लक्ष्मीं लान्तीति ईलाः श्रीलाः । तान् मृडन्तीति ईलमृडाः । यं ज्ञानं घ्नन्तीति यवधः ॥ ३५–४० ॥

अस्तु । ते नो मृडयन्तु । ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दधामि ॥ हरिः ओ३म् ॥ ॥ ४० ॥

इति षष्ठोऽनुवाकः

इति कपिष्ठलकठसंहितायां सप्तविंशतितमोऽध्यायः ॥

—०—

इति कपिष्ठलकठानां शतरुद्रियम्

कपिष्ठलकठैः प्रोक्तं तदिदं शतरुद्रियम् ।
विवृतं किञ्चिदेवात्र विनेयजनवाञ्छया ॥

इत्याचार्यगोविन्दस्य कृतिषु कपिष्ठलकठीयरुद्रानुवाकलघुटिप्पणी ॥

—०—

नृसिंहस्तवः

अस्तु तेजस्वि नोऽधीतमस्तु च ब्रह्मवर्चसम् ।
सम्पादयेम हि सहः सह वीर्य्यं कृषीमहि ॥ १ ॥

स्तम्भं निर्भिद्य निर्य्यन्निखिल-जगदघ-क्षाळनायाव-तीर्ण्णं
पूर्ण्णं स्वर्ण्णोपमान-द्युति-विहत-तमस्तोममस्तारि-वर्ग्गम् ।
स्वस्ति श्रीमत् समस्त-श्रुति-गदितमहो तन्महो नो विदद्ध्यात्
पञ्चास्यं कन्धराया उपरि परि-गतं देव-वृन्दैरमन्दैः ॥ २ ॥

उग्रं व्यग्रेन्द्र-लोकाभयदमरि-दराद्यायुधोदग्र-बाहुं
रुद्रं रुद्रेन्द्र-मुख्यामर-गण-विनुतं भद्र-विज्ञान-मुद्रम् ।
वीरं वीरासन-स्थं भव-भय-हरणं दारणं दारुणानां
रूक्षं त्र्यक्षं महेक्षं क्षपित-दुरितमक्षोभणीयं दिदृक्षे ॥ ३ ॥

ज्वलत्कनक-पिञ्जरं कलित-भक्त-हृत्पञ्जरं
चिरं मुदित-निर्ज्जरं श्रुति-महाटवी-कुञ्जरम् ।
भजे भुवन-बन्धुरं हृदि निजेन्दिरा-मन्दिरं
परं तुरग-कन्धरं दर-धरं नृ-कण्ठीरवम् ॥ ४ ॥

जगन्निधान-पिठरं नृ-हरेर्ज्जठरं नुमः ।
यन्नाभि-कुहरोद्भूतस्तनयो हंस-वाहनः ॥ ५ ॥

यदुत्सङ्गासङ्गा जगदुदय-भङ्गाऽब्धि-तनया
यदुद्गीता गीता विषय-विष-भीतावनकरी ।
सुधी-मुद्रा भद्रा दुरित-गण-विद्रावण-करी
नमस्तस्मै कस्मैचिदमर-पुषे सिंह-वपुषे ॥ ६ ॥

नर-केसरिणं धिक्कृत-हिरण्य-करिणं च सूकरिणम् ।
तोषित-बुध-जन-हरिणं वरिनं दरिणं स्मरामि मन्दरिणम् ॥
॥ ७ ॥

इममाचार्य्य-गोविन्दे सन्निधाय हरिस्तवम् ।
रचयामासतुः प्रेम्णा प्राण-नारायणौ स्वयम् ॥ ८॥

—०—